| ११७५ | सप्तभिः पुत्रैरदितिः | आ.१-१३-८ | मं.१०-७२-९ |
| ११८२ | सप्त युञ्जन्ति रथमेकचक्रं | आ.३-११-२१ | मं.१-१६४-२ |
| ११९१ | सप्तास्यासन्परिधयः | आ.३-१२-७ | मं.१०-९०-१५ |
| २४३ | सप्रत्नवन्नवीयसा | सं.२-२-१२-७,२-३-१४-१,<br>ब्रा.२-४-८-१ | मं.६-१६-२१ |
| ४९० | स बोधि सूरिर्मघवा | सं.४-२-३-१५ | मं.२-६-४ |
| १३५७ | समजैषमिमा अहं | मं. प्र.१-१७-६ | मं.१०-१५९-६ |
| १३३१ | समञ्जन्तु विश्वे देवाः | मं. प्र.१-११-३ | मं.१०-८५-४७ |
| ८१३ | समत्स्वग्निमवसे। | ब्रा.२-४-४-१० | मं.८-११-९ |
| १०६१ | समध्वरायोषसो   नमन्त। | ब्रा.२-८-९-२७ | मं.७-४१-६ |
| २८९ | समन्या यन्त्युप | सं.२-५-१२-१६ | मं.२-३५-३ |
| ११६१ | समानमेतदुदकं | आ.१-९-१७ | मं.१-१६४-५१ |
| ८१६ | समानी व आकूतिः। | ब्रा.२-४-४-१३ | मं.१०-१९१-४ |
| ८१५ | समानो मन्त्रः समितिः | ब्रा.२-४-४-१२ | मं.१०-१९१-३ |
| ५४० | समित्स्रवन्ति सरितो न धेनाः | सं.४-२-९-२१ | मं.४-५८-६,५<br>सम्यक् स्रवन्ति |
| १०८५ | समिद्धस्य श्रयमाणः पुरस्तात् | ब्रा.३-६-१-३ | मं.३-८-२ |
| १०७२ | समिद्धो अग्न आहुत | ब्रा.३-५-२-१० | मं.५-२८-५ |
| १०९१ | समिद्धो अद्य मनुषो दुरोणे। | ब्रा.३-६-३-१ | मं.१०-११०-१ |
| ४८७ | समिधाऽग्निं दुवस्यत | सं.४-२-३-४, ब्रा.१-२-१-२४ | मं.८-४४-१ |
| ७२२ | समिध्यमानःप्रथमः | ब्रा.१-२-१-२७ | मं.३-१७-१ |
| १०७१ | समिध्यमानो अध्वरे | ब्रा.३-५-२-९ | मं.३-२७-४ |
| ११२ | समिन्द्र णो मनसा | सं.१-४-४४-२, ब्रा.२-८-२-१७ | मं. ५-४२-४ |

| | | | |
|---|---|---|---|
| १२७८ | समुद्रार्दर्णवादधि | आ.१०-१-६८ | मं.१०-१९०-२ |
| १२८६ | समुद्रादूर्मिर्मधुमान् | आ.१०-१२-८, मं. प्र.२-३-२ | मं.४-५८-१ |
| ४८० | समुद्रे त्वा नृमणाः | सं.४-२-२-३, मं. प्र.२-१२-३ | मं.१०-४५-३ |
| १३६९ | सं मांग्ने वर्चसा सृज, विद्युन्मे | मं. प्र.२-६-७,८ | मं.१-२३-२४ |
| ५८२ | स योजते अरुषो | सं.४-४-४-१४ | मं.७-१६-२ |
| १३१६ | सम्राज्ञी श्वशुरे भव | मं. प्र.१-६-६ | मं.१०-८५-४६ |
| १३७६ | सम्राजंच विराजं च | मं. प्र.२-८-८ | मं.१०-१२८<br>अनन्तरं खिलं |
| ९६७ | स यो वृषा वृष्णियेभिः | ब्रा.२-८-३-२४ | मं.१-१००-१ |
| ७८३ | सरस्वत्यभि नो नेषि वस्यः । | ब्रा.२-४-३-३,२-८-२-२९ | मं.६-६१-१४ |
| ९१२ | स शेवृधमधिधाः | ब्रा.२-६-९-६ | मं.१-५४-११ |
| ६५ | सश्वितानस्तन्यतुः | सं.१-३-१४-१० | मं.६-६-२ |
| २७१ | स सुष्टुभा स ऋक्वता | सं.२-३-१४-१६ | मं.४-५०-५ |
| १२०७ | सस्निमविन्दच्चरणे नदीनां | आ.४-११-२१ | मं.१०-१३९-६ |
| ४७६ | स हव्यवाट् | सं.४-१-११-२० | मं.३-११-२ |
| ११८५ | सहस्रशीर्षा पुरुषः | आ.३-१२-१ | मं.१०-९०-१ |
| ८८२ | सहि शुचिःशतपत्रः स शुन्ध्यूः | ब्रा.२-५-५-१३,२-८-२-२० | मं.७-९७-७ |
| ५१६ | साकं यक्ष्म प्रपत | सं.४-२-६-१३ | मं.१०-९७-१३ |
| ११५६ | साकञ्जानाꣳ सप्तथमाहुरेकजम् | आ.१-३-१ | मं.१-१६४-१५ |
| ५९ | साध्वीमकः | सं.१-३-१४-४ | मं.१०-५३-३ |
| ५५७ | सान्तपनाः | सं.४-३-१३-१० | मं.७-५९-९ |
| ३४८ | सिनीवालि | सं.३-१-११-१५, ३-३-११-१७ | मं.२-३२-६ |
| १२५० | सीते वन्दामहे त्वाऽर्वाची | आ.६-६-८ | मं.४-५७-६<br>अर्वाची सुभगे<br>भव सीते |
| ४२१ | सीद होतः स्व उ लोके | सं.३-५-११-६,४-१-३-१० | मं.३-२९-८ |
| ५०१ | सीरा युञ्जन्ति कवयो | सं.४-२-५-१५ | मं.१०-१०१-४ |

| | | | |
|---|---|---|---|
| १३१५ | सु॒कि॒ꣳशु॒कꣳ श॑ल्म॒लिं | मं. प्र.१-६-४ | मं.१०-८५-२० |
| १२६२ | सु॒क्षे॒त्रिया सु॑गातु॒या | आ.६-११-२ | मं.१-९७-२ |
| ६९१ | सु॒गव्यं॑ नो वा॒जी स्वश्व्यं॑ पु॒ꣳसः | सं.४-६-९-११ | मं.१-१६२-२२ |
| १५८ | सु॒त्रामा॑णं | सं.१-५-११-१९, आ.१-१३-४ | मं.१०-६३-१० |
| ६४८ | सु॒प॒र्णं व॑स्ते मृ॒गो अ॑स्या॒ दन्तः॑ | सं.४-६-६-११ | मं.६-७५-११ |
| ८९२ | सु॒ब्रह्मा॑णं वी॒रव॑न्तं बृ॒हन्त॑म् । | ब्रा.२-५-६-२ | मं.१०-४७-३<br>सु॒ब्रह्मा॑णं दे॒वव॑न्तं |
| १३२६ | सु॒म॒ङ्ग॒लीरि॒यं व॒धूः | मं. प्र.१-९-५ | मं.१०-८५-३३ |
| १९८ | सु॒स॒न्दृश॑न्त्वा व॒यं | सं.१-८-५-६ | मं.१-८२-३ |
| १२२६ | सूर्यं॑ ते॒ चक्षु॑र्गच्छतु॒ वात॑मा॒त्मा | आ.६-१-२२, ६-७-१२ | मं.१०-१६-३<br>(सूर्यं॒ चक्षुः॑) |
| ६१७ | सूर्य॑ र॒श्मिर्हरि॑केशः | सं.४-६-३-८ | मं.१०-१३९-१ |
| १२७९ | सू॒र्या॒च॒न्द्र॒मसौ॑ | आ.१०-१-६९ | मं.१०-१९०-३ |
| १०१२ | सूर्यो॑ दे॒वीमु॒षस॒ꣳ रोच॑माना॒ मर्यः॑ | ब्रा.२-८-७-१ | मं.१-११५-२ |
| ८६७ | सेद॒ग्निर॒ग्नीꣳ रत्यै॑त्य॒न्यान् । | ब्रा.२-५-३-७ | मं.७-१-१४ |
| ३६ | सेद॑ग्ने अस्तु सु॒भगः॑ सु॒दानुः॑ | सं.१-२-१४-७ | मं.४-४-७ |
| ५९३ | सैनाऽनी॑केन | सं.४-३-१३-५,४-६-१-२२ | मं.२-९-६ |
| ११२३ | सो अ॑ग्न ईजे शश॒मे च॒ मर्तः॑ | ब्रा.३-६-१०-९ | मं.६-१-९ |
| १८४ | सोम॒ꣳ राजा॑न॒ं वरु॑णं | सं.१-७-१०-७ | मं.१०-१४१-३ |
| १३०० | सोमः॑ प्रथ॒मो वि॑विदे | मं. प्र.१-३-१ | मं.१०-८५-४० |
| १०७६ | सोम॑ गी॒र्भिष्ट्वा॑ व॒यम् । | ब्रा.३-५-६-४ | मं.१-९१-११ |
| १२३३ | सोम॒ एके॑भ्यः पवते | आ.६-३-७ | मं.१०-१५४-१ |
| ४६५ | सोम॒ यास्ते॑ मयो॒भुवः॑ | सं.४-१-११-२ | मं.१-९१-९ |
| १४१ | सो॒मान॒ꣴस्वर॑णम् | सं.१-५-६-१३, आ.१०-१-५२ | मं.१-१८-१ |
| २२५ | सोमा॑पूषणा॒ जन॑ना | सं.१-८-२२-१८, २-६-११-२२,<br>ब्रा.२-८-१-१३ | मं.२-४०-१ |

| | | | |
|---|---|---|---|
| ९४२ | सोमापूषणा रजसो विमानम् । | ब्रा.२-८-१-१५ | मं.२-४०-३ |
| २२४ | सोमारुद्रा युवं | सं.१-८-२२-१७ | मं.६-७४-३ |
| २२३ | सोमा रुद्रा विवृहतं | सं.१-८-२२-१६ | मं.६-७४-२ |
| १३२४ | सोमेनादित्या बलिनः | मं. प्र.१-९-२ | मं.१०-८५-२ |
| ५० | सोमो जिगाति गातुवित् | सं.१-३-४-५ | मं.३-६२-१३ |
| १३०१ | सोमोऽददद्गन्धर्वाय | मं. प्र.१-३-२ | मं.१०-८५-४१ |
| ९५७ | सोमो धेनुꣳसोमो अर्वन्तमाशुं | ब्रा.२-८-३-१ | मं.१-९१-२० |
| ५९९ | स्तुहि श्रुतं गर्तसदं | सं.४-५-१०-८, ब्रा.२-८-६-२६ | मं.२-३३-११ |
| २४६ | स्तोमासस्त्वा | सं.२-२-१२-१२ | मं.५-८४-२ |
| ११७१ | स्त्रियः सतीः। ता उ मे पुꣳस आहुः। | आ.१-११-१२ | मं.१-१६४-१६ |
| ९९१ | स्थूरस्य रायो बृहतो य ईशे । | ब्रा.२-८-५-२९ | मं.४-२१-४ |
| १२७४ | स्योना पृथिवि | आ.१०-१-४८,<br>मं. प्र.२-१५-२, २-१८-८ | मं.१-२२-१५ |
| १०२६ | स्वश्वा यशसायातमर्वाक् । | ब्रा.२-८-७-२३ | मं.७-६९-३ |
| ११४३ | स्वस्तिदा विशस्पतिः | ब्रा.३-७-११-२४,आ.१०-१-४४,<br>१०-५५-१ | मं.१०-१५२-२ |
| ११५५ | स्वस्ति न इन्द्रो वृद्धश्रवाः | आ.१-१-२,१-२१-७,<br>१०-०१-४५ | मं.१-८९-६ |
| ५५४ | स्वस्ति नो दिवो | सं.४-३-१३-६ | मं.१०-७-१ |
| ६४६ | स्वादुषꣳसदः पितरो वयोधाः | सं.४-६-६-९ | मं.६-७५-९ |
| २०६ | हꣳसः शुचिषद्वसुरन्तरिक्षसत्<br>. . . . बृहत् (अतिच्छन्दः) | सं.१-८-१५-१८,४-२-१-१६,<br>आ.१-३-१२,१०-१२-६,<br>१०-४०-१ | मं.४-४०-५ |
| ४०४ | हꣳसैरिव | सं.३-४-११-१० | मं.१०-६७-३ |
| ३९६ | हव्यवाडग्निः | सं.३-४-११-२ | मं.५-४-२ |
| ३५१ | हिरण्य केशः | सं.३-१-११-२० | मं.१-७९-१ |
| २४१ | हिरण्यगर्भः समवर्तताग्रे | सं.२-२-१२-१, ४-१-८-१३,<br>४-२-८-५, आ.१-१३-११,<br>१०-१-१३ | मं.१०-१२१-१ |
| १०२ | हिरण्यपाणिमूतये | सं.१-४-२५-१,२-२-१२-९ | मं.१-२२-५ |

| | | | |
|---|---|---|---|
| १३३७ | हि॒र॒ण्ययी॑ अ॒रणी॒ | मं. प्र.१-१३-३ | मं.१०-१८४-३ |
| २०४ | हिर॑ण्यवर्णा॒वुषसां॑॑ | सं.१-८-१२-२० | मं.५-६२-८<br>हिर॑ण्यरूपं |
| ६६५ | हिर॑ण्यशृंगोऽयो॑ अस्य॒ पादा॑॑ः | सं.४-६-७-९ | मं.१-१६३-९ |
| ३६२ | हु॒वे वात॑स्वनं | सं.३-१-११-३५ | मं.८-१०२-५ |
| ६७४ | होता॑॑ऽध्व॒र्युराव॑या अ॒ग्निमि॒न्धः | सं.४-६-८-५ | मं.१-१६२-५ |
| ७९० | होता॑रं चि॒त्ररथमध्व॒रस्य॑। | ब्रा.२-४-३-१४ | मं.१०-१-५ |
| ८०३ | ह्वया॑मसि॒ त्वेन्द्र॑ या॒ह्यर्वाङ्। | ब्रा.२-४-३-२८ | मं.६-४१-५ |

।। शुभमस्तु नित्यम् ।।

## ॥ व्यासशिक्षायाः (वेदतैजस व्याख्यायाश्च ) उद्धृताः ॥

**त्रिक्रमाः विंशतिः ॥**

**आदन्तन्तु यदुच्चान्तमोपसर्गपरं यदि ।**
**परेण त्रिक्रमस्स्याद्धि षु पदं नः परन्त्वधः ॥ ३५,३६ ॥**

उच्चः अन्ते यस्य तदुच्चान्तं उदात्तान्तं, आदन्तं आकारान्तं पदं,आ इत्युपसर्गपरं चेत् परेण पदेन सह इत्येदत्पदत्रयस्य क्रमस्स्यात् । त्रयाणां पदानां क्रमत्वात् त्रिक्रम इत्युक्तम् ॥

[1](१) सं. १ -१ -२ -१५ - **स ते माऽऽस्थात्**
(२) सं. १- ३- ८ -११, ६ – ३- ८ - ८ **यज्ञपतिं प्रियधाऽऽविशत**
(३) सं. १ – ५ – १ - ३ **तं पूषाऽऽधत्त**
(४) सं. १ – ५ – १ - ३ **तं धाताऽऽधत्त**
(५) सं. १ – ५ – ४ - २ **अजरं कृत्वाऽऽधत्ते**
(६) सं. १ – ५- ११ - १ **वैश्वानरो न ऊत्या ऽऽप्र यातु**
(७) सं. १ – ६ – ६ - १, १ – ७ – ६ - २ - **तस्मै ते माऽऽवृक्षि**
(८)* सं. १ – ८ – ३ - ३ **मो षू ण इन्द्र**
(९) सं. २ – ३ – १४ - १९ **अर्यमाऽऽयाति**
(१०) सं. २ – ५ – ३ – १० **सेन्द्रं दुध्नाऽऽतनक्ति**

---

[1] सर्वत्र, संहितायां काण्ड, प्रश्न, अनुवाक, मन्त्र संख्या निर्दिश्यते ; ब्राह्मणे अष्टक, प्रश्न, अनुवाक, मन्त्र संख्या ; आरण्यके, प्रश्न, अनुवाक, मन्त्र संख्या; मन्त्रप्रश्ने, प्रश्न, खण्ड, मन्त्र संख्या च निर्दिश्यते ।

(११)* सं. ४–१–४–४, ५ – १ – ५ – ८ ऊर्ध्व ऊ षु णः ,

४–६–५ – १९ एतादृक्षास ऊ षु णः [आ.४-२०-२ ऊर्ध्व ऊ षु णः]

(१२) सं . ४ – १ – ११ - १३ महित्वनाऽऽनाकं

(१३) सं. ५ – १ – ८ - १ मेध्यं कृत्वाऽऽहरति

(१४) सं. ५ – ७ – १० - १ स दक्षिणाऽऽवर्तत

(१५) सं. ६ – १ – ११ - ६ वारुण्यर्चाऽऽसादयति

(१६) सं. ६ – ३ – ७ - १६ वशो कृत्वाऽऽलभते

(१७) सं. ७ – १ – ५ – १ तां वराहो भूत्वाऽऽहरत्

(१८) सं. ७ – १ – ७ - ७ एका मा भूताऽऽविश

(१९) सं. ७ – १ – ७ - ९ सुशेवा भूताऽऽविशति

(२०) सं. ७ – ५ – ८ - १७ आसन्दीमुद्गाताऽऽरोहति

एते आ इत्युपसर्गमध्यस्थाः त्रिक्रमाः ॥ पुनरावृत्या चतुर्विंशतिः त्रिक्रमाः ॥

* षु इति पदं नः इत्युत्तरं सत् अधः पूर्वपदेन सह इत्येतत्पदत्रयस्यापि क्रमः स्यात् यथा ऊ षु णः, मो षू णः ॥

## उपसर्गाः नवदश (१९)

**प्रोपावापर्यधि व्युत्सुन्यन्वपाप्यत्यभि प्रति ।**

**परा निः सं नवदशाप्युपसर्गाः स्युरत्र हि ।४३, ४४ ॥**

प्र, उप, अव, आ, परि, अधि, वि, उत्, सु, नि, अनु, अप, अपि,अति, अभि, प्रति, परा, निः, सं एते नवदश शब्दाः उपसर्गाः स्युः ॥

["उपसर्गाश्चाभिवर्जं" अभिव्यतिरिक्ताःउपसर्गाश्चाद्युदात्ताः (सायण भाष्ये सं.१-१-१ अन्ते)]

[उपसर्गाः उदात्ताः अथ वा आद्युदात्ताः, अभि इति अन्तोदात्तः । पदैकदेशाश्चेत् अनुदात्ताः ॥]

## केवलानुस्वारः

**ज्ञघ्नोत्तरो मकारश्चेदनुस्वारोऽत्र केवलः ।**

**द्विमात्र इति विज्ञेयो ह्यन्यधर्मविवर्जितः ॥ १६६, १६७ ॥**

पदान्तो मकारोऽनुस्वार इति विज्ञेयः, ज्ञ इति वा घ्न इति वा शब्दपरश्चेत् स चानुस्वारः केवलः स्यात् । अथो सं (२) ज्ञानं एव (सं.५-२-३-६), [इमं (२) घ्नन्ति (सं.२-४-१-१)], अनुस्तरणीं (२) घ्नन्ति (सं. ६-६-७-१)।

**जिह्वामूलीयमाप्नोति उपध्मानीयमेव च ।**

**कखे पफे परे न क्षे अवर्णाद्यत्वमच् परे ॥ २१७, २१८ ॥**

अः इति हृदयस्थितवायुना कण्ठे उच्चरितो वर्णः विसर्जनीय संज्ञः स्यात् , विसर्ग इति च । कश्च खश्च कखमिति द्वन्द्वैकवद्भावः । तस्मिन् परे सति विसर्जनीयो जिह्वामूलीयं प्रतिपद्यते । जिह्वामूलेन उच्चारणीयो विसर्गो जिह्वामूलीयः स्यादित्यर्थः । यथा – य ॒॒कामयेत (सं. २-१-२-५) , बाहुमात्रा ॒॒खायन्ते (सं.६-२-११-४)। पश्च फश्च पफमिति पूर्ववत्समासः। तस्मिन् परे सति विसर्गः उपध्मानीयमापद्यते । उपध्मानेन ऊर्ध्वोष्ठसमीपे अधरोष्ठेनोच्चारणीयो विसर्ग उपध्मानीय इति । यथा – य ॒॒ पाप्मना(२-१-४-१२), याः॒ फलिनीः (सं.४-२-६-१५)। ...... न क्ष इति । क्षकारे परे सति विसर्गः पूर्वविधिं जिह्वामूलीयं नाप्नोति । यथा – देवैः क्षत्रस्य (सं. १-८-१६ -३), द्यौः क्षामा रेरिहत् (सं. १-३-१४-५ ), अष्टुः क्षीयते (सं.३-१-७-१), महद्भ्यः क्षुल्लकेभ्यश्च (सं. ४-५-४-७), आ वः क्षेमे (सं. ३-४-१०-२) ,......

## स्वरधर्मस्वरूप प्रकरणम्

**वर्णानां कारणं वेद उदात्तादिस्वरास्ततः ।**

**तेषां तत्स्वरसन्धेश्च लक्षणं कथ्यतेऽधुना ॥ २८६, २८७ ॥**

...... वेदे वर्णानामकारादीनां उदात्त आदिर्येषान्त उदात्तादयः, ते च ते स्वराश्च उदात्तानुदात्तस्वरितप्रचया इति स्वरधर्मचतुष्टयं कारणं भवति । तस्मादेषां अध्येतृणां स्वरधर्मस्वरूपज्ञानसिद्धये तेषां स्वरधर्माणां तत्स्वरसन्धेश्च लक्षणं प्रोच्यते ॥

**उदात्तोच्चारणे तस्य देहदैर्घ्यं भवेद्यतः ॥ २८८ ॥**

यस्मात्कारणात्तस्य अध्येतुर्देहस्य दैर्घ्यं दीर्घत्वं भवेत् उदात्तस्य उच्चारणे सति । यथा - गां वाव तौ तत् (सं.१-७-२-७) , वा एतौ (सं.२-२-६-३) ॥

**उच्चारणेऽनुदात्तस्य देहस्य ह्रस्वता भवेत् ॥ २८९ ॥**

अध्येतृदेहस्य ह्रस्वत्वं स्वाभाविक परिमाणादल्पत्वं भवेत् अनुदात्तस्य उच्चारणे सति । यथा – विप्रा अमृता ऋतज्ञाः (सं. १-७-८-९), इषे त्वोर्जे त्वा (सं.१-१-१-१) ॥

**भवेत्तत्र समाहारः स्वरितश्चोच्चनीचयोः ॥ २९० ॥**

तत्रोदात्तानुदात्तयोः समाहारः समावेशः स्वरितो भवेत् । ..

**प्रचयश्च बुधैः प्रोक्त उदात्तश्रुतिरित्यपि ॥ २९१ ॥**

प्रचयश्चतुर्थस्वरः उदात्तसमानश्रुतिरिति स्वरविचक्षणैः कथितः । यथा - आप्यायध्वमघ्नियाः(सं.१-१-१-५) ॥

**स्वारश्शीर्षे मुखेऽप्युच्चप्रचयौ निहतो हृदि ॥ २९२ ॥**

स्वारः स्वरितः शीर्षे शिरसि उद्भवतीति विज्ञेयः । यथा - योऽस्य स्वोऽग्निः (सं.५-७-९-३) । मुख इति मुखे आस्ये उदात्तप्रचयौ जायेते । यथा – आपो वै (सं २-६-४-१५), हिरण्यं ददाति (सं.२-४-११-१६) । हृदि हृदये निहतः अनुदात्तः जायते । यथा - प्रजवं वा एतेन यन्ति (सं ७-३-१-१) ॥

**नीचोच्चस्वारप्रचयाः क्रमाज्ज्ञेयाः प्रजापतौ ॥ २९३ ॥**

प्रजापतौ प्रजापतिशब्दे अक्षरचतुष्टये यथाक्रमं अनुदात्तोदात्तस्वरितप्रचया ज्ञातव्याः । यथा - प्र इत्यनुदात्तः, जा इत्युदात्तः, प इति स्वरितः, तिः इति प्रचयः ।....

## स्वर सन्धि प्रकरणम्

**मध्यस्थ एकनीचोऽतिप्रयत्नो विक्रमो भवेत् ॥ २९४ ॥**

यत्रोदात्तयोः, स्वरितयोः, उदात्तस्वरितयोः, स्वरितोदात्तयोः, प्रचयोदात्तयोः, प्रचयस्वरितयोर्वा मध्यस्थो यः एकनीचः एकानुदात्तः स विक्रमसंज्ञो भवति अस्यातिप्रयत्नः दृढप्रयत्नः क्रियते तस्मादस्य संज्ञान्तरं उपयुज्यते यथा – वोढवे (सं.१-६-२-४), योऽस्य स्वोऽग्निः(सं.५-७-९-३), तस्य क्वं, धन्वना गाः (सं.४-६-६-२) , अनात्तस्यापयिता (सं.७-१-५-१०), उपरिष्टाल्लक्ष्मा याज्या (सं.२-६-२-९) । ...

**उच्चसन्धिर्भवेदुच्चः स्वरितः स्वारनीचयोः ॥ २९५ ॥**

उदात्तसन्धेः पूर्वतः परतः उभयतो वा विद्यमानस्स्वर उदात्तश्चेत् तयोरचोर्योगे सन्धीयमाने सति तस्य संमिश्रस्याक्षरद्वयस्यैक एवोदात्तधर्मस्स्यात् । सवर्णदीर्घं आरभ्य सर्वस्मिन्नेकीभावे क्रमात् उदात्त – अनुदात्त – स्वरित पूर्वे उभयोदात्ते च, उदाहरणानि दर्शयिष्यामः – यथा –

| | |
|---|---|
| प्राऽर्पयतु (सं.१-१-१-३) | प्र+अर्पयतु – उदात्तः+अनुदात्तः = उदात्तः |
| ब्रह्म यच्छाऽपाऽग्ने (सं.१-१-७-१) | यच्छ+अप – अनुदात्तः+उदात्तः = उदात्तः |
| याज्यैवैनं (सं.२-३-५-४) | याज्या + आ + एव - स्वरितः + उदात्तः = उदात्तः, उदात्तः + अनुदात्तः = उदात्तः |
| यो मा प्राऽवोचः (सं.२-६-६-१) | प्र+ अवोचः - उदात्तः + उदात्तः = उदात्तः |
| तं पूषाऽऽधत्त (सं.१-५-१-३) | पूषा + आ - उदात्तः + उदात्तः = उदात्तः |
| दिवीव चक्षुः (सं.१-३-६-१३) | दिवि + इव - उदात्तः+अनुदात्तः= उदात्तः |
| अद्य वसु वसतीतीन्द्रो हि (सं.२-५-३-१३) | वसति + इति + इन्द्रः - अनुदात्तः + उदात्तः = उदात्तः , स्वरितः + उदात्तः = उदात्तः |
| मैत्रावरुणीत्याह (सं.२-६-७-११) | मैत्रावरुणी + इति - उदात्तः + उदात्तः = उदात्तः |

.....स्वरितः स्वारनीचयोरिति । स्वारनीचयोःस्वरितानुदात्तयोर्योगे तस्य संमिश्रस्य अक्षरद्वयस्य एक एव स्वरितधर्मः स्यात् । यथा – अथ क्वाऽस्य (सं.५-७-४-४) [क्व + अस्य ], कन्येव तुन्ना (सं.३-१-११-२९) [कन्या + इव],
छव्योपाकृताय स्वाहा (सं.५-७ -२०-११) [छव्या + उपाकृताय] , त्रिष्टुग् याज्यैषा वै (सं.२-६-२-१८) [याज्या + एषा ]।.....

## सप्तविधाः स्वरिताः

### (१) अभिनिहतः[2]

**नीचोर्ध्वाकारसंमिश्र उच्च एङ् स्वरितो भवेत् ॥ २९६ ॥**

**अत्राभिनिहतश्चायमिति संज्ञायते बुधैः ॥ २९७ ॥**

नीचेनानुदात्तेनोर्ध्वेन परेणाकारेण संमिश्र उच्च उदात्तः एङ् एकार ओकारो वा स्वरितमाप्नुयात् । असौ स्वरितः "अभिनिहत" इति बुधैः संज्ञायते । यथा – तेऽब्रुवन् (२-५-१-४) , सोऽब्रवीत् (२-४-१२-५)।.... [सोऽभवत्सोऽबिभेत् (सं. २-२-८-९)]

### (२) क्षैप्रः

**यवत्वे ह्युच्चयोर्यत्र इवर्णोकारयोरपि ॥ २९८ ॥**

**परतः स्वर्यते नीचः स्वरितः क्षैप्र उच्यते ॥ २९९ ॥**

उदात्तयोरिवर्णोकारयोः स्थाने यथासङ्ख्यं यकार वकारयोस्सतोः, तस्मात् यवकाररूपावधेः परतः अनुदात्तः स्वर्यते, सः क्षैप्र इति वेदितव्यः यथा – अभ्यस्थात्, दिक्ष्वृध्नुवन्ति (सं.३-५-१०-४) , ..... ।....

### (३) प्रश्लिष्टः

**उच्चोत्वान्नीच उत्वे स्यात् , प्रश्लिष्टः सन्धितो यमः ॥ ३०० ॥**

---

[2] अभिनिहित इत्यपि कथ्यते, ऋग्वेद प्रातिशाख्येऽपि अभिनिहित इति कथ्यते ।

उच्चश्च तद् उत्वञ्च उच्चोत्वम् । तस्मादुदात्ताद् उकारात् नीचेऽनुदात्ते उकारे परतः स्थिते सति उभयोस्सन्धिविधिना ऊकार भावो यमः स्वरितो भवेत् 'द्वियम एके द्वियमपरे'(प्राति. २-७-३) इति स्वरितस्य यमशब्दप्रयोगात् , सः प्रश्लिष्ट इति प्रत्येतव्यः । यथा – दिक्षूपदधाति (सं. ५-५-५-१४), मासूत्तिष्ठन् , ऊ तु तू तु , ऊ नु नू नु । [इतर प्रश्लिष्ट स्वरिताः – सून्नीयमिव (सं ६-२-४-१), सूद्गाता (सं.७-१-८-१), उपाꣳशूपसदा चराम (ब्रा.१-५-९-६) ]

### (४) नित्यः

**अखण्डे सयवो नित्यो नीचपूर्वः स्वयं च वा ॥ ३०१ ॥**

समानपदे वर्तमानः सयकारः सवकारः स्वरः नीचपूर्वः पूर्वाभावो वा प्रत्येकं यत्र स्थितः स्वर्यते स नित्यस्वरित इति विज्ञेयः । यथा – वायव्यम् (सं.२-१-१-१) , ततो बिल्वः (सं.२-१-८-३), न्यञ्चं चिनुयात् (सं.५-५-३-३), [क्वास्य(सं.५-७-४-४) ।.....[क्व जगती सं. ७-१-४-६]

### (५) तैरोव्यञ्जनः

**यस्समानपदे स्वारः तैरोव्यञ्जन उच्यते ॥ ३११ ॥**

अखण्डपदे यदि सोयमुच्चपूर्वः स्वरितः तैरोव्यञ्जन इत्यभिधीयते । यथा – स्वाहाशिताय , प्र उ गं (सं.४-४-२-२), ... स इन्द्रोऽमन्यत (सं.७-१-५-८)। [उदात्तपूर्वस्तैरोव्यञ्जनः – तं त्वष्टाऽऽधत्त (सं.१-५-१-३), मम नाम (सं.१-५-१०-१)]

### (६) पादवृत्तः , (७) प्रातिहतः

**पादवृत्तस्तयोर्व्यक्तावन्यः प्रातिहतः स्मृतः ॥ ३१२ ॥**

यस्तु स्वरितस्तयोः पदयोर्विवृत्तौ दृश्यते स पादवृत्तः स्यात् यथा – स इधानः (सं.४-४-४-१७), इत इतः (सं.६-५-८-६)...... ।

अन्य इति – एतदन्यस्वरितः प्रातिहतः स्यात् । यथा – प्राऽर्पयतु सं.१-१-१-४)..... [इषे त्वा (सं.१-१-१-१), मा ते अस्यां (सं.१-६-१२-१७)]

**कम्पाः**

**स्थितस्वारस्य चान्त्योऽणुर्नीचः स्यात्प्रवणोत्तरे ॥ ३०२ ॥**

स्थितस्वारस्य – अभिनिहतः, क्षैप्रः, प्रश्लिष्टः, नित्य इत्युक्तस्वरित चतुष्टयस्य अन्त्योऽम्शः अणुकालोऽनुदात्तः स्यात् प्रवणोत्तरे स्वरितपरे सति ।

**स्वरद्वयस्य चैकस्मिन् कंपसंज्ञास्ति दीर्घता ॥ ३०३ ॥**

एकस्मिन्नचि स्वरधर्मद्वये सति तस्य कम्पसंज्ञा स्यात् । तत्र नीचस्याणुत्वे सति द्रुतवृत्तित्वात् कंपवदुच्चारणे कम्पसंज्ञा स्यादिति केचित् । स कम्पस्वरो ह्रस्वश्चेत् तस्य दीर्घत्वं भवति । [पितृदेवत्या १ँ ह्येतत् (सं. ६-२-१०-९) & (सं.६-३-४-३ ), वीर्या १ म् व्यभजन्त(सं.६-६-८-१)]

**क्षैप्रकंपश्चतुर्धैवमादूदेदैद्भिरुच्यते ॥ ३०४ ॥**

आकारोकारेकारैकारैरिति चतुर्भिः क्षैप्रस्वरितस्य कम्प उच्यते । यथा – न्या १ न्येऽन्ये निन्यन्ये (सं.६-३-१-१६), अस्युर्व्यू १ र्व्यस्यस्युर्वी (सं.१-१-९-२४) [इति जटायां], विश्वानि ह्ये १ षोऽभि धामानि, एष्वे वैष्वे १ ष्वेव, अस्यैन्द्यै १ न्द्यस्यस्यैन्द्री (सं १-६-२-१३) [इति जटायां] ॥

**प्रश्लिष्टो नित्य ऊदाद्भ्यामेङाभिनिहतः स्मृतः ॥ ३०५ ॥**

प्रश्लिष्टकंपस्य ऊकारेण कथितः । यथा – उत्खिदत्युरू १ रूत्खिदत्युत्खिदत्युरु, उर्वन्तरिक्षमन्तरिक्षमुरू १ र्वन्तरिक्षम् (सं.१-१-२-१८) [इति जटायां] ॥

नित्यकंप आकारेण । यथा – पितृदेवत्या १ँ ह्येतत् (सं. ६-२-१०-९) & (सं.६-३-४-३ ), न्यङ्ङग्निरग्निर्न्या १ ङ् न्यङ्ङग्निः (सं.५-५-३-३), क्वं तर्हि तर्हि क्वा १क्व तर्हि (सं.६-६-७-९) [इति जटायां] । पृथक्करणान्नित्य एङाप्युच्यते । यथा – यद्ये १ऽयं यद्यद्ये (सं.१-८-३-४) [इति जटायां], बहुदेवत्यो १ ह्येषः (सं.२-१-६-१४) ॥

एङाभिनिहत इति। एङा एकारेण ओकारेण चाभिनिहत कम्प ईरितः।यथा – ते॑१ऽन्यो॑ऽन्यस्मै॑ (सं.६-२-२-१) , सो॑१ऽपो॑१ऽभ्यम्रियत (सं.६-१-१-२०, ६-४-२-६), अ॒र्के॑१ऽर्कौ॑१ऽर्कौ॑१ऽर्के॑ ऽर्कः (सं.५-२-५-१५) [इति जटायां] ।

**उच्चोर्ध्वौ यददीव्यादि त्रिके न कञ्चनेति च ॥ ३०६ ॥**

**उच्चकम्पौ स्थिते रूपौ स्वाराः कम्पाश्च सांहिताः ॥ ३०७ ॥**

यददीव्यं नृणं, आयुष्टे विश्वतः, वैश्वानरस्य प्रति इत्यनुवाकत्रये, न कञ्चन वसतौ इत्यनुवाके च । स्थित इति नित्यस्वरितश्च एङ् रूप इत्यभिनिहत स्वरितश्चेति तौ स्वरितौ उदात्तपरौ उदात्तकम्पौ स्तः । तद्वदत्रापि, अन्त्याणुर्नीच इत्युक्तः, अन्यथास्य वैय्यर्थात् । यथा – ते १ ऽस्मद्यक्ष्मं॑ (आ.२-४-१०), त॒न्वो १ यद्विलिष्टं (आ.२-४-१३), वी॒र्या १ म् बलम्॑ (आ.२-५ -१५ ), त॒न्वा १ स्वायां॑ (आ.२-६ -१०), अ॒हमन्ना॒दो १ ऽहमन्ना॒दो १ ऽहमन्ना॒दः(आ.९ -१० -९ ), इत्याद्युदात्तकम्पा आरण्ये प्रोक्ताः ।....

स्वारा इति । संहितायां स्वरितकंपा इति पूर्वमेवोक्तम् । एवं द्विविधाः कम्पा मन्तव्याः ॥

**उच्चादुत्तरतो नीचः स्वरितं प्रतिपद्यते ॥ ३०८ ॥**

उदात्तात्परोऽनुदात्तः स्वरितं भजेत् । यथा – मा ते॑ गृ॒ध्नुः(सं.४-६-९-९) , ता अ॑स्मात् (सं.२-१-२-१) , वाजो॑ नः(सं.४-७-१२-१) ॥

**स्वारोऽयं प्रचयश्चैव नोदात्तस्वरितोत्तरे ॥ ३०९ ॥**

अयं स्वरितः प्रचयश्च उदात्तपरे स्वरितपरे वा सति स्वरितप्रचयौ न स्यातां, किन्तु पूर्ववदनुदात्ताविति यावत् । यथा – इ॒षे त्वो॒र्जे त्वा॑ (सं.१-१-१-१), स इ॒मान् लो॒कान् (सं.२-४-१२-३), वा ए॒षो॑ऽस्मात् (सं.१-५-८-६) , अ॒स्मिन् लो॒के॑ऽस्मिन् (सं.१-५-६-३ ) । प्रातिहत – पादवृत्त - तैरोव्यञ्जन - विषयमेतत् ।... प्रचयप्राप्तौ यथा – भव॑न्त॒ आ , यो॑ऽस्य॒ स्वो॑ऽग्निः(सं.५-७-९-३) ।

**स्वारादुपरि नीचानां प्रचयः परिकीर्तितः ॥ ३१० ॥**

स्वारादिति जात्यपेक्षमेकवचनम् । अत्र सप्तस्वरितानां यस्मात् स्वरितादुत्तरतः अनुदात्तानां, अनुदात्तयोः, अनुदात्तस्य हि प्रचयस्स्यात् । यथा – अथ क्वा॒ऽस्य (सं.५-७-४-४) , सो॒ऽब्रवीत् (सं.२-४-१२-५) , अग्ने॑ दुध्र गह्य किꣳशिल वन्य (सं.५-५-९-२),.... ।

**दृढतरप्रयत्नःस्यान्नित्ये क्षैप्रे च वा दृढः ॥ ३१४ ॥**

नित्यस्वारे प्रयत्नो दृढतरस्स्यात् । यथा –वी॒र्य॑म् । क्षैप्रे प्रयत्नो दृढस्स्यात् । यथा – द्व्य॑न्नः (सं.४-१-९-११)।....

**प्रश्लिष्टे चाभिनिहते मृदुता स्वल्पतान्यतः ॥ ३१५ ॥**

प्रश्लिष्टेऽभिनिहते च प्रयत्नस्य मृदुत्वं स्यात् । यथा – सू॒न्नीयमिव (सं ६-२-४-१), सो॒ऽब्रवीत् (२-४-१२-५)। असंयोगपरे सति किञ्चित् दृढतरप्रयत्न इति चशब्दार्थः । दि॒क्ष्व॑प॒दधा॑ति (सं. ५-५-५-४), सो॑ऽभव॒त्(सं. २-२-८-९) ।

स्वल्पतेति । अन्यस्वारे प्रयत्नस्याल्पत्वं स्यात् । अन्यत इत्युक्तेः पारिशेष्यात् प्रातिहत पादवृत्त तैरोव्यन्जन संज्ञः स्वरित इत्यर्थः । यथा – ए॒वास्य॑ (सं.१-७-३-१४), स उ॑ (सं.४-३-३-१), वा आज्यम् ॥

**नादानुस्वारयोः पूर्वस्स्वारभागुच्चवत्स्थितः ॥ ३१६ ॥**

**स्वर्येतेऽस्मात्परावेव नादानुस्वारकावपि ॥ ३१७ ॥**

नादः अवसाने उत्तमः अनुस्वारश्च नादानुस्वारौ तयोः पूर्वस्स्वरितभाग् अच् उदात्तवत्स्थितः । अस्मादचः स्वरात्परौ नादानुस्वारकावेव स्वर्येते । यथा – अश्म॒न्नूर्ज॑ (सं.४-६-१-१) , वा॒य॒व्य॑ꣳश्वे॒तं (सं.२-१-१-१), मर्त्या॑ꣳ आवि॒वेश॑ (सं.५-७-९-२):, हि॒ꣳसि॒ष॒मु॒रू॑रु हिꣳसिषꣳहिꣳसिषमुरु (सं.१-१-४-७), अ॒ꣳहो॒मुच॑ं वृष॒भं वृष॒भमꣳहो॒मुच॑मꣳहो॒मुच॑ं वृष॒भम् (सं.१-६-१२-११)॥

**भक्तिस्वारात्तदङ्गानज् धृतवद्दपरे च रः ॥ ३१८ ॥**

स्वरितात्परतः स्वरभक्तिश्च स्वारभाक् पूर्वस्वारस्याङ्गं व्यञ्जनञ्च प्रचयवदुच्यते ...मैत्रावरुणायर् षभं (सं.१-८-१८-१२)....

ऋकारे परे सति रेफश्च धृतवत्स्यात् । यथा – पुनर् ऋतुनाह (सं ६-५-३-५) , तन्नैर् ऋतं (सं.१-८-१-२), ऋषेर् ऋषेवै (सं.२-५-७-१५), नि र् ऋत्यै (सं.६-२-६-२३)

**आयपूर्वेऽथ चोच्चः स्याद्भक्तेर्नीचो ड धू अधः ॥ ३१९ ॥**

आयशब्दपूर्वे सति स्वरभक्तेरुच्चस्स्यात् । यथा – विधायर् षिः (आ.७-७-३), इन्द्रियायर् षिभ्यः । डपूर्वे धपूर्वे वा सति भक्तेः नीचस्स्यात् । यथा –अरुणाः काण्ड र् षयः (आ.१-३२-३), ऋतस्य धूर् षदं ॥

**स्वारश्चारण्यके भक्तेरत्र शीर्षे स्त्रपूर्वके ॥ ३२० ॥**

आरण्यके 'शीर् षं' इत्यत्र भक्तेः स्वरितः स्यात् स्त्रपूर्वके सति । यथा – सहस्त्र शीर् षं देवं ॥

**स्वर्यते चादितो ह्रस्वो दीर्घमध्यं तथैव च ॥ ३२१ ॥**

ह्रस्वो वर्णः आदितश्च स्वर्यते । यथा – न रिष्येत् ।

दीर्घमध्यमिति । दीर्घस्य मध्यं स्वर्यते । यथा – लोकास्त्र्यालिखितेभ्यः (सम५-२-७-१३) , ..... सोऽभवत्सोऽबिभेत् (सं. २-२-८-९)......।

**सम्युतोर्ध्वे तु दीर्घश्चेत् अन्त्यस्वारो भवेत्तदा ॥ ३२२ ॥**

**ऋकारोत्तर रेफोर्ध्वेऽवसाने दीर्घ एव च ॥ ३२३ ॥**

सम्युतश्चावसावूर्ध्वश्च सम्युतोर्ध्वः तस्मिन् संयोगपरे रेफपरे वा सति तस्मिन् रेफे ऋकारपरे यदि , तर्हि अन्त्यः स्वरितः स्यात् । अवसानवर्ती दीर्घश्च । यथा – वा आह्रियमाणायां , सून्नीयमिव (सं ६-२-४-१), तत्सवितुर्वरेण्यं (सं.१-५-६-१२) ,...। यथ्सं ज्ञपयन्ति इत्यादौ केवलानुस्वारस्यापि अन्त्यस्वरितः स्यात् दीर्घकालत्वात् ।

**शात्तैत्तिरीयके शस्य ञो भवेत्काठके न चेत् ॥ ३५० ॥**

यजुश्शाखिनः पक्षे काठकव्यतिरिक्तस्थले शकारात्परस्य नकारस्य ञकारादेशः स्यात् । यथा – ...यत्रा॑श्ञी॒यात् ... ।[ब्रा.१-३-१०-१४ यद॑श्ञी॒यात्]

## कालनिर्णयप्रकरणम्

**चाषोक्त एकमात्रस्स्याद्वायसेन द्विमात्रिकः ॥ ४४१ ॥**
**मयूरेण त्रिमात्रश्च जानीयात्काललक्षणम् ॥ ४४२ ॥**

चाषो वन्यः काकः । तेनोक्तशब्द एकमात्रः स्यात् । वायसेन ग्राम्येण काकेनोक्तो द्विमात्रः, मयूरेण शिखिनोक्तश्शब्दः त्रिमात्रः । एतत्क्रमान्मात्रादिकालनिर्णयः प्रत्येतव्यः ।

**कालोऽतिसूक्ष्मकोऽणुस्स्यात्, मात्रार्धं व्यक्तमात्रिकम् ॥ ४४३ ॥**

अल्पतरो विदिताविदितयोर्मध्यमप्रकारः कालोऽणुः पादः मात्रा पादमात्रः चतुर्थभागः स्यात् । यथा – यस्ते - अत्र सकारस्याणुः । व्यक्तमात्रः कालो नकुलशब्दसमोऽर्धमात्रः स्यात्, यथा ग्राव्णः – अत्र वकारस्य अर्धमात्राकालः ।

**अङ्गुलिस्फोटनं यावान् तावान्कालस्तु मात्रिकः ॥ ४४४ ॥**

यावानङ्गुलिस्फोटनकालो निमेषकालस्तावान् मात्राकाल इति विज्ञेयम् ।

## पञ्च विवृत्तयः

**पिपीलिका दीर्घसमे च मध्यमा सवर्णता पाकवती पदैक्ये ॥ ४५१ ॥**
**दृष्टाऽचि वत्सानुसृतिस्त्वसाम्येऽप्यधोऽणुमुख्यास्तु विरामकालाः ॥४५२॥**

(१) पिपीलिका (अणु मात्र विरामः)

दीर्घयोस्समः दीर्घसमम् । सवर्णदीर्घावित्यर्थः । तत्र दृष्टा अच्परा विवृत्तिः पिपीलिका संज्ञा स्यात् । अस्याः पूर्वो विरामोऽणुःस्यात् । यथा – वा आ॒॑ह्रि॒यमा॑णायां (सं.३-१-५-७) , अ॒मुष्मा॑ आह॒वनी॑यः , .. ते ए॑नम॒भि,.. अथो॒ ओष॑धीषु ।

### (२) मध्यमा (अर्धमात्र विरामः)

द्वयोरचोः सवर्णत्वञ्चेत् तत्र व्यक्तिर्मध्यमा स्यात् । अस्याः पूर्वो विरामः अर्धमात्रः स्यात् । यथा – परियात अम्यो , य आत्मानं , यो वा अपात्मानं , अस्तुही ३ इत्यब्रूतां , चक्षुषी इति , बाहू उपस्तुत्यं ।

### (३) पाकवती (पादोनमात्र विरामः)

पदैक्ये एकोच्चारण पदे असवर्णा व्यक्तिः पाकवती स्यात् । अस्याः पूर्वो विरामः पादोनमात्रस्स्यात् । यथा – प्र उं गं , उक्थ उक्थे (सं.१-४-४६-४ , पुर एता । एकोच्चारणपद इति किम् ? प्रजा इति प्र ० जाः(सं.२-१-१-१) , सु श्लोकाँ ४ इति सु ० श्लोकाँ ४ (सं.१-८-१६-१८), देवा इति देवाः इत्यादावपि पाकवती संज्ञा प्रापणार्थमिति ।

### (४) वत्सानुसृतिः (मात्रिक विरामः)

उभयोरसवर्णत्वे सति सवर्णदीर्घाभ्यामितरा व्यक्तिः वत्सानुसृतिरित्यभि-धीयते । अस्याः पूर्वो विरामो मात्रिकस्स्यात् । यथा – लोक इन्द्रः , त एनं भिषज्यन्ति । 'व्यक्तिरजेव ह्रस्वा चेत्तथा वत्सानुसारिणी' इति केचित् । ...

### (५) वैशेषिका (सपादमात्र विरामः)

**स्वरोदये त्वनुस्वारो भवेदध्यणुमात्रिकः ॥४५३॥**

**विरामश्च तयोर्मध्ये वैशेषिका विदीर्घयोः ॥४५४॥**

स्वारपरोऽनुस्वारोऽधिकोऽणुर्यस्य सोऽध्यणुः, स चासौ मात्रिकश्च अधिकपादमात्रः सपादमात्रस्स्यात् । यथा – स्वाँ अहम् ।

तयोरनुस्वार परस्वरयोर्मध्ये विरामश्च पारिशेष्यात् तयोरसमानदीर्घयोर्मध्ये विरामश्च सपादमात्रस्स्यात् । उभयत्र दृष्टा व्यक्तिः वैशेषिक संज्ञा स्यात् । यथा – विद्वाꣳऋतून्, रुग्वा एकविꣳशः, वा ऐन्द्रवायवः, द्यावापृथिवी आण्डौ (सं.७-५-२५-२) , ये अस्मे अस्मे, मो एषाम् (सं.४-५-१०-१) ,.... ।

[मञ्जरीकारः "तदयमर्थः" इत्यादिना विषयदार्ढ्याय शिक्षाश्लोकानुदाजहार -

द्वयोरचोरसन्धिस्तु विवृत्तिरिति कथ्यते । पञ्चधा भिद्यते सा च नामतश्च विरामतः ॥
समयोर्दीर्घयोर्मध्ये पादमात्रा पिपीलिका। सवर्णद्वयमध्यस्था मध्यमा त्वर्धमात्रिका ॥
असवर्णपरा या सा पदैक्ये पाकवत्यपि। पादोना स्यादसाम्ये तु वत्सानुसृतिरित्यपि ॥
तत्कालस्त्वेकमात्रस्स्यादथ वैशेषिकोच्यते। विदीर्घयोरनुस्वारस्वरयोर्मध्यगा च या ॥
वैशेषिका सा विज्ञेया भवेदध्यणुमात्रिका ॥ इति ॥]

**काण्डप्रश्नानुवाकान्ते दशाष्टपञ्चमात्रिकाः ॥४७१॥**

काण्डादीनां समाप्तौ विरामकालाः क्रमात् दशादिमात्रा भवेयुः । ... [काण्ड समाप्तौ दशमात्राकालविरामः, प्रश्नसमाप्तौ अष्ट, अनुवाकसमाप्तौ पञ्च इति क्रमः]

**सुव्यक्तस्सुस्वरो धैर्यं तच्चित्तत्वं चतुर्गुणाः ॥५०३॥**
**एतद्युक्तः पठेद्वेदं स वेदफलमश्नुते ॥५०४॥**

वर्णः सुव्यक्तः स्थान करणादिनियमेन सम्यगुच्चरितः , सुस्वरः उदात्तादिस्वराणां नासादिदोषराहित्यं , धैर्यं अव्यग्रता, तच्चित्तत्वं तद्वेदे लीनत्वं इत्यध्येतुः चत्वारो गुणा विहिताः । एवंविधः पुरुषो वेदफलमश्नुते ।....

**अध्यायस्य मुखे चान्ते भूत्वा विद्वानतन्द्रितः ॥५०५॥**
**संरक्षणाय वेदानां ओङ्कारं तूच्चरेत्सदा ॥५०६॥**

वेदस्योपक्रमावसानयोः गायत्र्यादीनाञ्च रक्षायै अप्रमत्तस्सन् प्रणवमुच्चरेत् सम्यक् पठेदित्यर्थः ।....

**ध्वनिः स्थानं च करणं प्रयत्नः कालता स्वरः ॥५११॥**
**देवता जातिरेतैश्च वर्णा ज्ञेया विचक्षणैः ॥५१२॥**
**श्रीमत्परब्रह्मसुपूर्णचित्त - श्रीव्यासकण्ठप्रसृताञ्च शिक्षाम् ॥**
**एतामभिज्ञः प्रयतः पठेद्यः सर्वानभीष्टांश्च समश्नुते वै ॥५२५॥**

**इति व्यासशिक्षायाः, वेदतैजस व्याख्यायाश्च उद्धृताः केचन विषयाः समाप्ताः ॥**

# उदात्तादि स्वर नियमः – टिप्पणी

साधारणतः एकस्मिन् पदे एक उदात्तस्वरः भवेत् , अथवा केवलं स्वरितः, केवलं अनुदात्तः, अनुदात्त स्वरितौ (वीर्यं॑), सर्वानुदात्तो वा । केषुचित् तत्पुरुष समास पदेषु (शचीपतिः इत्यादिषु ), द्वन्द्व समास पदेषु च द्वौ उदात्तौ भवतः ।

संबोधन पदानि प्रायशः आद्युदात्तानि अथवा सर्वानुदात्तानि भवन्ति ।

## उदात्तद्वययुक्त -देवताद्वन्द्व पदानि – उदाहरणानि

| | | | |
|---|---|---|---|
| सं.१-१-३-४ | द्यावापृथिवीभ्यां॑ | सं.१-१-४-१० | अग्नीषोमा॑भ्यां # |
| सं.१-१-११-१२ | मित्रावरुणौ | सं.१-८-७-१ | शुनासीराय |
| सं.४ -१-८-७ | उषासानक्ता॑ | सं.४-१-१०-१३ | नक्तोषासा॑ नक्तं चोषाश्च नक्तोषासा रात्रिदिवसावित्यर्थः |
| सं.५-७-१५-३ | इन्द्राबृहस्पती॑ (त्रयः उदात्ताः ) | सं.५-७-१५-४ | इन्द्राविष्णू॑ |
| सं.६-४-१० | शण्डामर्कौ॑ | सं ६-४-१० | शुक्रामन्थिनौ॑ |
| सं.६-६-३-१३ | अग्नीवरुणौ | सं ६-६-८-९ | बम्बाविश्ववयसौ |

# अग्नीषोमाभ्यामित्यग्निशब्दस्य अन्तोदात्तत्वात् सोमशब्दस्य च आद्युदात्तत्वात् समासे देवताद्वन्द्वे चेति युगपदुभयोः प्रकृतिस्वरत्वम् ।

## उदात्तद्वययुक्त - इतरपदानि – उदाहरणानि

| | | | |
|---|---|---|---|
| सं.१-२-१०-१३ | तनूनप्त्रे॑ | सं.१-६-२-४ | वोढवे |
| सं.१-७-४-१ | नराशꣳसेन | सं.१-८-१०-१ | वनस्पतये |
| सं.२-१-५-८ | वाव | सं.२-५-६-२ | अङ्गापरूꣳषि |
| सं.२-५-९-६ | आस्पात्रं॑ (लोहपात्रवत् ) | सं.२-६-१-१ | तनूनपातं |
| सं.३-१-९-७ | नाभानेदिष्ठं | सं.४-४-८-३ | शचीपतिः |

## उदात्तान्तानि देवताद्वन्द्वपदानि – उदाहरणानि

| | |
|---|---|
| सं.१-१-७-१२ इन्द्रवायू | सं.१-१-१३-२ इन्द्राग्नी |
| सं.१-८-८-२ ऐन्द्रावैष्णवं | सं.१-८-८-२ ऐन्द्रापौष्णं |
| सं.१-८-९-३ मैत्राबार्हस्पत्यं | सं.२-३-२-१३ सोमेन्द्रं |
| सं.२-४-१३-२ ऐन्द्राबार्हस्पत्यं | सं.४-६-८-२ इन्द्रापूष्णोः |
| सं.७-५-२२-४ वायोसावित्रः | ब्रा.३-८-२३ ऐन्द्रापौष्णं |

## सम्बोधनान्तानि देवताद्वन्द्व पदानि – उदाहरणानि

| | |
|---|---|
| सं.१-१-१२-४ अग्नाविष्णू | सं.१-१-१४-१ इन्द्राग्नी |
| सं.१-४-४-२ इन्द्रवायू | सं.१-४-५-१ मित्रावरुणा |
| सं.१-४-१५-१ इन्द्राग्नी | सं.१-८-२२-१६ सोमारुद्रा |
| सं.१-८-२२-१८ सोमापूषणा | सं.२-१-११-६ इन्द्रापर्वता |
| सं.२-३-१४-७ अग्नीषोमौ | सं.२-३-१३-१ इन्द्रावरुणा |
| सं.३-२-११-४ इन्द्राविष्णू | ब्रा.२-८-४-१५ विष्णूवरुणा |
| आ.६-६-७ शुनासीरौ | |

## इतर - देवताद्वन्द्वपदानि – उदाहरणानि

| | |
|---|---|
| सं.१-७-६-१२ आग्निपावमानीभ्यां | सं.१-८-८-२ इन्द्रासोमीयं |
| सं.५-७-१९-५ सूर्याचन्द्रमसौ | |

॥ शुभमस्तु नित्यम् ॥

## ॥ सायणभाष्यात् सङ्कलिताः केचन विषयाः, व्याकरणादि विशेषाः, विशेषपदप्रयोगाश्च (उदाहरणानि) ॥

[**टिप्पणी** :- अत्र सायणभाष्यात् केचन विषयाः उदाहरणार्थं निर्दिष्टाः । एतदवलोक्य अध्येतॄणां समग्रवेदभाष्याऽमृताऽऽस्वादनार्थं इच्छा, सङ्कल्पश्च जायेतेति विश्वसिमि ।][1]

[**Note**: Here some extracts from the Saayanabhaashyam are given, with the fond hope that it will kindle the interest in the minds of the readers to go deep into the Veda bhaashyam and understand the full meaning and purport of the vedaas.]

[यत्र भट्टभास्करभाष्यात् उद्धृतं, तत्र 'भ.भा.' इति निर्दिश्यते ।]

| | |
|---|---|
| १ | **उपोद्घाते**<br>प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते ।<br>एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता ॥<br>.. ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येतव्यो ज्ञेयश्च ॥<br>.. यदेव विद्यया करोति तदेव वीर्यवत्तरं भवति ॥<br>.. य एवं वेद इति वचनानि वेदनादेव फलं ब्रुवते॥ |
| २ | विहितस्याननुष्ठानात् निन्दितस्य च सेवनात् ।<br>अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति ॥ |
| ३ | एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवति ॥(सं.१-१-१ अन्ते ) |
| ४ | वचनव्यत्ययः - सं. १-१-१ (ब्रा.३-२-१-७) वायुर्वा अन्तरिक्षस्याध्यक्षाः - अध्यक्षा इति वचनव्यत्ययः । [आ.४-११-१४ अग्निरध्यक्षाः] |
| ५ | **स्वरप्राधान्यम् – स्वरभेदे अर्थभेदः**<br>(१)आख्यायिका<br>मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।<br>स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥ |

[1] अत्र उद्धृताः विषयाः आनन्दाश्रममुद्रणालये १९४० खिस्ताब्दे मुद्रितात् तैत्तिरीयसंहिता - सायणभाष्यात् सङ्कलितम् । ब्राह्मण भागः १८९८ खिस्ताब्दे मुद्रितम् । आरण्यकभागस्तु १९२६, १९२७ खिस्ताब्दे मुद्रितम् । भाष्यव्यतिरिक्ताः केचन विषयाः [ ] एतच्चिह्नान्तर्निर्दिष्टाः ।

| | |
|---|---|
| | इन्द्रस्त्वष्टुः पुत्रं विश्वरूपाख्यं जघानेति त्वष्टा सोमयागे नेन्द्रमुपाह्वयत् । इन्द्रश्च यज्ञविघ्नं कृत्वा बलात्सोमं पीत्वा जगाम । अवशिष्टेन सोमरसेन, इन्द्रस्याभिचारं कर्तुं त्वष्टा “स्वाहेन्द्रशत्रुर्वर्धस्व” इत्यनेन मन्त्रेणाजुहोत् । तत्र शत्रुशब्दो घातकमाचष्टे । भो उत्पत्स्यमान पुरुष, इन्द्रस्य घातकः त्वं वर्धस्व इति विवक्षित्वा मन्त्रं उच्चारितवान् । तदानीं तत्पुरुषसमासत्वात् अन्तोदात्तेन भवितव्यम् । प्रमादात्तु अनेन आद्युदात्तो मन्त्रः प्रयुक्तः। स च स्वरो बहुव्रीहौ समासे लभ्यः । ततश्च इन्द्रः घातकः (शत्रुः) यस्य इत्यर्थे पर्यवसानात् इन्द्रेण वध्यो वृत्र उदपद्यत । (सं.१-१-१ अन्ते ) (सं २-४-१२, २-५-२ अपि पश्यत) ।<br>[This explains that in chanting vedaas, the ‘swaraas’ are most important. If a different swara is uttered, it will give an entirely different / opposite meaning and consequently an undesired result. Here, when Tvashtaa wanted to get a person **to kill** Indra, by uttering a different swara, he got a person **to be killed by** Indra.]<br>(२) सं.१-३-३-१६ पि॒पृ॒हि मा॒ मा मा॑ हिꣳसीः – मा॒ – अनुदात्तस्वरः – अस्मच्छब्द-द्वितीयैकवचनम्, मां इत्यर्थः । मा – उदात्तस्वरः – निषेधार्थः ।<br>(३) सं.१-३-६-११ ते ते॒ धामा॑नि - ते – उदात्तस्वरः – पुंल्लिङ्ग - तच्छब्द – प्रथमा-बहुवचनम् । ते॒ – अनुदात्तस्वरः – युष्मच्छब्द – चतुर्थ्येकवचनम् ।<br>(४) ब्रा.२-४-१-२० द्वावि॒मौ वातौ॑ वातः – वा॒त॒ः – सर्वानुदात्तः – क्रियापदं लट् प्रथमपुरुष – द्विवचनं – सञ्चरतः इत्यर्थः । ब्रा. २-४-१-२२ – वात॒ आवा॑तु – वात॑ः आद्युदात्तः - प्रथमैकवचनम् । |
| ६ | सं.१-१-४-५ (ब्रा.३-२-४-८) य॒था॒य॒जुरे॒वैतत् - मन्त्रपदैर्योऽर्थो यथा प्रतीयते स तथैव, न त्वत्र कश्चिद्विवक्षा विशेषोऽस्ति । |
| ७ | सं.१-१-५-२ यु॒ष्मानिन्द्रो॑ऽवृणीत – (ब्रा.३-२-५-७ इन्द्र॒ आपो॑ वव्रे - आपो वव्रे इति छान्दसो दीर्घः (अपो वव्रे) । |
| ८ | सं.१-१-५-१७ हिर॑ण्यपाणि॒ः प्रति॑गृह्णातु - हिरण्यं अङ्गुलीयकं पाणौ यस्यासौ हिरण्यपाणिः । |
| ९ | **मन्त्रसामर्थ्येन अभिवृद्धिः**<br>सं. १-१-६-६ धा॒न्य॑मसि धि॒नु॒हि दे॒वान् - |

| | |
|---|---|
| | आहुतीरूपस्य धान्यस्य अल्पत्वेऽपि **मन्त्रसामर्थ्येन** तदभिवृद्धेरित्याह - धान्यमसि धिनुहि देवानित्याह । एतस्य यजुषो वीर्येण । यावदेका देवता कामयते यावदेका । तावदाहुतिः प्रथते । न हि तदस्ति । यत्तावदेव स्यात् । यावज्जुहोति । (ब्रा.३-२-६-६ ) इति । .. ..<br>यदि द्रव्यं यावज्जुहोति तावदेव देवान्प्राप्नुयात्, तथा कथमिदमल्पं देवान्प्रीणयेदित्याशङ्क्येत, न तु तावदेवेति नियमोऽस्ति । किं तु यावत्काम्यते तावत्प्रवर्धते । [मन्त्रबलात् ] ततः संभवत्येव प्रीणनम् । |
| १० | **पर्यग्निकरणं**<br>सं.१-१-८-११ (ब्रा.३-२-८-१२ – पर्यग्निकरोति – दर्भैः दीप्तैः पुरोडाशस्य परितो रक्षसां संशोधनं पर्यग्निकरणम् । अनेन पर्यग्निकरणेन राक्षसजातिः व्यवहिता, शत्रवोऽपि व्यवहिताः । [ अग्निमुखप्रयोगे आज्यस्य पर्यग्निकरणं क्रियते ] |
| ११ | **योगक्षेमः**<br>सं.१-१-१०-७ अग्नेरनुव्रता भूत्वा सन्नह्ये सुकृताय कम् –<br>(ब्रा.३-३-३-४) पत्न्याः स्वातन्त्र्येण कर्माधिकाराभावात् पत्न्या सह तदधिकारे सति एतदेव योक्त्रं तस्या अनुव्रतस्वीकरणलिङ्गम् । यथा विवाहे स्त्रियाः कण्ठे मङ्गलसूत्रं लिङ्गं तद्वत् ।....<br>ब्रा.३-३-३-६ यद्योक्त्रम् । स योगः । यदास्ते । स क्षेमः । अप्राप्तस्य वस्तुनः प्राप्तिर्योगः, प्राप्तस्य रक्षणं क्षेमः। अतो योक्त्रबन्धनं उदङ्मुखासनं च उभयसिद्धये भवति ।...सौमनस्याद्याशिषः सर्वा अपि योक्त्रग्रन्थिना तस्यां परिगृहीता भवन्ति । यज्ञकर्तुरर्धस्वरूपभूता पत्नी ।.......[ब्रा.३-३-३-९ अथो अर्धो वा एष आत्मनः । यत्पत्नी ।]<br>सं.३-४-१०-२ आ वः क्षेमं उत योगे वरं नः,<br>सं.७-५-१८- योगक्षेमो नः कल्पताम् – अलब्धस्यापेक्षितस्य लाभो योगः, लब्धस्य सर्वार्थस्य परिपालनं क्षेमः । |
| १२ | **स्योना, सुषदा, सुशेवा**<br>सं.१-१-१०-९ स्योनं मे सह पत्या करोमि – पत्या सह मे सुखं करोमि।<br>सं.१-१-१३-१७ सुषदा योनिङ्ंस्वाहा – सुखोपवेशनेन निमित्तेन योनिं स्थानं कुरु ।<br>सं.१-४-४०-१ स्योनास्मै सुषदा भव – हे भूमे, अस्मा इन्द्राय स्योना सुखप्रदा, सुषदा शोभननिवासस्थाना च भव । |

| | |
|---|---|
| | सं.७-१-७-९ स्योनासि सुषदा सुशेवा - [स्योना – सुखप्रदा, सुषदा – सुखेन प्राप्तुं योग्या, सुशेवा – सुखेन सेवितुं शक्या ] |
| १३ | सं.१-१-१०-११ महीनां पयोऽसि - मही शब्दस्य गौरित्यर्थः ("प्रेयसि महि विश्रुति" सं.७-१-६-१८) |
| १४ | सं.१-१-१२ (अन्ते मीमांसायां)<br>मृगतृष्णांभसि स्नातः खपुष्प कृतशेखरः ।<br>एष वन्ध्यासुतो याति शशशृङ्गधनुर्धरः ॥ |
| १५ | सं.१-१-१३ (ब्रा.३-३-१०- ) अथो वाग्वा अनुष्टुक् –<br>सा च वाग्योषित्च्छन्दोरूपेण पुरुषेण सह मिथुनं संपद्यते ।.. एतस्मादेव यागानुष्ठानगतान्मिथुनादुत्पन्न आदित्यप्रेरितो मेघो वृष्टिद्वारेण प्रजोत्पत्तौ पर्यवस्यति । तथा च स्मर्यते -<br>अग्नौ प्रास्ताहुतिः सम्यगादित्यमुप जायते ।<br>आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥ |
| १६ | **रलयोरभेदः ।**<br>सं.१-१-१३-६ अक्त१ं रिहाणाः - [रिहाणाः लिहानाः आस्वादयन्तः ते वक्ष्यमाणा रश्मयः – लिह आस्वादने, वर्णव्यत्ययेन लकारस्य रेफः - भ.भा.]<br>सं.४-२-१०-३ सरिरस्य मध्ये [सलिलस्य]<br>ब्रा.२-१-२-१ रराटादुदमृष्ट [ललाटात् ]<br>ब्रा.३-६-६-१ वनिष्ठुमस्य मा राविष्ठ – मा राविष्ट लाविष्ट लूनं छिन्नं मा कुरुत।<br>ब्रा.३-६-६-१ उरूकं मन्यमानाः [उलूकम्] |
| १७. | **बहुवचने विशेषाः ।**<br>सं.१-१-१३-६ वियन्तु वयः [वय इति वेः बहुवचनम् इति यास्क; .. वयः प्रजनिष्णवः आदित्यरश्मयः एतल्लेहनेन वियन्तु वृद्ध्यर्थं गर्भं धारयन्तु वी गतिप्रजननकान्त्यसनखादनेषु – भ.भा.]<br>ब्रा.२-२-५-५ वय एवैनं कृत्वा – पक्षिवदुत्पन्नसामर्थ्यमेनं यजमानं कृत्वा ।<br>ब्रा.२-५-८-७ वयः सुपर्णाः [ वयः 'वि' शब्दस्य बहुवचनम् – पक्षिमूर्तिधारिणः]<br>सं.१-५-६-११ रायश्श्रयन्तां – रायः बहुवचनं – धनानि |
| १८ | **"पितु" शब्दः अन्नवाची**<br>सं.१-१-१३-१७ अग्नेऽदब्धायोऽशीततनो ...अविषं नः पितुं कृणु - पितुं अन्नं |

| | |
|---|---|
| | अविषं अमृतं कुरु ।<br>ब्रा.१-२-१-६६ अथर्व पितुं मे गोपाय - अन्नं, रसः क्षीरादि । |
| १९ | सं.१-१-१३-१८ देवा गातुविदः - गातुविदः मार्गविदो देवाः |
| २० | **पूः, पुरः (बहुवचनम्), नरः(बहुवचनम्)**<br>सं.१-१-१४-१२ पूश्च पृथ्वी - [पूः इति पूर् शब्दस्य एकवचनम्]<br>ब्रा.१-७-७-१२ देवानां पूः [पूः एकवचनम् ।]<br>आ.१-२७-८,१० देवानां पूरयोध्या, पुरꣳ हिरण्मयीं ब्रह्मा [पूः एकवचनम्) ।]<br>सं.१-२-११-४ (सं.६-२-३-१) तिस्रः पुर आसन् - पुरो दुर्गरूपाः - बहुवचनम् ।<br>ब्रा.२-८-४-१२ पुरोऽभेत् [पुरः शत्रूणां पुराणि - बहुवचनम् ।]<br>आ.४-७-१८ शतं पूर्भिर्यविष्ठ [पूर्भिःबहुवचनम् ।]<br>ब्रा.२-४-३-१ जुष्टी नरः - नरः मत्पुत्राः [संबोधन बहुवचनम् ]<br>ब्रा.३-७-१३-२ नरो यत्ते दुदुहुः - नरः पुरुषाः – [बहुवचनम्] |
| २१ | सं.१-१-१४ (व्याकरणान्ते) ता एता ऋषिश्छन्दो देवता अनुष्ठानकाले स्मरणीयाः । |
| २२ | सं.१-२-१-१ (ब्रा.६-१-१-३) नास्माल्लोकात्स्वेतव्यमिवेत्याहुः - इह लोके तावत्सुखं प्रत्यक्षसिद्धम् । गृहक्षेत्रपुत्रमित्रादिभिस्तदुत्पादात् । स्वर्गे तु संदिग्धम् । यद्यविघ्नेनेदं कर्म साङ्गं समाप्येत तदा सुखमस्ति नान्यथा । भवदपि तत्सुखं, नेदानीं भवति किंतु मरणादूर्ध्वम् । तदाऽपि प्रबलेन केनचिन्नरकप्रदेन कर्मणा प्रतिबन्धे सति ततोऽपि विलम्ब्येत । तस्मादिदानीमेव, अस्माल्लोकान्न सर्वात्मना निर्गन्तव्यमिति बुद्धिमन्त आहुः । तत एतल्लोकदर्शनाय द्वारेषु कृतेषु लोकद्वयजयो भवति । |
| २३ | सं.१-२-२-१ आकूत्यै प्रयुजे – यज्ञं करिष्यामीत्येवं विधो मानसः संकल्प आकूतिः । तत्संपूर्त्यर्थं अविघ्नेन मां प्रेरयते वह्नये हविरिदं हुतमस्तु । |
| २४ | सं.१-२-२-६ विश्वे देवस्य नेतुः –तमिममौद्ग्रहणहोमं विधास्यन् आख्यायिकया पदं निर्वक्ति – प्रजापतिर्यज्ञमसृजत (सं.६-१-२-१२) – पलायमानं यज्ञपुरुषं ग्रहीतुं प्रजापतिना प्रेरितानां त्रिविधमन्त्रपुरुषाणां मध्ये यजुःसामपुरुषौ स यज्ञः प्रकर्षेणाह्लीनात् आवृणोत् । ऋग्देवता तु तं यज्ञं उदगृह्णात्, तस्मादेतदृक्साध्य-मनुष्ठानमौद्ग्रहणम् ।...<br>ब्रा.६-१-२-१७ विश्वे देवस्य नेतुरित्याह – प्रथमपादे सवितृपर्यायस्य नेतृशब्दस्य प्रयोगेण सावित्रत्वम् । द्वितीय पादे मर्तशब्देन मृतपितृसूचनात् पितृ- |

| | |
|---|---|
| | देवत्यत्वम् । तृतीयपादे विश्व शब्दस्य प्रयोगात् वैश्वदेवत्वम् । चतुर्थपादे पुष्यस इत्युक्तत्वात्पौष्णत्वम्।<br>ब्रा. ६-१-२-१९ सप्ताक्षरं प्रथमं पदं – प्रथमं पदं ऋचि प्रथमः पादः । द्वितीयादिषु त्रिषु पादेष्वस्ति प्रत्येकमक्षरगताष्टत्वसंख्या । द्वितीयपादे सखियमित्यक्षर-त्रयेणाष्टत्वं पूरणीयम् । प्रथमपादं द्वेधा विभज्य त्रीण्यक्षराणि तृतीयपादे, चत्वारि चतुर्थपादे गणनीयानि । तथा सति द्वितीयतृतीयचतुर्थपादा अक्षरसंख्याभिः गायत्र्यादिसमा इति च्छन्दस्त्रयसंपत्तिः । गायत्र्यादीनां त्रयाणां सवनत्रये प्राधान्यात्सर्वच्छन्दः संपत्तिः ।...... |
| २५ | **वृष्टिः, कृषिः, सस्यम्**<br>(१) सं.१-२-२-१३ कृष्यै त्वा सुसस्यायै (ब्रा.६-१-३-१६ – नीवारादयः अकृष्टपच्याः ओषधयः)<br>(२) सं.२-४-७,८,९,१० – कारीरीष्टिमन्त्राः, ब्राह्मणं च । कल्पः – कारीर्या वृष्टिकामो यजेत....। हे मरुतः, श्येनवत्प्रबलगतिपुरोवातं जनयत । मनोजवसं मनस इव जवः वेगः यस्य, तादृशं, वृषणं उदकस्य वर्षयितारं, सुवृक्तिं सुष्ठु पाश्चात्यवातस्य वर्जयितारम् .... उद्नो दत्त उदकानि प्रयच्छत .... उदधिं भिन्त उदकं धीयतेऽस्मिन्निति उदधिः मेघः, तं विदारय ... । .. समुद्रियं समुद्रसदृश-मेघसंबन्धि बलं वृष्ट्युत्पादन-सामर्थ्यमसि ।...<br>(३) सं.३-४-३-५ द्यावापृथिव्यामालभेत कृषमाणः प्रतिष्ठाकामो दिव एवास्मै पर्जन्यो वर्षति व्यस्यामोषधयो रोहन्ति समर्धुकमस्य सस्यं भवति – विविधं रोहन्ति उत्पद्यन्ते । अस्य यजमानस्य सस्यं समृद्धिशीलं भवति ।<br>(४) सं.४-७-५ कृष्टपच्यं च मेऽकृष्टपच्यं च मे<br>(५) सं.६-६-७-१० लाङ्गलेनोर्वरां प्रभिन्दन्ति – सर्वसस्योपेता भूमिरुर्वरा, तस्यां कृष्टायां कर्षणमनु तत्र मत्यं क्षिपन्ति । शक्त्याधान-साधनं मत्यं, मतं अभिमतं फलमर्हतीति मत्यम् । (manure)<br>(६) सं.७-१-११-३ कृष्यै त्वा क्षेमाय त्वा रय्यै त्वा – कृष्यै सर्वस्य निष्पत्तये बध्नामि, क्षेमः प्राप्तस्य धनस्य रक्षणं, रयिः प्रापणीयं धनम् ।<br>(७) सं.७-३-१२-७ अन्नं कृषिर्वृष्टिर्वषट् स्वाहा नमः<br>(८) सं.७-५-१८- निकामेनिकामे नः पर्जन्यो वर्षतु - नोऽस्माकं यदा यदाऽपेक्षा भवति, तदा तदा पर्जन्यो वर्षतु । ओषधयश्च बहुफलयुक्ताः पच्यन्ताम् । |

(९) ब्रा.१-७-१-२ वायुर्वै वृष्ट्यै॑ प्रदापयिता, सूर्येण वा अमुष्मिँल्लोके वृष्टिर्धृता - वायोः पुरोवातरूपेण वृष्टिप्रदापयितृत्वम् ।

(१०) ब्रा.३-१-२-९ कृषिर्वृष्टिर्यजमानाय कल्पताम् – संपद्यताम् ।

(११) आ.१-३-११ ह्लादयते॑ – अयं वर्षर्तुःसर्वान् प्राणिनो ह्लादयते सन्तोष्यते ।अहो सुवृष्टो देवः, संपत्स्यन्ते अस्माकं सस्यानीत्येवं सर्वस्य लोकस्य परितोषः । तस्मिन्नृतौ बीजवापमकृत्वा या भ्रश्यन्ते भ्रश्यन्ति ताः प्रजा न केवलं तस्मादृतोरेव भ्रष्टाः, किंतु कृत्स्नादपि संवत्सराद्भ्रष्टाः । आगामिवर्षपर्यन्तमन्नस्य दुर्लभत्वात् ।

(१२) आ.१-९-१५ वराहवः स्वतपसः - वराहव इत्यारभ्य गृहमेधा इत्यन्तैः षड्भिः पदैः पर्जन्यप्रवर्तका वायुविशेषाः उच्यन्ते । तेषां गणरूपत्वात्, एकैक-गणस्थान्बहून्विवक्षित्वा वराहव इत्यादि बहुवचननिर्देशः । वरं श्रेष्ठं वर्षमाह्वयतीति वराहः, वराहुः, ते च बहवः वराहवः । ये वायवः स्वतपसः स्वयमेव तपन्ति न तु तापार्थं, अग्निमादित्यं वाऽपेक्षन्ते । विद्युत्समानं महत्तेजो येषां ते विद्युन्महसः, धूपयः गुग्गुलदशाङ्गादिद्रव्यान्तरैरनपेक्षेण स्वशरीरगतसुगन्धेनैव सर्वान्पदार्थान्धूपयन्तः, वासितान्कुर्वन्तो वर्तन्ते । श्वापयः शुशब्द आशुशब्दपर्यायः, ततः शीघ्रव्यापिन इत्युक्तं भवति । गृहेषु मेधार्हाः गृहमेधाः । ..शिमिः कर्म कृष्यादिकं तस्य विघातकाः शिमिविद्विषः, तद्विपरीता अशिमिविद्विषः कृष्याद्यनुकूलप्रवृत्तयो वायवः इत्यर्थः ।

(१३) आ.१-९-१६ पर्जन्याः सप्त पृथिवीमभिवर्षन्ति । वृष्टिभिरिति । - पूर्वोक्तैः सप्तभिर्वायुगणैः प्रवर्तिताः सप्तविधा मेघाः, वृष्टिभिरस्माभिर्दृश्यमानाभिः पृथिवीमभिलक्ष्य वर्षन्ति । निराधारेऽन्तरिक्षे मेघान्संपाद्य बहुविधजलसंग्रहो योऽस्ति, यस्य देशविशेषस्य यावदपेक्षितं तत्र तावदेव वर्षणं यच्चास्ति स सर्वोऽपि, अचिन्त्यतस्तन्महिमेति दर्शयितुं, इति शब्दप्रयोगः । यया रीत्या भूमावभिवर्षणं, तयैव रीत्याऽमून्सर्वान् लोकान्पर्जन्या वर्षन्ति । इयांस्तु विशेषः यद्विभक्ति-वैपरीत्यम् । विशिष्टं भजनं विभक्तिः । भूमिं प्रति पर्जन्यानामधोमुखत्वम्, उपरितनान्ल्लोकान्प्रत्यभिवर्षणाय, ऊर्ध्वमुखत्वमिति वैपरीत्यम् ।..दृश्यते हि वायूनां सर्वतः प्रेरणसामर्थ्यम् ।..

(१४) आ.१-९-१७ समानमेतदुदकम् । - यदुदकं भूमौ वृष्टं यच्चोर्ध्वं लोकेषु तत्सर्वं समानं द्रवस्वभावमेव, तथाऽपि, अहभिः, कैश्चिदहोभिर्दिनैरुदेति चोर्ध्वमपि गच्छति, पुनरपि कैश्चिद्दिनैरवैति चाधोऽपि गच्छति । तत्राऽऽगतेनोदकेन पर्जन्या भूमिं जिन्वन्ति प्रीणयन्ति । यथाऽग्नय ऊर्ध्वज्वाला एवमूर्ध्वाभिमुखाः पर्जन्या ऊर्ध्वगतिसामान्याद्, अग्नय इत्युच्यन्ते । ते चोर्ध्वाभिवर्षणेन दिवं प्रीणयन्ति ।..

| | |
|---|---|
| | (१५) आ.१-२४ चतुष्टय्य आपो गृह्णाति – जलविशेषाः – (१) वर्ष्याः – आतपयुक्ते प्रदेशे वर्षेण संपन्ना या आपः, ताः पात्रेण केनचिद् गृह्णीयात् ..ता वर्ष्याः, प्रकाशोपेतत्वात् ब्रह्मवर्चसयोग्याः । (२) कूप्याः – कूपे भवाः, तासां बहुविधगृहकृत्योपयोगित्वेन तेजस्विनीत्वम् । (३) स्थावराः – नदीषु क्वचिदगाधो ह्रदो दृश्यते, तत्राऽऽपो न प्रवहन्ति किन्तु स्थिरावस्थितिशीलाः, प्रतिष्ठितत्वभावाः । (४) वहन्तीः - नद्यां प्रवहन्त्यः, एता आपो यदा धावन्ति तदानीमोजसा स्वकीयेन बलेन प्रवाह-मध्य-पतितान् , काष्ठादिपदार्थान्, वहन्तीरिव, आकर्षयन्तीरिव भवन्ति, उद्गतीरिव पाषाणादिषु लग्नाः स्वबिन्दुभिरूर्ध्वं गच्छन्त्य इव, आकूजतीरिव – तत्र तत्र निम्नोन्नतप्रदेशेषु संचारात् शब्दं कुर्वत्य इव भवन्ति, एतस्य ओज एव कारणं, तस्मादोजस्विन्यः। (५) संभार्याः – गृहे घटेषु संपादनीया आपः, संभार्याणां घटेष्ववस्थितत्वेन भूमिसदृशत्वादुपधानेन भूम्यामेव प्रतिष्ठितो भवति । (६) पल्वल्याः - यत्र कदाचिदपि जलशोषो नास्ति, तत्पल्वलं तत्रोत्पन्ना आपः, पल्वल्यानां कूपादिवत्, खननमन्तरेण भूमेरुपर्येव वर्तनात्, द्युलोके प्रतिष्ठितो भवति ।...<br>(१६) आ.१-२६-८ वृष्टिकामश्विन्वीत ..पर्जन्यो वर्षुको भवति<br>(१७) आ.१०-७९-१६ याभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति पर्जन्येनौषधिवनस्पतयः प्रजायन्त ओषधिवनस्पतिभिरन्नं भवति .. |
| २६ | सं.१-२-३-८ चन्द्रमसि मम भोगाय भव – चन्द्रं हिरण्यम् ।<br>ब्रा.१-७-६-६ चन्द्रꣳ हिरण्यम् । |
| २७ | **गायत्रीमहिमा**<br>(१) सं.१-२-४ (आरम्भे) (ब्रा.६-१-६-१ – कद्रूश्च वै सुपर्णी चात्मरूपयोरस्पर्धेतां –<br>[कद्रू – सुपर्णी आख्यानं, सुपर्ण्याः पराजयः, तां विमोक्तुं सोम आहर्तव्य इति कद्र्वाः आदेशः । गायत्र्यादि च्छन्दांसि सुपर्ण्याः अपत्याः सौपर्णेयाः, जगती चतुर्दशाक्षरा सती द्युलोकं गत्वा स्वानभ्राजादि सोमरक्षकैः सह युध्वा, सोममप्राप्य, पशून् दीक्षां च गृहीत्वा, द्वे अक्षरे हित्वा, पराजित्य समागता । तथैव त्रिष्टुप् त्रयोदशाक्षरा सती युद्धे पराजित्य, सोममप्राप्य, द्वे अक्षरे हित्वा, दक्षिणाभिः तपसा च प्रत्यागच्छत् । ततः परं गायत्री चतुरक्षरा सती अजया सह उत्पत्य सोममाहरत् चत्वारि चाक्षराणि । सा अष्टाक्षरा समपद्यत । यस्मात् सोममाहरत् तस्मात् गायत्री तेजस्विनीतमा - तेजोबाहुल्यम् । ] |

| | |
|---|---|
| | [अजामपि सहायभूतां कृत्वा ऊर्ध्वं गता, ततः सा – अजा, ज्योतिषा - आत्मीयया दीप्त्या तं सोमं गायत्र्यर्थमभ्यरुन्ध, अभिरुद्धवती अभिगतवती । ततः सा गायत्री सोमं च - अजया वशीकृतमाहरत् । भ.भा.]<br>(२) सं.२-४-३-२ दे॒वा॒सु॒राः .....ओजो॑ऽसि॒ सहो॑ऽसि॒ बल॑मसि॒ भ्राजो॑ऽसि .. – अत्र सर्वात्मकत्वेन गायत्री स्तूयते । ओजः त्वगसृङ्-मांसादि धातुभ्यो जातोऽष्टमो धातुः । बलं शरीरशक्तिः । सहः सहिष्णुत्वं धैर्यम् । भ्राजो दीप्तिः । देवानां धाम स्वर्गः । नाम, इन्द्रादिकम् । विश्वं - अचेतनं कृत्स्नं जगत् । विश्वायुः कृत्स्नान्नयुक्तम् । सर्वं चेतनरूपं कृत्स्नं जगत् । सर्वाण्यायुष्याणि यस्य चेतनस्य जगतः तत्सर्वायुः। वैरिणोऽभिभवतीत्यभिभूः।..अनेन स्तुतिरूपेण मन्त्रेण गायत्रीं प्रसाद्य तत्प्रसादादसुराणामोज आदि षट्कं विनाश्य स्वयं तत् लब्धवन्तः (देवाः)।<br>(३) आ.१०-३५ अपि पश्यत। |
| २८ | सं.१-२-५-८ पृ॒थि॒व्यास्त्वा॑ - (ब्रा.६-१-८-२) स॒प्त ग्रा॒म्याः प॒शव॑ः स॒प्ताऽऽर॒ण्याः – गवादयो ग्राम्याः, कृष्णमृगादय आरण्याः । तथा च बोधायनः – "सप्त ग्राम्याः पशवः अजाऽश्वो गौर्महिषी वराहो हस्त्यश्वतरी चेत्यथ सप्ताऽऽरण्याः द्विखुराश्चैकखुराश्च पक्षिणश्च सरीसृपाश्च श्वापदाश्च शरभाश्च मर्कटाश्च" इति । |
| २९ | **छन्दोविशेषाः, अतिच्छन्दसः**<br>(१) सं.१-२-६-२ अ॒भि त्यं दे॒वꣳ स॑वि॒तार॑म् - (सं.६-१-८-९) अति॑च्छन्दस॒र्चा मि॑मीते - अष्टिः<br>(२) सं.१-२-९-१ प्रच्य॑वस्व भुवस्पते – षट्पदा अतिजगती<br>(३) सं.१-८-१५-१८ ह॒ꣳसः शु॑चि॒षत् – ब्रा. १-७-९-२१ - वर्ष्म॒ वा ए॒षा छन्द॑सां - हंसमन्त्रस्य छन्दः अतिजगती । सा च गायत्र्यादीनि अल्प छन्दांसि अतिक्रम्य वर्तत इति तस्या अतिच्छन्दस्त्वम् । अत एव छन्दसां तत्रान्तर्भावात् सर्वछन्दोरूपत्वम् ।.. एषा अतिजगती सर्वेषां छन्दसां शरीरम् । अत्रत्यैः अक्षरैः कैश्चित् क्वचित् कस्यचित् छन्दसः संपादयितुं शक्यत्वात् ।<br>(४) सं.३-१-११-३० घृ॒तेन॑ द्यावापृथिवी – अतिजगती विवृद्धपादा घृतेन इति त्रिभिरक्षरैः प्रथमः पादः विवृद्धः [भ.भा.]<br>(५) सं.४-१-५-६ अ॒यक्ष्माय॑ त्वा – महाबृहती<br>(६) सं.४-१-८ आप्रियो याज्यानुवाक्याः विविध छन्दांसि – (सं.५-१-८-१०), अप॑रिमितछन्दसो भवन्ति, – (सं.५-१-८-१२), लो॒म॒शं वै ना॒मै॒तच्छन्द॑ः – |

| | |
|---|---|
| | बहुप्रकारछन्दस्त्वं चैव द्रष्टव्यम् – सर्वाश्चैताः त्रिपदाः। आसां आद्या अन्त्याश्च पादा एकादशाक्षराः । मध्यमः पञ्चाक्षरः, षडक्षरः, सप्ताक्षरोऽष्टाक्षरश्च पादः । ता एताः पिपीलिका-मध्यास्त्रिपदा उष्णिहः । दैव्या होतारावूर्ध्वं तिस्रो देवीरिति च गायत्र्याविति ।<br>(७) सं.४-२-३-१ अन्नपते - उपरिष्टाद्बृहती<br>(८) सं.४-२-५-१ समितꣳ सङ्कल्पेथां – महाबृहती<br>(९) सं.४-२-५-९ यस्याँस्ते – महासतोबृहती<br>(१०) सं.४-२-१०-६ इमꣳ समुद्रꣳ शतधारं - अष्टिः<br>(११) सं.४-२-१०-८ इमामूर्णायुं वरुणस्य - अष्टिः<br>(१२) सं.४-२-१०-१० अजाह्यग्नेरजनिष्ट - अष्टिः<br>(१३) सं.४-४-४-२६ अग्निꣳ होतारं मन्ये - अत्यष्टिः [अतिक्रान्ता अष्टिं षोडशाक्षरपादां वृत्तिं एकाक्षराधिक्यत्वात् (प्रतिपादं १७ अक्षराणि)]<br>(१४) सं.४-६-१-१ अश्मन्नूर्जं पर्वते - अतिजगती [(अतिक्रान्ता जगतीं द्वादशाक्षरपादां एकाक्षराधिक्यत्वात् (प्रतिपादं १३ अक्षराणि) प्रथमाऽतिजगत्यासां सा द्विपञ्चाशदक्षरा (अतिच्छन्दसां मध्ये प्रथमा)]<br>(१५) सं.४-७-१३-५ उद्नो दत्तोदधिं भिन्त – शक्करी<br>(१६) सं.५-५-४-७ चित्तिं जुहोमि मनसा – अतिजगती<br>(१७) ब्रा.२-५-४-९ विश्वो विहाया अरतिः – अत्यष्टिः [अष्टापदी]<br>(१८) आ. ४-४२-३२ तच्चक्षुर्देवहितं (८८ अक्षराणि - आकृतिः छन्दः)<br>(१९) सं. ४-३-७ मा छन्दः अत्र मा, प्रमा, प्रतिमास्त्रीवि – शब्दाभिधेयाः, छन्दो-विशेषाः । केचिद्वेदे प्रसिद्धाः, केचिल्लोकेष्वपि प्रसिद्धाः । |
| ३० | **सूक्ष्मसमयनिर्णयः** (Punctuality in vedaas)<br>(१) सं.१-२-१०-१ अग्नेरातिथ्यमसि – (प्राचीनवंशसमीपमागतस्य सोमस्य सत्कारार्थं आतिथ्येष्टिः) मन्त्रान् व्याचिख्यासुः **कालविशेषसहितं** आतिथ्यं कर्म विधत्ते - (ब्रा.६-२-१-१) यदुभौ विमुच्याऽऽतिथ्यं गृह्णीयात् यज्ञं विच्छिन्द्यात् ....[सोमः बलीवर्दद्वययुक्ते शकटे आगच्छति ।] द्वयोर्बलीवर्दयोर्विमुक्तयोः सतोः सोमगमनरूपं कर्म सर्वथा परित्यक्तं भवति । आतिथ्यकर्म तु उपक्रान्तं , ततो यज्ञमध्ये यज्ञो विच्छिद्येत । अविमुक्तयोस्तु द्वयोः, गमनस्यासंपूर्णत्वात् अनागताय सोमाय आतिथ्यं कृतं भवेत् । एकस्मिन् विमुक्ते च विमुक्तत्वादेव गमनं संपूर्णं |

| | |
|---|---|
| | भवति । इतरस्य विमोकाभावात् पूर्वकर्मापि न त्यक्तम् । अतस्तस्मिन्काले निर्वापात्, यज्ञः संततो भवति।<br>[Here while fixing the time for performing the Aatithyeshti, the punctual time is fixed in the veda. The somarasam comes in a cart drawn by two bullocks. On arrival, it is explained that if the ishti is performed after the release of both the bulls, there is delay and the yagnam will become infructuous; if it is performed before both the bulls are released, it will amount to the Aatithyam being performed for a guest who is yet to arrive. Hence it is ordained that after one bull is released and before the second one is released, the soma rasam should be taken out and the ishti is to be performed. ]<br>(२) A similar position is explained in the Vaastoshpateeya homam. When the yajamaana takes up the journey, if he leaves without doing the Vaastoshpateeya homam, the agni will become angry and will trouble him. If he performs the journey after doing the homam, the Agni, satisfied with the homam, will render all good things to the yajamaana. The Vaastoshpateeya homam is ordained to be done, after the right side bull is tied in the cart and before the left side bull is tied. The exact time is thus fixed.<br>सं.३-४-१०-६ यद्युक्ते जुहुयात् – यदि बलीवर्दद्वये युक्ते सति पश्चाज्जुहुयात्, तदा तावदेव वास्तुः यज्ञदेशः प्रयातो भवति । तस्मिन्प्रयाते सति अयज्ञदेशे लौकिके यथा होमस्तथैतत्स्यात् । तर्हि युक्ते बलीवर्दद्वये जुहोत्विति चेत्, तदप्यसङ्गतम् । यथा क्षेमे सति प्रयाणप्रसङ्गमन्तरेण जुहोति तथैतत्स्यात् । उभयथाऽप्यहुतमस्य वास्तोष्पतीयं भवेत् ।... दक्षिणबलीवर्द एकस्मिन्नेव युक्ते तु प्रयाणस्य प्रसक्तत्वात् अनतीतत्वाच्च अयं प्रयास्यन्भवति । अतस्तदा वास्तोष्पतीयं जुहुयात् ।...<br>(३) ब्रा.२-२-६-८ अधिवृक्षसूर्ये वाचं विसृजति – दिवा रात्रौ वा वाग्विसर्गे स कालो भ्रातृव्याय अवशेषितः स्यात् । अतस्तत्परिहाराय अधिवृक्षसूर्ये वाचं विसृजेत् । सूर्यशब्देन आतप उपलक्ष्यते । स चाऽऽतपो भूमिं परित्यज्य वृक्षमधिरुह्य तदग्र एव यदा दृश्यते, तदा वाग्विसर्गे सति, तत आरभ्य, अस्तमयादर्वाक् एतावन्तमल्पमेव कालं, अस्मै भ्रातृव्याय अवशेषयति । |
| ३१ | **परिधयः** - सं.१-२-१०-१ – ब्राह्मणं – सं.६-२-१-१० देवा वै या आहुतीरजुहवुस्ता असुरा निष्कावमादन् - निष्कावं निश्शब्दं चर्वणादिशब्देन देवा ज्ञास्यन्तीति मत्वा चौर्येणाभक्षयन् । कार्ष्मर्यवृक्षः रक्षोनिवारकत्वेन कर्मण्यः । तस्मात् तेनैव कर्म |

| | |
|---|---|
| | कुर्वीतेति मत्वा तन्मयान्परिधीनकुर्वत ।….. <br> मध्यमपरिधेर्दक्षिणोत्तरपरिधिभ्यां सह संस्पर्शं विधत्ते – सङ्स्पर्शयति रक्षसामनन्ववचाराय (सं.६-२-१-११) इति । स्पर्शाभावे परिध्योः सन्धौ रक्षसामन्तरनुप्रवेशः स्यात् । <br> पूर्वस्यां दिशि रक्षःप्रवेशनिवारणाय प्रसक्तं चतुर्थ-परिधिं निषेधति – न पुरस्तात्परि दधात्यादित्यो ह्येवोद्यन्पुरस्ताद् रक्षाङ्स्यपहन्ति (सं.६-२-१-१२) इति । <br> आघारसमिधोर्द्वयोराहवनीयपूर्वभागे स्थापनं विधत्ते – ऊर्ध्वे समिधावादधात्युपरिष्टादेव रक्षाङ्स्यपहन्ति (सं.६-२-१-१३) इति । यद्यप्यूर्ध्वायां दिशि रक्षसां निवारणाय उपरिष्टादेव समिधौ स्थापनीये, तथाऽपि व्योम्नि स्थापयितुमशक्यत्वात् ऊर्ध्वदिगग्रे स्थापनीये । |
| ३२ | सं.१-२-११-६ या ते अग्ने रुद्रिया .. सं..६-२-२- देवासुराः संयत्ता आसन्ते देवा बिभ्यतोऽग्निं प्राविशन् - परकायप्रवेशहेतुत्वात्, योगशास्त्रप्रसिद्धेन संयमविशेषेण देवा अग्निं, अग्निशरीरं प्राविशन् । |
| ३३ | सं.१-२-१३-४ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् - विष्णुस्त्रिविक्रमावतारं धृत्वा, इदं विश्वं विभज्य क्रमते स्म भूमावेकं पदं, अन्तरिक्षे द्वितीयं, दिवि तृतीयमित्येवं त्रेधा पदं निदधे । अस्य विष्णोस्तस्मिन्पदे विश्वं समूढं सम्यगन्तर्भूतं । .. <br> ब्रा.३-१-२-१४ शृण्वन्ति श्रोणां .. त्रेधा विष्णुरुरुगायो विचक्रमे – उरु प्रभूतं यथा भवति तथा गीयते वेदेषु श्रूयत इत्युरुगायः, तादृशो विष्णुर्महीं दिवं महान्तं द्युलोकं पृथिवीमन्तरिक्षं चोद्दिश्य त्रेधा विचक्रमे त्रिप्रकारं त्रिविधं क्रमणं कृतवान् – पादत्रयेन लोकत्रयं व्याप्नोत्, तत्त्रिविक्रमरूपं श्रोणानक्षत्ररूपैति प्राप्नोति । |
| ३४ | सं.१-२-१३-८ दिवो वा विष्णो.. ब्रा.६-२-९-९- आशीर्पदयर्चा – हस्तौ पृणस्वाऽऽप्रयच्छ इत्याशीः यस्या ऋचः पदेषु प्रतीयते सेयं ऋक् आशीर्पदा । |
| ३५ | सं.१-२-१४-५ जामिमजामिं प्रमृणीहि शत्रून् – जामिः पुनःपुनः ताडितः , अजामिः अताडितः तादृशान् सर्वान् प्रमृणीहि मारय । <br> ब्रा.१-७-२-६ उप जाम्यै हरते - जाम्यै जायायै जायात्वं संपादयितुं उपहरते यस्य कस्यचिद् गृहमुपेत्य स्त्रियं हरति । |
| ३६ | सं.१-३-३-१ विभूरसि … सं १-३-३-१६ अहिरसि बुध्नियो रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिꣳसीः । - हे नूतन गार्हपत्य, यो देवः प्रोष्ठपदा नक्षत्रमज |

| | |
|---|---|
| | एकपाद्देवतेत्याम्नातः, तद्रूपोऽसि । पुरातनं गार्हपत्यमित ऊर्ध्वमृत्विजः परित्यक्षन्तो भवन्ति । हे त्याज्यगार्हपत्य, यो देवः प्रोष्ठपदा नक्षत्रमहिर्बुध्नियो देवतेत्याम्नातः, तद्रूपोऽसि । आग्नीध्रीयमारभ्य पुराण-गार्हपत्यान्तेषु षोडशसु स्थानेष्वभिमन्यमान हेऽग्ने, त्वदीयेन रौद्रेण सैन्येन राक्षसेभ्यो मां पाहि, कर्मफलप्रदानेन मां पिपृहि पूर्णमनोरथं कुरु, मद्विनाशरूपं हिंसां मा कुरु । |
| ३७ | **दघ्नं , अरत्निः**<br>(१) सं.१-३-६-१४ ब्रह्मवनिं त्वा – सं.६-३-४-१६ नाभिदघ्ने परिव्ययति – नाभिदघ्ने उदरे ।<br>(२) सं.५-६-८-४ जानुदघ्नं चिन्वीत, नाभिदघ्नं चिन्वीत, ग्रीवदघ्नं चिन्वीत - प्रथम, द्वितीय, तृतीयचितीनां, उत्तरोत्तरमौन्नत्यम् । अत एव गायत्री-त्रिष्टुब्जगतीनां, उत्तरोत्तरमक्षराधिक्यम् । अतः क्रमेण गायत्र्यादि द्वारा लोकत्रयमपि रोहति ।<br>(३) आ.१-२२-१२ जानुदघ्नीमुत्तरवेदीं खात्वा। अपां पूरयित्वा गुल्फदघ्नम् ।<br>(४) आ.४-११-१ घर्म या ते दिवि शुक् – आ.५-९-२ इयत्यग्रे जुहोति। अथेयत्यथेयति । – अग्रे प्रथममित्यास्यदघ्ने देशे धारयित्वा जुहोति । अथानन्तरमियति नाभिदघ्ने देशे धारयित्वा जुहोति । अथानन्तरमियति जानुदघ्ने देशे धारयित्वा जुहोति । एते च त्रयो देशा लोकत्रयरूपाः, अतो लोकेभ्यः शुचं निकरोति ।<br>(५) सं.५-४-३-७ इयत्यग्रे जुहोत्यथेयत्यथेयति – त्रिष्वप्याहुतिषु क्रमेण जानुदघ्नादिदेशेषु स्रुग्धारणं हस्ताभिनयेन विधत्ते ।<br>(Ankle-deep, Knee-deep, waist-deep, neck-deep)<br>(६) सं.१-३-५-१० - सं.६-३-३-१५ पञ्चारत्निं चिन्वीत – चतुर्विंशतिरङ्गुलयोऽरत्निः। |
| ३८ | **अकः धातुशब्दः**<br>सं. १-३-१४-४ साध्वीमकः - स्वादुमकरोत्<br>सं.१-४-४५-१ अपदे पादा प्रतिधातवेऽकः – पादं प्रक्षेप्तुं मार्गमकः करोतु ।<br>सं.१-५-२-६ ब्रह्मैव तदकः – परिवृढमेव करोति ।<br>[सं.५-३-७-२ नास्मा अकं भवति – कं सुखं, अकं दुःखम् ।]<br>[सं.१-४-१७ अकवारिं दिव्यं शासमिन्द्रम् – अकवारिं अकुत्सितारिं – वृत्रादीनां शत्रूणामतिप्रबलत्वात् । ]<br>[ब्रा.२-८-५-२४ प्रप्रजायन्ते अकवा महोभिः –अकवा अकुत्सिताः । ] |

| | |
|---|---|
| ३९ | सं.१-४-२-७ (सं.६-४-५-१४) त्रयः पशूनां हस्तादानाः पुरुषो हस्ती मर्कटः – गोमहिषादयः सर्वे पशवः मुखादानाः। एते तु त्रयो हस्तानाः । पुरुषोऽपि “ब्रह्मणे ब्राह्मणमालभते”इत्यादावालभ्यत्वात्पशुः । |
| ४० | सं.१-४-३,४ उपयामगृहीतोऽसि - उपयामः पृथिवी । उपयामेन पृथिविरूपेण दारुपात्रेण गृहीतोऽसि। इयं वा उपयामः (सं ६-५-८-५ ) इति श्रुतेः । उपेताः प्रजा यच्छति, उत्पादन-धारणादिना व्यस्थापयति, इत्युपयामः भूभागविशेषः । |
| ४१ | **वायुः शोधयिता**<br>सं.१-४-४ आ वायो भूष शुचिपाः – सं.६-४-७-३ वायुर्हि तस्य पवयिता स्वदयिता - लोके यद्वस्तु द्रवाधिक्यात् पूतिगन्धोपेतं भवति तच्छोषयितुं प्रकृष्टे वायौ विषजन्ति प्रसार्य स्थापयन्ति । अतस्तादृशस्य वस्तुनो वायुः शोधयिता स्वादुकर्ता च । |
| ४२ | सं.१-४-४ - सं.६-४-७-५ वाग्वै पराच्यव्याकृताऽवदत् – येयं वैदिकमन्त्ररूपा वाक्सा पूर्वं पराची समुद्रघोषवदैक्यरूपेण दण्डायमाना तस्यां वाच्येदावदेकं वाक्यं, तस्मिन्वाक्येऽप्येदावदेकं पदं, तस्मिन्पदेऽपीयं प्रकृतिरयं प्रत्यय इत्येवं विभज्य, सर्वतः करणं व्याकरणम्, तद्रहितत्वात्, अव्याकृतैवावदत् प्रवृत्ता । तामिन्द्रो मध्यतोऽवक्रम्य वाक्यपदादिरूपेण तत्र तत्र विच्छिद्य विभिन्नां कृतवान् । |
| ४३ | सं.१-४-५ अयं वां मित्रावरुणा - सं.६-४-८-४ - न वा इदं दिवा न नक्तमासीदव्यावृत्तं – इदं कालस्वरूपमव्यावृत्तमविभक्तं पूर्वमासीत् । एतावदहरिति दिवा नाऽऽसीत् । एतावती रात्रिरिति नक्तं नाऽऽसीत् । इदमविभक्तं कालस्वरूपं नोऽस्मदर्थं विवासयतं विभज्य स्थापयतम् [इति देवा मित्रावरुणावब्रुवन् ] ... सूर्योदयमारभ्य तदस्तमयपर्यन्तं कालोऽहरित्येवं मित्रः कल्पयामास । तदूर्ध्वं पुनः सूर्योदयपर्यन्ता रात्रिरित्येतद्वरुणस्य कल्पनम् । तत आरभ्य, उभयकालस्वरूपं व्यौच्छद्विभक्तमासीत् । |
| ४४ | सं.१-४-६ या वां कशा मधुमती – कशा वाक् । कशासमानया जिह्वयोत्पन्नत्वात् , वागेवात्र कशा । मधुमती परुषशब्दरहिता । |
| ४५ | **यज्ञस्य शिरश्छेदनम्**<br>सं.१-४-७ (ब्रा.६-४-९-१ – यज्ञस्य शिरोऽच्छिद्यत – यज्ञपुरुषः पुरा कदाचिद्देवानां वस्तु गृहीत्वा देवैः सह योद्धुं सज्यं धनुः वामहस्ते धृत्वा धनुष एकं कोटिं भूमौ, द्वितीयां कोटिं गले प्रतिष्कभ्यातिष्ठत् । तदानीं उपदीकानामभिः जन्तुभिः भूमिष्ठे |

| | |
|---|---|
| | ज्याभागे भक्षिते सति, त्रुटितज्याकस्य धनुष ऊर्ध्वकोटिः स्वयमुद्गच्छन्ती यज्ञस्य शिरोऽपि च्छित्वा स्वात्मना सह ऊर्ध्वमुदगमयत् ।<br>ते देवा अश्विनावब्रुवन्, भिषजौ वै स्थः, इदं यज्ञस्य शिरः प्रतिधत्तमिति (प्रतिधानं नाम शरीरे पुनःसन्धानं) । तावब्रूतां वरं वृणावहै, ग्रह एव नावत्राऽपि गृह्यतामिति, ताभ्यामेतमाश्विनमगृह्णन्, ततो वै तौ यज्ञस्य शिरः प्रत्यधत्ताम् । आ.५-१-४,५,६ – प्रवर्ग्यब्राह्मणे समाम्नातः । |
| ४६ | **रुद्रस्य शिरश्छेदनम्**<br>आ.१-५-३ – दिव्यस्यैका धनुरार्त्निः - अस्य विश्वदेवजिह्वारूपस्याऽऽरुण-केतुकस्याग्नेरेका धनुरार्त्निः, धनुष ऊर्ध्वकोटिर्दिवि श्रिता । अपरा त्वधस्तनी कोटिः पृथिव्यां श्रिता । वम्रयः पिपीलिकासमाना जन्तवः । यदीय-वमनान्मृत्तिका द्रवीक्रियते । इन्द्रो यथोक्तधनुर्दर्शनेन भीतः सन्, वम्रिरूपेणाधःकोटिसमीपे स्थाने स्थित्वा तस्याऽऽरुणकेतुकस्याग्नेः, धनुष्यवस्थितां ज्यां स्वयमेवाच्छिनत् ।... एतद्रुद्रस्य धनुः, तस्मादिदमुत्कृष्टम् । रुद्रो नाम, अत्रारुणकेतुकोऽग्निः, "रुद्रो वा एष यदग्निः" इति श्रुतेः ।..ज्यायां छिन्नायामुत्पतन्ती धनुष ऊर्ध्वा कोटिर्यस्य रुद्रस्य गलमवष्टभ्य पूर्वमवस्थिता तस्य रुद्रस्य शिरश्छिन्दत्यूर्ध्वं नीत्वा, अधः पतन्ती पिपेष तच्छिरश्चूर्णीचकार । स च पिष्टार्धशिरोभागः प्रवर्ग्यरूपेणाऽऽविर्बभौ । यस्माद्रुद्रस्य शिर एव प्रवर्ग्यः, तस्मात्प्रवर्ग्यसहितेन यज्ञेन यो यजते सोऽयं रुद्रस्य तच्छिरः प्रतिदधाति पुनः समादधाति । यः पुमानेवं शिरः समाधानप्रकारं वेद, तमेनं रुद्र आरुको न भवति तस्य हिंसां न करोतीत्यर्थः । |
| ४७ | सं.१-४-९ तं प्रत्नथा पूर्वथा – प्रत्नथेत्यादौ थाप्रत्ययः उपमार्थः। प्रत्नाः पुरातना भृग्वादयो यथा त्वामस्तुवन्, तथा वयमपि त्वां स्तुमः। पूर्वथा पित्रादय इव। विश्वथाऽतीताः सर्वे यजमाना इव । इमथा वर्तमाना इमे यजमाना इव ।..<br>[ब्रा.२-५-४-१० भुवनानि पूर्वथा – पूर्वथा यथापूर्वं]<br>सं.६-४-१०-१ ग्रहावेव नावत्रापि गृह्येतामिति - अत्र गृह्येतामित्येतावदेव शण्डा-मर्काभ्यां वृतं न तु हूयेतामिति । ततो देवा ग्रहणमात्रेणैव स्वकार्यं साधितवन्तः । |
| ४८ | सं.१-४-११ सं.६-४-११-६- यथा त्सारीयति म आख इयति नाप-रात्स्यामीत्युपावसृजत्येवमेव तदध्वर्युराग्रयणं गृहीत्वा यज्ञमारभ्य वाचं विसृजते – त्सारी छद्मगतिर्व्याधः । त्सर छद्मगताविति धातुः। स व्याधो मनस्यादौ विचार्य पश्चाद्बाणानुपावसृजति मुञ्चति । वराहान् गजान्पातयितुं मार्गे यो गर्त आयामेन |

| | |
|---|---|
| | खन्यते स आखः । ममैतावति दूरमाखस्तिष्ठति, अहं त्वीषत्पुरोगत इयति दूरे स्थितो नापरात्स्यामि । वराहादिभिः स्वस्य मारणमेकोऽपराधः, स्वात्मानं दृष्ट्वा वराहादेः पलायनमन्योऽपराधः, स्वेन मुक्तस्य बाणस्य स्खलनमपराधान्तरम् । एतत्सर्वमियति दूरे मम न भविष्यतीति निश्चित्याऽऽगतिस्तत्र स्थित्वा पश्चादवसरे सति पश्चादुद्भूतो यथा बाणान्मुञ्चति, तथैव तत्राध्वर्युः गूढध्वनिः कांश्चिद्ग्रहान् गृहीत्वा यज्ञं दृढमवष्टभ्य पश्चाद् ध्वनिं प्रकटीकरोतीत्युपपद्यते । |
| ४९ | सं.१-४-१८ इन्द्रं मरुत्व इह पाहि सोमम् – सोमं पाहि पिब ।[भ.भा.] |
| ५० | सं.१-४-२२ सं.६-५-६-७ - तिसृभिर् ऋग्भिर्गृह्णाति माता पिता पुत्रस्तदेव तन्मिथुनमुल्बं गर्भो जरायु तदेव तन्मिथुनं - मातापितृरूपं मिथुनं पुत्रेण सह तदेकं त्रयात्मकम् । गर्भवेष्टनोदकमुल्बं, तद्वेष्टनं पट्ट-सदृशं जरायुनामकम्, तदुभयरूपं मिथुनं गर्भेण सह त्रयात्मकम् । तेन सदृशमिदमृक्त्रयात्मकम् (कदाचनेत्यादि) । |
| ५१ | सं.१-४-२३ वाममद्य सवितः – हे सवितः, अद्यास्मभ्यं वामं वननीयं कर्मफलं सावीः प्रेरय देहीत्यर्थः ।<br>आ.१०-१८ - वामदेवाय नमः – वामं सुन्दरं च तद्देवं दीप्यमानं चेति वामदेवं तस्मै । |
| ५२ | सं.१-४-२८ हरिरसि हारियोजनः – हे सोम, त्वं हरिरसि हरितवर्णोऽसि । हरितमश्वं युनक्तीति हरियोजन इन्द्रः तस्य संबन्धी हारियोजनः इन्द्रदेवताकः । |
| ५३ | सं.१-४-२८ सं.६-५-११-५ निदानवान्भवति – चिरजीविभिर्मातापितृस्वामिभिः संयुक्तो भवति । |
| ५४ | सं.१-४-२८ - सं.६-५-११-८ धानाः करम्भः परिवापः पुरोडाशः पयस्या – भृष्टा यवा धानाः, आज्यसंयुक्ताः सक्तवः करम्भः, व्रीहिजन्या लाजाः परिवापः, पिष्टविकारः पुरोडाशः, क्षीरविकारः पयस्या ।<br>ब्रा.३-१२-५-१५ मन्थानैतावतो दद्यात् – क्षीरादौ द्रवद्रव्ये सक्तुपिष्टमिश्रेण निष्पन्नो मन्थः ।<br>सं.१-२-११ - सं.६-२-५-४ – आमिक्षा वैश्यस्य – तप्ते पयसि दधिप्रक्षेपेण घनीभूतो भागोऽसावामिक्षा ।<br>सं.२-५-३-१० – यदातञ्चनेन – ईषदम्लतक्रमातञ्चनम् ।<br>सं.३-२-६-३ पृषदाज्यमवमृशेत् – पृषद्भिः, दधिबिन्दुभिः, मिश्रमाज्यं पृषदाज्यम्।<br>सं.३-२-८-२२ यमाशिरा दम्पती वाममश्नुतः - यत्क्षीरं दोहपात्रस्थमेव, अक्षतादिप्रक्षेपणेन घनीभवति, तादृशं दधि रेफान्ताशीःशब्देनाभिधीयते। आशिरा दध्ना । यं वामं सौन्दर्यमश्नुतः । |

| | |
|---|---|
| ५५ | सं.१-४-४३ सं.६-६-१-१ सुवर्गाय वा एतानि लोकाय हूयन्ते यद्दाक्षिणानि – दक्षिणां दित्सुना होतव्यानि दाक्षिणानि ।<br>(मीमांसायां) द्वादशाधिकम् शतं द्वादशशतम् ... अर्धं येषां ऋत्विजां तेऽर्धिनः, एवं पादिनो योजनीयाः । |
| ५६ | सं.१-४-४४-१ धाता रातिः सवितेदं - धाता ( रातिर्दानशीलः), सविता, प्रजापतिः (निधिपतिः महाशङ्खखर्वादिनामकानां नवानां निधीनां पालयिता), अग्निः, त्वष्टा, विष्णुश्चैते षड् देवा अस्माकमिदं हविर्जुषन्ताम् । |
| ५७ | सं.१-४-४४-५ जक्षिवांसः पपिवांसश्च - सवनीयपुरोडाशान् भक्षितवन्तः, सोमं पीतवन्तश्च । |
| ५८ | सं.१-४-४५-१ अन्वेतवा उ - उशब्दो अवधारणे । |
| ५९ | सं.१-४-४५ (अन्ते) - सं.६-६-५-४ योऽवगतः सोऽपरुध्यतां - अवगतः प्राप्तैश्वर्यः, अपरुध्यतां ऐश्वर्यात्क्लिश्यताम् । अयमेकः कामः । एतद्विपर्ययोऽन्यः कामः । ... |
| ६० | सं.१-४-४५ - सं.६-६-८-२ तेज आग्नेयेनेन्द्रियमैन्द्रेण ब्रह्मवर्चसं सौर्येण – तेजः कान्तिः, इन्द्रियं बलं, ब्रह्मवर्चसं श्रुताध्ययनसंपत्तिः । |
| ६१ | सं.१-४-४५ - सं.६-६-१०-३ मन इव हि प्रजापतिः – सङ्कल्पमात्रेण जगत्सर्जनात्, प्रजापतेर्मनःसादृश्यम् । |
| ६२ | सं.१-४-४५ - सं.६-६-१०-९ - शतमानं भवति शतायुः पुरुषः शतेन्द्रियः – शतनिष्कपरिमितं शतमानपरिमितं वा हिरण्यं भवति । दशानां ज्ञानकर्मेन्द्रियाणां एकैकस्य दशनाडीषु संचाराच्छतेन्द्रियत्वम् |
| ६३ | सं.१-४-४५ - सं.६-६-११-३ इन्द्रो वै देवानामानुजावर आसीत् – अनुजेभ्यो निकृष्टेभ्योऽवरोऽत्यन्तनिकृष्टः । आनुजेति दीर्घश्छान्दसः । |
| ६४ | सं.१-४-४५ - सं.६-६-११-११ हरिवच्छस्यते – हरिशब्दोऽस्मिन्नस्तीति हरिवच्छस्त्रम् । इन्द्रमिद्धरी वहत इत्यादिष्वृक्षु हरिशब्दो बहुलमुपलभ्यते । |
| ६५ | सं.१-४-४६-२ यस्मै त्वं सुकृते जातवेदः – शोभनं कर्म करोतीति सुकृत् । जातं जगद्वेत्तीति जातवेदाः । हे जातवेदोऽग्ने, त्वं सुकृते यस्मै यजमानाय स्योनं सुखकरमुत्कृष्टं स्थानं कृणवः करोषि, स यजमानो रयिं धनं स्वस्ति नशते सम्यक् प्राप्नोति । कीदृशं धनं, अश्वैः पुत्रैः शूरभटैर्गोभिश्च संयुतम् । |

| | |
|---|---|
| ६६ | **अग्नेः पुनराधानम्**<br>सं.१-५-१-१ देवासुराः संयत्ता आसन् ... – देवाश्चासुराश्च संयत्ता युद्धयुक्ताः । विजयं प्राप्नुवन्तो देवास्तदा तेभ्योऽसुरेभ्योऽपहृतं मणिमुक्तादिकं श्रेष्ठं वसु रक्षणायाग्नौ निक्षिप्तवन्तः । कथंचिदसुराणां विजये सति, एतद्धनमस्माकमापद्युपयुज्येतेति देवानामाशयः । तद्धनमग्निर्न्यकामयत – इच्छां कृतवान् । तेन धनेन सोऽपाक्रामत् - पलायनमकुरुत । देवाः पुण्यवशेनासुरान्विजित्य तद्धनमवरुरुत्समाना अवरोद्धुमिच्छावन्तोऽनु अग्नेः पश्चादायन्, तद्धनम् बलात्कारेण, आदातुमिच्छा-वन्तः । सोऽग्निररोदीद्रोदनं कृतवान् । (प्रसङ्गाद्रुद्रशब्दस्य प्रवृत्तिनिमित्तं विधत्ते – यतो रोदनं कृतवान् , ततो रुद्रस्य रुद्रत्वम् । यदश्रु नेत्रसकाशात् बिन्दुरशीयत भूमावपतत्, तद्रजतं हिरण्यमभवद्रजनरूपं धनमभवत् । .. तस्याश्रुजत्वेन दक्षिणां प्रत्ययोग्यत्वात्, तद्दाने संवत्सरादर्वाक् एतद्गृहे किञ्चिद्रोदननिमित्तं भवति । तस्माद्बर्हिषि यज्ञे तन्न दद्यात् ।)<br>सोऽग्निरब्रवीत् - आदावसाधारणेन भागेन युक्तो भवानि, पश्चादिमं वसु युष्मभ्यं दास्यामीत्यग्निनोक्ता देवास्त्वैतत्पुनराधेयमिति भागं ददुः । तेन तुष्टोऽग्निरिदमब्रवीत् , यो मद्देवत्यं हविः कृत्वा पुनरादध्यात्, स खलु समृद्धिमानिति । तस्मात्समृद्ध्यर्थं पुनराधेयं हविरग्निदैवतं कुर्यादित्यर्थः ।<br>पुनर्वस्वोरादधीत – पुनरावर्तते वामं वस्वनयोरिति पुनर्वसू ।<br>पञ्च वा ऋतवः - बह्वृचब्राह्मणे द्वादश मासाः पञ्चर्तवो हेमन्तशिशिरयोः समासेनेत्याम्नानात्, ऋतूनां पञ्च संख्या । |
| ६७ | सं.१-५-२ –२,३ - पङ्क्त्यो याज्यानुवाक्या भवन्ति -- शताक्षरा भवन्ति शतायुः पुरुषः शतेन्द्रियः –<br>पङ्क्त्यः – अग्ने तमद्याश्वं (सं.४-४-४-(२२-२५) इति चतस्रः अक्षर पङ्क्तयः। अत्र द्वे अग्न्याधेयस्य याज्यानुवाक्ये , द्वे स्विष्टकृतः । याज्यानुवाक्ये च याज्यानुवाक्ये च इति कृतैकशेषयोः द्वंद्वः (भ.भा.) ।<br>अग्ने तमद्येत्येषा प्रथमा चतुर्विंशत्यक्षरा । अधाह्यग्ने क्रतोः, आभिष्टे अद्येत्युभयोः एकैका पञ्चविंशत्यक्षरा । एभिर्नो अर्कैरित्यन्त्या षड्विंशत्यक्षरेति संभूय शतमक्षराणि।<br>....ब्रह्मणः स्वप्रमाणेन शत संवत्सरायुष्ट्वात् तत्सन्ततिपतितस्यापि सामान्येन शतायुष्ट्वम्, धर्माधर्माभ्यां तु उत्कर्षापकर्षौ भवतः । ..... |
| ६८ | सं.१-५-३-१ "भूमिर्भूम्नेति सर्पराज्ञीभिर्गार्हपत्यमादधाति, यत्त्वा क्रुद्धः परो वपेति दक्षिणाग्निं यत्ते मन्युपरोप्तस्येतीतरान्" आहवनीय, सभ्य, आवसथ्यानित्यर्थः । |

| | |
|---|---|
| | सं.१-५-३-२ आऽयं गौः – अयं गार्हपत्यः, आदित्यरूपेण गौः गमनशीलः पृश्निः श्वेतवर्णो जगदक्रमीत् । |
| ६९ | सं.१-५-३-४ व्यंख्यन्महिषः सुवः – महिषः महति मण्डले सीदतीत्यादित्यः । |
| ७० | सं.१-५-३-८ सप्त ते अग्ने समिधः सप्त जिह्वाः – <br> **सप्त समिधः** – अश्वत्थ, उदुम्बर, पलाश, शमी, विकङ्कत, अशनिहतवृक्ष, पुष्करपर्ण रूपाः । <br> **सप्त जिह्वाः**- काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा । <br> स्फुलिङ्गिनी विश्वरुची च देवी लेलायमाना इति सप्त जिह्वाः ॥ [मुण्ड०१-२-४] <br> **ऋषयः मन्त्राः** ते च यथोक्त समित्संपादनार्थाः सप्त सङ्ख्याः, अश्वो रूपं कृत्वा यदश्वत्थेऽतिष्ठः [ब्रा.१-२-१-१२ ] इत्यादयः । <br> **प्रियाणि सप्त धामानि स्थानानि** – आहवनीय, गार्हपत्य, दक्षिणाग्नि, सभ्य, आवसथ्य, प्राजहित, आग्नीध्रीयाख्यानि सोमयागे वह्निधारकाणि सप्त संख्याकानि । <br> **सप्त होत्राः** होतृप्रमुखाः वषट्कर्तारः – होता, प्रशास्ता, ब्राह्मणाच्छंसी , पोता, नेष्टा, आग्नीध्रः, अच्छावाकश्चेति सप्त संख्याकाः । <br> **सप्तधा यजन्ति** - अग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोडशी, अतिरात्रः, अप्तोर्यामः, वाजपेयश्चेति सप्त प्रकाराः । – आहवनीयादि स्थानानि घृतेन सर्वतः पूरय । [सं.४-६-५-१४ अपि पश्यत ।] <br> सं.५-४-७-१८ सप्तैवास्य साप्तानि प्रीणाति – <br> सप्तसंख्योपेतं द्रव्यस्वरूपं साप्तं, तानि च पुनः सप्तसंख्याकानि – समित्सप्तकमेकं, जिह्वासप्तकं द्वितीयं, ऋषिसप्तकं तृतीयं, धामसप्तकं चतुर्थं, होतृसप्तकं पञ्चमं, यजनप्रकारभेदसप्तकं षष्ठं, पूरणीययोनिसप्तकमेकम् ..तानि साप्तानि प्रीणयत्येव । |
| ७१ | सं.१-५-३-११ लेकः सलेकः - नवसंख्याका लेकादिनामका य आदित्यास्ते सर्वे जुषाणाः प्रीयमाणा अस्माकमाज्यं वियन्तु पिबन्तु । |
| ७२ | सं.१-५-४-२ सर्पा वै जीर्यन्तः – सर्पाः जीर्यन्तो जरां प्राप्नुवन्तोऽमन्यन्त कोऽस्या जरायाः प्रतीकार इति विचारितवन्तः । तदा कसर्णीरनामकः कद्रूपुत्रः, भूमिरित्यादिकं मन्त्रसङ्घमपश्यत् । तन्मन्त्रसामर्थ्यात्, ते सर्पा जीर्णाः शरीरत्वचोऽपहत्य कोमलास्त्वचः प्राप्नुवन् । सर्पाणां राज्ञी भूमिः । |

| | |
|---|---|
| ७३ | सं.१-५-६-३ अस्मिन् क्षये - क्षये गृहविशेषे । |
| ७४ | सं.१-५-७-१ अयज्ञो वा एष योऽसामा – यः सामरहितः स यज्ञ एव न भवति । |
| ७५ | सं.१-५-७-१० याञ्चैवास्यैषोपतिष्ठते – धनादि याञ्चा । यथा कश्चिद्दरिद्रः, धनिकाय किञ्चिदुपायनमानीय नमस्कारं करोति तादृगिदमुपस्थानम् । अयमिह प्रथमो धायि धातृभिरिति योग उक्तः, आरे बाधस्व दुच्छुनामिति अनिष्टनिवारणम्, अधा नो वर्धया रयिमिति याञ्चा । मन्त्रं वोचेमाग्नय इत्युपायनम् ।.. |
| ७६ | सं.१-५-७-१४,१५ इन्धानास्त्वा, एषा वै सूर्मी - ज्वलन्ती लोहमयी स्थूणा सूर्मी, सा च कर्णकावती छिद्रवती । अन्तरपि जवलन्तीत्यर्थः। तत्समानेयमृक् । एकेन प्रहारेण शतसंख्याकान्मारयन्तः शूराः शततर्हाः । असुराणां मध्ये तादृशानेतयर्चा देवा हिंसन्ति । |
| ७७ | सं.१-५-७-१५ अछंबद्कारं - स्वस्य विनाशो यथा न भवति तथा , अनार्तत्वाय चात्मनः (भ.भा.)<br>सं.२-३-६-६ अछंबद्कारं - वैयर्थ्यं छंबद्कारः, एकस्यापि पुरोडाशस्य यथा वैयर्थ्यं न भवति, तथा ; अनार्तत्वं (भ.भा.) |
| ७८ | सं.१-५-९-१०,११,१२ नक्तमुपतिष्ठते, उपस्थेयः, अथो खल्वाहुः – [विचारपूर्वकं सायं प्रातश्च अग्निरुपस्थेय एव इति सिद्धान्तः निरूपितः। उपस्थानवेलायां ईषत्तिरश्चीनमुखत्वं विधत्ते ।] |
| ७९ | सं. १-५-१०-४ त्वत्पितारो अग्ने देवास्त्वामाहुतयस्त्वद्विवाचनाः। -<br>हे अग्ने, त्वत्पितारः त्वत्पितृकाः त्वं पिता पाता वा येषां तादृशा देवताः, त्वामाहुतयः त्वां प्रति गन्तारः त्वय्याहुतयः येषां ते त्वामाहुतयः । त्वद्विवाचनाः त्वं विवाचनाः विवाचयिता विशेषेण ख्यापयिता येषां ते तादृशाः । [भ.भा.] [सर्वेऽपि बहुव्रीहिसमासाः] |
| ८० | सं .१-५-१०-५ अयमग्निः श्रेष्ठतमोऽयं भगवत्तमः<br>प्रशस्यानां मध्येऽतिशयेन श्रेष्ठः, पुनरपि तादृशानां मध्येऽतिशयेन श्रेष्ठःश्रेष्ठतमः।<br>ऐश्वर्यस्य समग्रस्य धर्मस्य (वीर्यस्य) यशसः श्रियः ।<br>ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥<br>उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् ।<br>वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥<br>अतिशयेन भगवान् भगवत्तमः । सहस्रसंख्याकस्य धनस्य सनितारो दातारः, तेष्वतिशयेन दाता सहस्रसातमः । |

| | |
|---|---|
| ८१ | सं.१-५-११-४ पृष्टो दि॒वि – पृष्ट इत्यत्र सकारलोपश्छान्दसः । अयमग्निर्दिवि स्पृष्ट आदित्यरूपेणावस्थितः पृथिव्यां दाहपाकप्रकाश-कारित्वेन अवस्थितः, तथा फलपाककारी सन्, स्पृष्टः संबद्धः सर्वा अप्योषधीराविवेश । वैश्वानरोऽग्निः सहसा बलेन स्पृष्टः संबद्धः । स तादृशोऽस्मान्दिवा रिषो हिंसकात्पापात्, नक्तं रात्रावपि सोऽस्मान्पातु । |
| ८२ | सं.१-५-११-५ जा॒तो यद॑ग्ने॒ भुव॑ना॒ व्यख्यः॑ ....यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः – यूयं स्वस्तिभिः श्रेयोभिः सदा नः, अस्मान् पात रक्षत । यूयमिति बहुवचनं पूजार्थम् ।<br>सं.२-२-१२-१७ वष॑ट् ते विष्णवा॒स आकृ॑णोमि.. यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः ।<br>सं.३-४-१०-२ वास्तो॒ष्पते श॒ग्मया॑ स॒꣡सदा॑ ते .. यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः<br>ब्रा.२-५-६-८ बृह॑स्पते यु॒वमिन्द्र॑श्च वस्वः॑.. यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः ।<br>ब्रा.२-५-८-१० ए॒वा व॑न्दस्व॒ वरु॑णं बृ॒हन्त॑म् .. यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः ।<br>ब्रा.२-८-१-६ आ नो॑ नि॒युद्भि॑ः श॒तिनी॑भिर॒ध्वरम् .. यू॒यं पा॑त स्व॒स्तिभि॒ःसदा॑ नः<br>ब्रा.२-८-९-२८ अश्वा॑वती॒र्गोम॑तीर्न उ॒षास॑ः .. यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः ।<br>(यूयं – बहुवचनम्)<br>ब्रा.३-५-२-१२, ३-६-१-१० त्वं वरु॑ण उ॒त मि॒त्रो अ॑ग्ने .. यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः । |
| ८३ | **'मधु' शब्दस्य उकारान्त – नपुंसकलिङ्ग-व्यतिरिक्ताः प्रयोगाः - उदाहरणानि**<br>सं. १-५-११-१२ मध्वा॒ समि॒मा वचा॑꣡सि (मध्वा मधुराणि)<br>सं.२-४-९-९ मधु॑षा॒ संयौ॑ति<br>सं.४-४-१२-१ मधो॒रत॑ः (मधोः इति पदम्)<br>सं.७-५-१०-३ इ॒दं मधु॑<br>ब्रा.२-४-७-१७ मध्वो॒ अग्र॑म् |
| ८४ | **मरुतः**<br>(१) सं.१-५-११-(१५) मरु॑तो॒ यद्ध॑वो दि॒वः सु॑म्ना॒यन्तो॒ – सुम्नायन्तः , सुखमिच्छन्तः,<br>(२) सं.१-५-११-(१६) या व॒ शर्म॑ – र॒यिं नो॑ धत्त वृषणः सु॒वीर॑म् – वृषणः अभिमत-फलस्य वर्षितारः, रयिं धनं नोऽस्मभ्यं धत्त संपादयत । सुवीरं शोभनपुत्रं च संपादयत ।<br>(३) सं.२-२-५-११ म॒रुतो॒ वै दे॒वानां॒ विश॑ः – विशः करप्रदाः प्रजाः [करः = tax]<br>सं.२-२-५-१२ स॒प्तग॑णा॒ वै म॒रुत॑ः .. ईदृङ् चान्यादृङ्ङेत्यादि नामधारिणां सप्तानां समूहः प्रथमो गणः। शुक्रज्योतिश्चेत्यादिको द्वितीयः। ऋतजिच्चे- |

| | |
|---|---|
| | त्यादिकस्तृतीयः। ऋतश्चेत्यादिकः चतुर्थः। ईदृक्षास इत्यादिकः पञ्चमः। मितासश्चेत्यादिकः षष्ठः । गणान्तरं शाखान्तरे द्रष्टव्यम् ॥.... [सं.४-६-५-(१५-१९) ईदृङ् चान्यादृङ् चैतादृङ्ङ् प्रतिदृङ्ङ् मितश्च संमितश्च सभराः । शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्मांश्च सत्यश्चर्तपाश्चात्यंहाः । ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्चान्त्यमित्रश्च दूरेअमित्रश्च गणः । ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च धर्ता च विधर्ता च विधारयः। ईदृक्षास एतादृक्षास ऊ षु णः सदृक्षासः प्रति सदृक्षास एतन । मितासश्च संमितासश्च न ऊतये सभरसो मरुतो यज्ञे अस्मिन् ।] [सं.५-४-७-२७,२८ अपि पश्यत]<br>(४) सं.२-१-११ , २-२-१ सप्तगणा वै मरुतः – ईदृङ् चेत्यादिनोक्ताः सप्तसंख्याका मरुत एको गणः, तथाविधाश्च सप्तसंख्याकाः । तेषां हविष्प्रदानेन गणशो बहुविधगणरूपान् भ्रातृमित्रभृत्यानवरुन्धे । [सं. २-३-१-१३ अपि पश्यत]<br>(५) ब्रा. १-७-७-८ योऽरण्येऽनुवाक्यो गणः । तं मध्यत उपदधाति । अत्राम्नातः ईदृङ्ङेत्यादिः सप्तसंख्यायुक्तः एको गणः। शुक्रज्योतिश्चेत्यादिः सप्त संख्यायुक्तोऽपरो गणः। तयोर्गणयोर्मध्ये गणान्तरं प्रक्षेपणीयम् । अरण्ये गत्वाऽध्येतव्यो योऽनुवाकः तस्मिन्ननुवाके स गण आम्नातः। तथा हि "धुनिश्च ध्वान्तश्च ध्वनश्च ध्वनयंश्च । निलिम्पश्च विलिम्पश्च विक्षिपः " (आ.४-२४-१ ) इति । एतस्य गणस्य मध्यत उपधाने सति उभयतोऽवस्थितैः ग्राम्यैः पशुभिः परितोऽवबध्य आरण्यान्पशून् गृह्णाति । यस्मादत्रारण्यगणो मध्ये प्रक्षिप्तः तस्माल्लोकेऽपि अरण्य-वासिनो हरिणादयः आनीयमानाः पलायनं वारयितुं ग्रामे परिचयवद्भिः हरिणादिभिः उभयत एकपाशेन बद्धा परि गृहीता भवन्ति । [आ.४-२५-१ उग्रश्च धुनिश्च ध्वान्तश्च ध्वनश्च ध्वनयंश्च । सहसह्वांश्च सहमानश्च सहस्वांश्च सहीयांश्च । एत्य प्रेत्य विक्षिपः। उग्रादीनि सहमानान्तानि सप्तमरुद्विशेषाणां नामधेयानि। सहस्वादीनि पञ्च नामानि विकल्पितानि । अनुवाकद्वयोक्तं विकल्पितम् ।<br>(६) सं.१-२-४-१ (उपोद्घाते) (सं.६-१-५-५) मरुतो वै देवानां विशः - एकोनपञ्चा-शत्संख्याकाः सप्तगणरूपा मरुतः मनुष्यवैश्यवद्देवानां धनसंपादकाः प्रजाः ।<br>(७) ब्रा.३-४-१-१ मरुद्भ्यो वैश्यम् – देववैश्येभ्यो मरुद्भ्यो मनुष्यवैश्यं (आलभते) । |
| ८५ | सं.१-५-११-१९ – सुत्रामाणं .. दैवीं नावम् – स्वस्तये क्षेमायादितिमारुहेम प्राप्नुयाम ।.. यथा मनुष्यनिर्मितो नौः समुद्रस्योपरि तिष्ठति, तथा देवनिर्मिता भूमिः महाजलस्योपरि वर्तते । |

| | |
|---|---|
| ८६ | सं.१-६-२-१० - अग्ने देवेद्ध मन्विद्ध - अग्ने, देवेद्ध, मन्विद्ध, मन्द्रजिह्व इति चतुर्भिः संबोधनैः, अग्निं प्रोत्साहयति । देवेद्ध देवैर्दीप्त, मन्विद्ध मनुना दीप्त, मन्द्रजिह्व मन्द्रा हर्षहेतुर्जिह्वा यस्य । |
| ८७ | **अग्निः स्विष्टकृत्**<br>सं.१-६-२- २६ अग्नेः स्विष्टकृतोऽहं –<br>कश्चिदग्निः केनचिन्निमित्तेन रुद्रनामधेयमलभत । स च कदाचित् देवैराहुत्या तोषितः पूर्वमिष्टानां यागानां वैगुण्यं परिहृत्य स्विष्टत्वं कृतवान् । तथा च ब्राह्मणमाम्नायते – "देवा वै यज्ञाद्रुद्रमन्तरायन्त्स यज्ञमविध्यत्तं देवा अभि समगच्छन्त कल्पतां न इदमिति तेऽब्रुवन्त्स्विष्टं वै न इदं भविष्यति यदिमꣳ राधयिष्याम इति तत्स्विष्ट कृतः स्विष्टकृत्त्वम्" (सं.२-६-८-७ ) इति । "यदग्नये स्विष्टकृतेऽवद्यति भागधेयेनैव तद्रुद्रꣳ समर्धयति "(सं.२-६-६-१०) इति च । स्विष्टकृच्छब्दस्य निर्वचनं सौत्रामण्यां मैत्रावरुण-प्रैषमन्त्रे विस्पष्टमाम्नायते – "देवो अग्निः स्विष्टकृद्देवमिन्द्रमवर्धयत् । स्विष्टं कुर्वन्त्स्विष्टकृत् । स्विष्टमद्य करोतु नः " इति । ...<br>ब्रा.१-३-१-१२ उच्चैः स्विष्टकृतमुत्सृजति - स्विष्टकृद्विषयं मन्त्रं उच्चैरुच्चारयेत् । |
| ८८ | (१) सं १-६-३-७ प्राणापानौ मे पाहि - एक एव वायुः शरीरगतः स्थानभेदात्, कार्यभेदाच्च प्राणादिनामभिर्भिद्यते ।<br>हृदि प्राणः गुदेऽपानः समानो नाभिसंस्थितः।<br>उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः ॥<br>उच्छ्वास-निःश्वासौ प्राणव्यापारः । मलमूत्रयोः अधः पातनं अपानव्यापारः। भुक्तस्य अन्नरसस्य शरीरे साम्येन नयनं समान व्यापारः । उद्गारादिः उदान - व्यापारः । कृत्स्नासु शरीरनाडीषु व्याप्य प्राणापानवृत्त्योः सन्धिकाले शरीरस्य बलप्रदानं व्यानव्यापारः ।<br>(२) सं.६-३-७-१४ एकादश प्रयाजान् यजति, दश वै पशोः प्राणा आत्मैकादशः - प्राणशब्देन तदाधारभूतानि छिद्राण्युच्यन्ते । तानि च शिरसि सप्त, अधस्ताद्द्वे, नाभिर्दशमी, आत्मा देहः ।<br>(३) ब्रा.३-४-१८ प्राणमपानं व्यानमुदानꣳ समानं तान् वायवे – प्राणो मुखनासिकावर्ती, अपानः अधोद्वारवर्ती, व्यानः सर्वदेहव्यापी, उदानः उत्क्रान्तिहेतुः, समानः सर्वशरीरसाम्येन अन्नरसप्रेरणहेतुः । |
| ८९ | (१) सं.१-६-६-१२ कस्त्वा युनक्ति - कशब्दः प्रजापतिमाचष्टे ।<br>(२) सं.४-१-८-१३ हिरण्यगर्भः समवर्तताग्रे .. कस्मै देवाय – कस्मै प्रजापतये । |

| | |
|---|---|
| | (३) आ.१०-१-१३ हिरण्यगर्भ इत्यष्टौ – (परिशिष्टत्वेन संगृहीते भाष्ये - ) कस्मै देवाय – तं परमात्मानं विना, अन्यस्मै कस्मै हविषा हविष्मता यज्ञेन विधेम विध्यनुष्ठानं कुर्मः । न कस्मैचित्, किंतु तस्यैव प्रीत्यर्थं सर्वं श्रौतं स्मार्तं कर्म कुर्मः । |
| ९० | (१) सं.१-६-६-१४, ३-२-७-३ - यज्ञो बभूव स आ बभूव .. वयङ्ग् स्याम पतयो रयीणाम् – इदानीमनुष्ठितोऽयं यज्ञो बभूव संपूर्णोऽभूत् । ..आबभूव पुनरप्यावृत्तो भवतु । स यज्ञः प्रजज्ञे, अस्माननालस्येनानुष्ठातॄन् प्रज्ञातवान् । अस्मद्गृहे स यज्ञो वावृधे पुनःपुनरनुष्ठानेन वर्धताम् । स यज्ञोऽस्माभिरिज्यमानानां देवानामधिकं पालयिता भवतु । स यज्ञोऽस्मानप्यधिपतीनधिकमनुष्ठानस्य पालकान्करोतु । वयमपि तस्य यज्ञपुरुषस्य प्रसादात्, रयीणां यज्ञसाधनानां धनानां पतयो भूयास्म ।<br>(२) सं.१-८-१४-१२ प्रजापते ...यत्कामास्ते जुहुमस्तन्नो अस्तु वयङ्ग् स्याम पतयो रयीणाम् । यत्कामाः येन फलकामेन जुहुमः, तत्फलमस्माकमस्तु । [May we obtain that, desiring which we make oblations to thee.]<br>(३)सं.१-८-२२-६ एवा पित्रे ...बृहस्पते सुप्रजा वीरवन्तो वयङ्ग् स्याम पतयो रयीणाम् । त्वत्प्रसादात्, शोभनापत्ययुक्ताः शूरभटोपेता धनानां पतयो भवेम ।<br>(४) ब्रा.१-४-८-६ तया मदन्तः सधमाद्येषु । वयङ्ग् स्याम पतयो रयीणाम् ।<br>(५) सं.५-७-३-८ यत्काम एनां जुहोति तदेवावरुन्धे –<br>यत्फलं कामयित्वा जुहोति तत्प्राप्नोति [वसोर्धाराप्रकरणे] |
| ९१ | सं.१-६-११-२ आश्रावयेति चतुरक्षरं - .. आश्रवयेत्ययमेव पाठोऽत्रत्यः । ओश्रावयेति, श्रावयेति, ओमाश्रावयेति च त्रयं शाखान्तरीयम् । हे आग्नीध्र, यक्ष्यमाणदेवतां प्रति तुभ्यमिदं दीयत इत्याभिमुख्येन श्रावयेत्यध्वर्युणोक्ते सति, स आग्नीध्रः, अस्त्वित्यङ्गीकृत्य श्रौषडिति शब्देन श्रावयति । हे देवाः, युष्मद्विषयमिदं हविर्दानं श्रृणुतेत्यर्थः । हे होतर्यज, याज्यां पठेत्यर्थः । .. ये वयं होतारोऽध्वर्युणा यजेति प्रेषिताः, ते वयं यजामहे याज्यां पठामः । वषट्कारशब्देन वौषडित्येवं रूपो मन्त्रो विवक्षितः ।.. हविर्दीयत इति तस्य शब्दस्यार्थः ।... |
| ९२ | **सूनृता**<br>सं.१-६-११-५ यो वै सूनृतायै दोहं वेद - सूनृता समीचीना वाक् सम्यक्त्वं च तस्याः सत्यप्रिय रूपत्वम् । अत एव श्रूयते –<br>सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात्सत्यमप्रियम् ।<br>प्रियं च नानृतं ब्रूयात्, एष धर्मः सनातनः इति ॥ |

| | |
|---|---|
| | ब्रा.२-५-२-१ इ॒दꣳ रा॒ष्ट्रमावि॑श सू॒नृता॑वत् – प्रीतियुक्तं – इहास्यतां, इह युज्यतां इत्येवं रूपा वाणी सूनृता ।(प्रियसत्यात्मिका वाक् सूनृता (भ.भा.) |
| ९३ | **त्व शब्दः**<br>सं.१-६-११-८ प्र॒जाप॑तिं त्वो॒ वे॑द॒ – त्व शब्दः सर्वनामगणे पठितः, एकशब्द पर्यायः । अत एव संप्रदायविदः – "उ॒त त्व॒ःपश्य॒न्न द॑दर्श॒ वाचं॑" इत्यृचं एवं व्याचक्षते - अप्येकः पश्यन् न पश्यतीति । ...त्वोवेद त्वं वेद इत्यत्र, उभयत्र, एकपद्यम् सांप्रदायिकम् ॥ |
| ९४ | (१) सं.१-६-१२-९ अ॒ꣳहो॒मुचे॒ प्रभ॑रेमा मनी॒षां .. स॒त्याः स॑न्तु॒ यज॑मानस्य॒ कामा॑ः।<br>सं.२-२-७ पा॒प्मनोꣳह॑सो मुञ्चति - अंहशब्देन, अत्र नरकहेतुः, निषिद्धाचरणादिरूपः पाप्मोच्यते । पाप्मनोंऽहसः अत्यधिकात्पापादित्यर्थः । गृणानाः स्तुवन्तो वयं, ओषिष्ठदाव्ने ग्रीष्मकाले दावाग्निनाऽत्यन्तदग्धभूप्रदेशेभ्यो .. वृष्टिदात्रे, अंहोमुचे पापान्मोचयित्रे, मनीषां बुद्धिं प्रभरेम स्वीकुर्मः ।.. हे इन्द्र, इदं त्यज्यमानं हव्यं प्रतिगृहाण । तेन यजमानस्य कामाः सत्याः सन्तु ।<br>(२) सं.३-१-४-८ नाना॑ प्रा॒णो यज॑मानस्य प॒शुना॑ .. स॒त्याः स॑न्तु॒ यज॑मानस्य॒ कामा॑ः। .. पशुरूपमन्नं देवानामप्येतु जीवनहेतुत्वं प्राप्नोतु । तेन यजमानस्य कामाः सत्याः सन्तु ।<br>(३) सं.३-४-२-७ त्वं तु॒रीया॑ व॒शिनी॑ व॒शाऽसि॑ .. स॒त्याः स॑न्तु॒ यज॑मानस्य॒ कामा॑ः।<br>(४)सं.४-३-३-१३ पुन॑स्त्वाऽऽदि॒त्या रु॒द्रा वस॑व॒ः समिन्धतां .. स॒त्याः स॑न्तु॒ यज॑मानस्य॒ कामा॑ः। हे अग्ने, .. वसुनीथ वसूनां धनानां नीथ प्रापयितः, .. त्वं घृतेन तुष्टः सन्, तनुवोऽस्मदीय-शरीराणि वर्धयस्व । त्वयि तुष्टे सति, यजमानस्य कामाः सत्याः सन्तु । |
| ९५ | **इष्टापूर्तं** - (१) सं.१-७-३-९ स त्वे॑ष्टापू॒र्ती –<br>इष्टं आग्नेयादि श्रौतकर्म, पूर्तं वापीकूपादि स्मार्तकर्म ।<br>(२) सं.३-३-८-१३ सम॒मुष्मि॑ल्लो॒क इ॑ष्टापू॒र्तेन॑ गच्छते - इष्टं श्रौतम् कर्म, पूर्तं स्मार्तं कर्म, तदुभयफलेन स्वर्गलोके सङ्गच्छते ।<br>(३) आ.६-१-३ इ॒ष्टा॒पू॒र्तमनु॒ संप॑श्य – त्वया अनुष्ठितं श्रौतम् स्मार्तं च यत्कर्म तत् अनुसंपश्य अनुक्रमेण स्मर । दक्षिणां च ब्राह्मणेषु दत्तामनु संपश्य । ते त्वदीयं धनं बन्धुषु प्रीतिदानरूपेण बहुधा यथा विशेषेण दत्तं तमपि प्रकारमनु संपश्य । ततस्तदनुरूपं पुण्यलोकं गच्छेत्यभिप्रायः । |

| | |
|---|---|
| ९६ | **आजिधावनम्**<br>(१) सं.१-७ -७ (ब्रा.१-३-२-१ भाष्ये – आजिमस्य धावामेति -<br>ते देवाः सर्वे सहैव वाजपेयं दृष्ट्वा अनेन वाजपेयेन यजा इत्येवं विवदमानाः परस्परं प्रथमानुष्ठातृत्व लक्षणाय ज्यैष्ठ्याय नातिष्ठन्त ज्यैष्ठ्यं न अङ्गीचक्रुः । तत एवं समयं चक्रुः अस्माकं मध्ये आजि धावनेन यः कश्चित् जयति स एव ज्येष्ठोऽस्त्विति । आजिः, धावनप्रदेशस्य अवधिः भूप्रदेशः। एवं समयं कृत्वा तस्मिन्वाजपेयविषये विजयाय आजिमधावन् । तत्र तं वाजपेयं प्रति धावन् बृहस्पतिः उत्कर्षेणाजयत् । इतरेभ्यः प्रथमं अवधिं पस्पर्श । ततः प्रथमं स एव तेन वाजपेयेन इष्ट्वा स्वाराज्यं, अपारतन्त्र्यरूपं महाराज्यमगच्छत्॥<br>(२) ब्रा.१-३-६-९ सप्तदश प्रव्याधानाजिं धावन्ति – प्रकर्षेण बलाधिक्येन विध्यन्ते मुच्यन्ते बाणा यावत्परिमाणेषु देशविशेषेषु, तावत्परिमाणा देशाः प्रव्याधाः, ते च सप्तदश संख्याकाः । तेषामन्ते, अवधित्वद्योतनाय काचिदौदुम्बरी शाखा निखन्यते । तत्काष्ठयुक्तोऽवधिराजिः । तत्पर्यन्तं रथारूढा धावेयुः ।<br>(३) सं.५-३-२-१० छन्दाꣳसि पशुष्वाजिमयुः – पुरा कदाचित्, गायत्र्यादिच्छन्दोदेवताः परस्परं मात्सर्येण काञ्चिदाजिं मर्यादां प्राप्ताः । अहमेवादौ पशून् स्वीकरिष्यामीति प्रतिज्ञा मर्यादा । तदानीं बृहदाख्या च्छन्दोदेवता, देवतान्तराण्युल्लिङ्घ्य स्वयमेवाजयत् । अतस्तदीयनाम्ना पशवो बार्हता इत्येवं प्रसिद्धाः ।<br>(४)सं.७-५-९-४ आजिन्धावन्त्यनभिजितस्याभिजित्यै -<br>उत्साहोपेतानां यजमानानां काञ्चित् मर्यादां कृत्वा तत्पर्यन्तं धावनं विधत्ते – यत्पूर्वमनभिजितं असंपादितं फलं तस्य संपादनाय इदं धावनम् ।<br>(५) ब्रा.१-६-१-२९ देवा वा ओषधीष्वाजिमयुः । ता इन्द्राग्नी उदजयताम्। |
| ९७ | **वाजपेयः**<br>सं.१-७ -७ ब्रा.१-३-२-४ वाजाप्यो वा एषः – (वाजꣳह्येतेन देवा ऐप्सन् )<br>वाजो देवान्नरूपः सोमः पेयः यस्मिन् यागे, स वाजपेय इति, एकं निर्वचनम् । यस्मादेतेन यज्ञेन देवा वाजं फलरूपमन्नं आप्तुमैच्छन्, तस्मादन्नरूपः वाजः पेयः प्राप्यो येन स वाजपेयः। |
| ९८ | सं.१-७-७ आरम्भे – ब्रा.१-३-४-१२ - अपन्नदती भवति । तस्मान्मनुष्याः सर्वां वाचं वदन्ति । अपतितदन्तोपेता मेषी कार्या । लोकेऽपि अपतितदन्ताः पुरुषाः सर्वाण्यक्षराणि यथोक्तस्थानप्रयत्नोपेतान्येव, उच्चारयन्ति ।<br>सं.२-१-२-१२ अपि पश्यत । |

| | |
|---|---|
| ९९ | **घृणिः, नञर्थाः** (१) सं.१-७-१२-११ स हि घृणिः – घृणिः दीप्तिमान् प्रकाशकः<br>(२) ब्रा.२-४-१-१४ पूषेमा ... अघृणिः सर्ववीरः – अघृणिः असोढ्य-दीप्तिः । न ह्येतस्य दीप्तिः केनापि विरोधिना सोढुं शक्यते ।<br>(३) आ.१०-३७ घृणिः सूर्य आदित्यः – दीप्तित्वाद् घृणिः<br>(४) ब्रा.३-१०-९-२१ घृणिरिति द्वे अक्षरे । सूर्य इति त्रीणि । - घृणिरित्यक्षरद्वयम् । तस्य शब्दस्य दीप्यमान इति वाच्योऽर्थः। सूर्यपदे यकारात्प्राचीनो रेफ ईकारेण लुप्तेन सह मध्याक्षरत्वेन गणनीयः । ततस्त्रीण्यक्षराणि संपद्यन्ते । सुष्ठु ईरणं गतिर्यस्यासौ सूर्यः । अदितेः पुत्र आदित्यः । सोऽयमष्टाक्षरो मन्त्रः, आदावन्ते च श्रीबीजेन युक्तोऽनुसंधातव्यः ।<br>(५) आ.१०-३७ घृणिः सूर्य आदित्यो न प्रभावात्यक्षरम् -<br>भगवानादित्यो वाति वैहायसेन मार्गेण अहर्दिवं गच्छति लोकानुपकर्तुम् । .. जगत्प्रसवहेतुत्वात्सूर्यः । दीप्तित्वाद् घृणिः। क्षरणराहित्येन नित्यत्वादक्षरं अक्षरः । प्रभा न – नकार उपमार्थः । आदित्यसंबन्धिनी प्रभेव । आदित्यस्य उपमानन्तराभावात् । स्वप्रभा गोलकीभूता व्योममार्गेण गच्छति चेत्, यथा-प्रभावानयं इत्यभूतार्थं - उपमानम् । तद्रसं तस्मात् पूर्वोक्तादादित्यात् जन्यं रसं उदकं मधु मधुरं यथा तथा क्षरन्ति नद्यो वहन्ति । आदित्यलब्धवृष्ट्युदकमेव नद्यो वहन्ति, अन्यथा भूमावुदकाभावः इति भावः ।<br>["न" शब्दस्यार्थाः – तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता । अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः ॥ (१) सादृश्यम् (२) अभावः (३) अन्यत्वं (४) अल्पता (५) अप्राशस्त्यं (६) विरोधः इति ] |
| १०० | (१) सं.१-७-१३-३ इन्द्राणीं - आसु नारीषु देवस्त्रीषु मध्ये सेनास्वामिभूता-मिन्द्राणीं [इन्द्रस्य पत्नीं ]<br>(२) ब्रा.३-५-१२-६ उत ग्ना वियन्तु देवपत्नीः । इन्द्राण्यग्नाय्यश्विनी राट् । आ रोदसी वरुणानी शृणोतु - इन्द्रस्य पत्नी इन्द्राणी। अग्नेः पत्नग्नाय्यी । अश्विनोः पत्नी अश्विनी । राज्ञः सोमस्य पत्नी राट् । रुद्रस्य पत्नी रोदसी । वरुणस्य पत्नी वरुणानी । एतासामेकैका विज्ञापनामस्मदीयामाशृणोतु ।<br>(३) (सं.२-६-१०-५ ) देवानां पत्नीर्यजति |
| १०१ | सं.१-८-५-७,८ अक्षन्नमीमदन्त – अक्षन्पितरो हविरशितवन्तः । अमीमदन्त भृशं हृष्टाः, हि यतः प्रियास्तनूरवाधूषत हविर्भोजनसौकर्येण शिरःप्रभृति, अङ्गान्य-कम्पयन्त । स्वभानवो वपुषि जनितेन स्वकीयेन तेजसा भासमाना विप्रा भोजनतृप्त्या ब्राह्मणसदृशाः सन्तः, नविष्ठया मती अतिशयेन नूतनया बुद्ध्या, अस्तोषत |

| | |
|---|---|
| | भृशमिष्टमेतदित्यादिवचनैः स्तुतिं कृतवन्तः ।.. अतीतृपन्त अस्मांश्च तर्पयन्तः । अमीमृजन्त - अस्मान् शोधितवन्तः । |
| १०२ | सं.१-८-६ -९ अवाँम्ब रुद्रमदिमह्यव देवं त्र्यंबकम् - <br>हे अम्ब पार्वति, रुद्रमुद्दिश्य अवादिमहि पुरोडाशावदानं अकार्ष्म । त्रीणि अम्बकानि नेत्राणि यस्यासौ त्र्यम्बकः, तमुद्दिश्य अवादिमहि। आदरार्थं पुनर्वचनम्। ...असौ रुद्रः अस्मान् श्रेयसः अध्ययनादिभिः श्रेष्ठान् यथा करोति, वस्यसः वसुमत्तमान् यथा करोति, पशुमतो गवाश्वादियुक्तान् यथा करोति, व्यवसाययात् व्यवसाययति, शास्त्रार्थनिश्चययुक्तान् यथा करोति तदर्थं अवदानं कृतम् ।... मन्त्रस्य आशीःपरत्वं दर्शयति॥ |
| १०३ | सं.१-८-७-१ इन्द्राय शुनासीराय – शुनो वायुः, सीर आदित्यः, ताभ्यां युक्तः शुनासीरः । |
| १०४ | सं.२-१-१-१ वायुमेव स्वेन भागधेयेनोप धावति – वायोरतिशयेन क्षिप्रगामि-देवत्वात् .. वायोः स्वकीयो भागः । स्वार्थे धेयप्रत्ययः । तेन च भागधेयेन, असाधारणेन, वायुमेव उपधावति समीपं प्राप्नोति सेवते इत्यर्थः । ....यजमानं ऐश्वर्यं गमयति पूर्ववद्गमयत्येवेति योज्यम् । तदनुग्रहात् अयं ऐश्वर्यं प्राप्नोत्येव। ....नितरां युता रथे मिश्रिता इति नियुतो वायोरश्वाः तस्य सन्तीति नियुत्वान् । <br>ब्रा.१-८-६-१० वडबा दक्षिणा - वडबा यदश्वं अश्वतरं वा उभयं प्रसूते। अश्व-गर्दभजातिद्वयसंगमादुत्पन्नः अश्वतरः । <br>ब्रा.२-८-१-६ आ नो नियुद्भिः - शतिनीभिः शतसंख्यायुक्ताभिः, सहस्रिणीभिः सहस्रसंख्यायुक्ताभिश्च नियुद्भिः वडबाभिः । |
| १०५ | **ज्योगामयावी** <br>(१) सं.२-१-१-६ वायवे नियुत्वत आलभेत ज्योगामयावी ... उत यदीतासुर्भवति जीवत्येव – ज्योगामयावी दीर्घरोगयुक्तः । यस्य ज्योगामयति यं पुरुषं चिरमामयो बाधते, एतस्मात् प्राणापानौ अतिक्रान्तुमुद्यतौ । अस्मिन् प्राणापानौ दधाति चिरं स्थापयति । अपि च यदि कथंचित् भूमौ शयानो रुग्णो मुहूर्तमात्रं याममात्रं वा परेतो भवेत्, तथापि वायोरनुग्रहादागतप्राणो जीवत्येव ।[२-२-४-४ अपि पश्यत ] <br>(२) सं.२-२-४-५- एतामेव निर्वपेच्चक्षुष्कामः ...उत यद्यन्धो भवति प्रैव पश्यति [सं.१-३-१४-(२३-२८) [अग्न आयूंषि पवसे इत्यादि षण्णामृचां प्रयोगः] <br>(३) ब्रा.३-१-५-१३ श्रोत्रस्वी ह वा अबधिरो भवति - योजनादि व्यवहित- वार्तायाः श्रवणसामर्थ्यं श्रोत्रस्वित्वम् , वार्धकेऽपि बाधिर्य राहित्यं अबधिरत्वम् । |

| | |
|---|---|
| १०६ | सं.२-१-१-७ अजस्तूपरः - तूपरः शृङ्गरहितः । |
| १०७ | सं.२-१-१ (भाष्ये) "इन्द्रो मायाभिः पुरुरूपं ईयते " (ऋ.वे.६-४७-१८) इति । "मायां तु प्रकृतिं विद्धि मायिनं तु महेश्वरम्" इति । "भोगार्थां सृष्टिरित्यन्ये क्रीडार्थमिति चापरे" इति श्रुतिः। विष्णुपुराणेऽपि "क्रीडतो बालकस्येव चेष्टां तस्य निशामय" इति। व्याससूत्रमपि "लोकवत्तु लीलाकैवल्यम् " इति। |
| १०८ | सं.२-१-२-८ वसन्ता प्रातः – 'सुपां सुलुक्' वसन्तशब्दात्सप्तम्या आकारः (भ.भा.) (वसन्ते इत्यर्थः) । ब्रा.३-७-६-२२ गुहा सतीं - 'सुपां सुलुक्' इति सप्तम्या आकारः (भ.भा.) (गुहायां इत्यर्थः) । |
| १०९ | सं.२-१-१०-२ गोमृगं - गोभिः सहारण्ये चरितुं गताद् वृषभात् कस्याश्चित् मृग्यामुत्पन्नः । |
| ११० | सं.२-१-११-२० अनागास्त्वे - अस्मदीये निरपराधित्वे । |
| १११ | **मतुपो वत्वम्** सं.२-२-४-१० अग्नयेऽग्निवते – अग्निवान् "छान्दसीरः" इति मतुपो वत्वम् ।(भ.भा.) ब्रा.३-७-३-५ अग्निवान् वै दर्भस्तंबः – "छान्दसीरः" इति मतो वत्वम् [भ.भा.] ब्रा.२-४-७-२ विषूवान् विष्णो भवतु – विषूवान् श्रेष्ठो भवतु [मतो वत्वम्] ब्रा.२-५-५-४ भग प्र नृभिर्नृवन्तः स्याम – नृभिः पुत्रपौत्रादिभिः पुरुषैः नृवन्तः पुरुषवन्तः स्याम [मतो वत्वम्] [अन्यत्र - सं.१-४-४३-८ पितृमन्तं, सं.२-१-६-८ अरुणो भ्रूमान्भवति – मतुप्] |
| ११२ | (१) सं.२-२-६-७ सनिमेष्यन् - सनिं धनलाभं, धनसमृद्धो भवति । (२) सं.४-२-१-६ अग्नेऽभ्यावर्तिन्नभि न आवर्तस्वाऽऽयुषा वर्चसा सन्या मेधया प्रजया धनेन । - हे अग्ने, आयुरादिभिः सह नोऽस्मानभिलक्ष्याऽऽवर्तस्व । आयुः, अपमृत्युरहितं, वर्चः कान्तिर्बलं वा, सनिर्धनदानं, मेधा श्रुतार्थ - धारणशक्तिः, प्रजा पुत्रादिः, धनं सुवर्णम् । धनशब्देन संपादयितव्यं उच्यते, सनिशब्देन संपादितस्य बन्धुभ्यः प्रदान शक्तिरुच्यते । (३) आ.१०-१-२१ सनिं मेधामयासिषम् – सनिं कर्मफलस्य दातारं, मेधां श्रुत्यादिग्रन्थधारणशक्तिं प्रयच्छन्तमिति शेषः । |

११३ **व्यत्यासम्**

(१) सं.२-३-६(२-७) यः कामयेतान्नादः स्यादिति.... व्यत्यासमन्वाहानिर्दाहाय - (अविनाशायेत्यर्थः) ।

अयं भूलोकाधिपतिः इन्द्रो राजा, अयमन्तरिक्षाधिपतिरिन्द्रोऽधिराजः, असौ स्वर्गलोकाधिपतिरिन्द्रः स्वराट् । इमानेव लोकान्, लोकाधिपतीन्, इन्द्रराजादीन्, स्वेन भागधेयेन सेवते । यदुक्तं सूत्रकारेण - .. प्राच्यां दिशि त्वमिन्द्रेति तिस्र ऋचः व्यत्यासमन्वाह प्रथमामनूच्य मध्यमया यजेत् , मध्यमामनूच्य उत्तमया यजेत् , उत्तमामनूच्य प्रथमया यजेत् । एवं सर्वाः याज्याः पुरोनुवाक्याश्च भवन्ति ।

[सं.२-४-१४-(३-५) प्राच्यां दिशि – राजेन्द्रहविषः पुरोनुवाक्या, स्वराडिन्द्रहविषो याज्या । इन्द्रो जयाति, - राजेन्द्रहविषः याज्या, अधिराजेन्द्रहविषः पुरोनुवाक्या । अस्येदेव – अधिराजेन्द्रहविषो याज्या, स्वराडिन्द्रहविषः पुरोनुवाक्या ।]

--------------

(२) सं.२-३-७ (१-९) (सर्वपृष्ठाख्येष्टिः) देवासुराः संयत्ता आसन् . . व्यत्यास-मन्वाहानिर्दाहाय -

द्वितीय काण्डे चतुर्थप्रपाठकस्य अन्त्यानुवाके, समांनास्यमानानां अभि त्वा शूर नोनुम इत्यादीनां पञ्चानां ऋचां चतुर्थीत्वेन प्रक्षेप्यमाणायाः, कदाचन स्तरीरसी--त्यस्याश्च पूर्वोक्त त्रिधातुन्यायेन एकैकस्याः पुरोनुवाक्यात्वं याज्यात्वं च विधत्ते ..

सं.२-४-१४- (६) अभित्वा शूर – राथन्तरेन्द्रहविषः पुरोनुवाक्या, रैवतेन्द्रहविषः याज्या (इन्द्रः राथन्तरः)

(७) त्वामिद्धि हवामहे – राथन्तरेन्द्रहविषो याज्या, बार्हतेन्द्रहविषः पुरोनुवाक्या (इन्द्रः बार्हतः)

(८) यद्याव इन्द्र ते – बार्हतेन्द्रहविषो याज्या, वैरूपेन्द्रहविषः पुरोनुवाक्या (इन्द्रःविरूपः)

(९) पिबा सोममिन्द्र – वैराजेन्द्रस्य याज्या, शाक्वरेन्द्रस्य पुरोनुवाक्या (इन्द्रः वैराजः)

(१०) रेवतीर्नः सधमादः – शाक्वरेन्द्रस्य याज्या, रैवतेन्द्रस्य पुरोनुवाक्या (इन्द्रः शाक्वरः)

(११) कदाचन स्तरीरसि (सं.१-४-२२-१) – वैरूपेन्द्रस्य याज्या, वैराजेन्द्रस्य पुरोनुवाक्या (इन्द्रः रैवतः)

------------

| | |
|---|---|
| | (३) ब्रा.२-६-१३ वपादीनां याज्यानुवाक्या उच्यन्ते । त्रिपशुके वपापुरोडाशहविर्योगानां पुरोनुवाक्यास्ता एव याज्याः । तत्र तिसृणां वपानां तिस्र ऋचः, तासां चैकैकस्याः कस्यां चिद्वपायां पुरोनुवाक्या, कस्याञ्चिद् याज्येत्येवं द्विरूपा ।<br>तत्र प्रथमायां पुरोनुवाक्या, तृतीयायां याज्या – (१) अश्विना हविरिन्द्रियम्<br>प्रथमायां याज्या, द्वितीयस्यां पुरोनुवाक्या- (२) यमश्विना सरस्वती<br>द्वितीयस्यां याज्या, तृतीयस्यां पुरोनुवाक्या – (३) तमिन्द्रं पशव सचा<br>अथ त्रिषु पुरोडाशेषु पूर्ववत्, तिस्र ऋच आम्नाताः तत्र,<br>प्रथमस्य पुरोडाशस्य पुरोनुवाक्या, तृतीयस्य याज्या – (४) य इन्द्र इन्द्रियं दधुः<br>प्रथमस्य याज्या, द्वितीयस्य पुरोनुवाक्या – (५) सविता वरुणो दधत्<br>द्वितीयस्य याज्या, तृतीयस्य पुरोनुवाक्या – (६) वरुणः क्षत्रमिन्द्रियम्<br>अथ हविषस्तिस्र आम्नाताः तत्र,<br>प्रथमस्य पुरोनुवाक्या, तृतीयस्य याज्या – (७) अश्विना गोभिरिन्द्रियम्<br>प्रथमस्य याज्या, द्वितीयस्य पुरोनुवाक्या – (८) ता नासत्या सुपेशसा<br>द्वितीयस्य याज्या, तृतीयस्य पुरोनुवाक्या – (९) ता भिषजा सुकर्मणा<br>-----------------<br>(४ ) ब्रा.३-८-१५-५ व्यत्यासं जुहोति –<br>सप्तमकाण्डस्य द्वितीयप्रपाठके दशानां अनुवाकानां [सं.७-२- (११-२०)] इयमानुपूर्वी – एकस्मा एकस्मै द्वाभ्यां त्रिभ्यश्चतुर्भ्यः पञ्चभ्यो दशभ्यो विंशत्यै पञ्चाशते शताय इति, प्रथम, तृतीय, पञ्चम, सप्तम, नवमानुवाकाः अयुजः तान् आज्येन जुहुयात् । द्वितीय,चतुर्थ, षष्ठ, अष्टम, दशमानुवाकाः युजः, तानन्नेन जुहुयात् । एवं सति, आज्यं, अन्नं, पुनरपि आज्यं, अन्नं इति व्यत्यस्य हुतं भवति । स च व्यत्यासः, उभयस्याऽऽज्यस्यान्नस्य च संपादनाय भवति । |
| ११४ | सं.२-३-१०-७ जीवातवे जीवनस्यायै - जीवातवे जीवन हेत्वौषधादि संपादनाय, चिरं जीवितुमिच्छा जीवनस्या तदर्थम् । |
| ११५ | सं.२-३-१०-१० इममग्न .... जरदष्टिर्यथासत् –<br>जराया अष्टिः व्याप्तिः यस्यासौ जरदष्टिः । बाल्ये यौवने च मरणरहितो जरामायुः पूर्तिपर्यन्तां यथा व्याप्नोति तथा कुर्वन्त्वित्यर्थः । |
| ११६ | सं.२-३-१२-१ प्रजापतिर्वरुणायाश्वमनयत् .... यावतोश्वान्प्रति गृह्णीयात् - प्रतिगृह्णातीत्यस्य अन्तर्भावित ण्यर्थात्, प्रतिग्राहयति, ददातीत्ययमर्थः संपद्यते । |

| | |
|---|---|
| ११७ | सं.२-३-१३-१५ आयतनवन्तमेव – आयतनवन्तं गृहग्रामादिरूपाधारवन्तं करोति । |
| ११८ | **धन्वन्, धन्वना** (१) सं.२-४-८-५ अनु धन्वना यन्ति वृष्टयः - ताश्च वृष्टयो धन्वना मरुभूमावुदकरहितायां यन्ति प्रवर्तन्ते ।<br>(२) सं.२-५-१२-२५ धन्वन्निव प्रपा असि – धन्वन्प्रपेवासि मरुभूमौ शीतल-पानीयपूर्णशालेवासि।<br>[धन्वानि – waterless deserts, usually difficult to cross, owing to want of water during the journey]<br>(३) आ.१-१-१०-६ समुद्रस्य धन्वन् - धन्वन् निर्जले मरुदेशे ।<br>(४) आ.६-४-४ शं ते धन्वन्या आपः – धन्वनि मरुदेशे भवाः धन्वन्याः।<br>(अन्यत्र- सं.४-६-६-२- धन्वना गाः – धन्वना धनुषा ) |
| ११९ | **वृत्रः – आख्यायिका**<br>(१) सं.२-४-१२-१० सन्धां तु संदधावहै – उदरं वै वृत्रः क्षुत्खलु वै मनुष्यस्य भ्रातृव्यः --- [इन्द्रवृत्रयोः संवादः]<br>[वृत्रः :- हे इन्द्र! त्वामहं प्रविशानीति ।<br>इन्द्रः :- यदि त्वं मां प्रविशेः, किं मामेव भोक्ष्यस इति ।<br>वृत्रः :- नाहं त्वां भोक्ष्ये, किं तु त्वामिन्धीय, उदराग्निपाटवेन प्रकाशयेयं दीप्तेयं, तच्च बहुविधान्नभोगायोपयुज्येत, ततस्त्वां प्रविशानीत्युक्त्वा तमिन्द्रं वृत्रः प्राविशत् । प्रविष्टश्च वृत्रो बह्वन्नपूरणक्षमं, अवकाशरूपं, उदरमभवत् । लोकेऽपि मनुष्यस्योदरे वर्तमाना क्षुदेव अत्यन्तबाधकत्वात् सहजो भ्रातृव्यः [वैरी] । एतद्वेदनस्य क्षुदपघातः फलम् ।] |
| १२० | सं.२-४-१३-१ नवोनवो भवति जायमानः – आदित्यस्य चन्द्रदीप्तिकारणत्वात् चन्द्राभेदेन, आदित्य इह स्तूयते । चन्द्रमा जायमानः प्रतिदिनमुदयं गच्छन्नवोनवो भवति । शुक्लप्रतिपद्येककलायुक्तः, द्वितीयायां कलाद्वययुक्तः, इत्येवं कलावृद्धिक्षयाभ्यां प्रतिदिनं नूतनत्वम् । आदित्योऽपि प्रतिदिनं नूतनो भवति । स चाह्नां केतुः, चिह्नम्, तस्मिन्नुदिते सति, अहरिदमिति ज्ञायमान-त्वात् । |
| १२१ | सं.२-५-१-५ सस्त्रीषꣳसादं – स्त्रियः सम्यक् सीदन्ति विश्रम्भेणोपविशन्ति यस्यां सभायामिति स्त्रीसभाविशेषः स्त्रीसंसादः । |
| १२२ | सं.२-५-२-४ जञ्जभ्यमानात् – शीतज्वरसन्तापाभ्यां जञ्जभ्यमानात्, मुख-विदारणं कुर्वतः तस्माद्वृत्रादग्नीषोमौ निर्गतौ । |
| १२३ | सं.२-५-३-५ ओषधयः फलपाकान्ताः लतागुल्माश्च वीरुधः । |

| | |
|---|---|
| १२४ | **गतश्रीः**<br>(१) सं.२-५-४-८ - नागतश्रीर्महेन्द्रं यजेत त्रयो वै गतश्रियः शुश्रुवान्ग्रामणी राजन्यः – शुश्रुवान् वेदत्रयाभिज्ञः, वेदत्रयस्य श्रीरूपत्वात् तदभिज्ञः प्राप्तश्रीर्भवति । श्रीरूपत्वं चैवमाम्नायते – अहे बुध्निय मन्त्रं मे गोपाय । यमृषयस्त्रैविदा विदुः । ऋचः सामानि यजूँषि । सा हि श्रीरमृता सताम् (ब्रा.१-२-१-६९) इति । ग्रामाध्यक्षो ग्रामणीः । राज्ञः पुत्रो राजन्यः । तयोः प्राप्तश्रीकत्वं प्रसिद्धम् ।<br>(२) सं.५-१-९-९ यो गतश्रीः स्यात् – योऽग्निचयने प्रवृत्तो शुश्रुवान् ग्रामणी राजन्यो वा भवेत् ...<br>(३) ब्रा.२-१-८-३ यो वाऽऽगतश्रीः स्यात् – प्राप्तश्रीः शुश्रुवान् ग्रामणी राजन्यो वा ।<br>(४) आ.१०-४१-२ त्वया ब्रह्माऽऽगतश्रीरुत त्वया – आगतश्रीः प्राप्तसंपद्भवति ।<br>[अन्यत्र – सं.२-१-३-११ गतश्रीः प्रतिष्ठाकामः - शत्रुबाधेन भ्रष्टश्रीः ।<br>सं.७-२-७-५ गतश्रीः प्रतिष्ठाकामः = यो नष्टश्रीकः सन् प्रतिष्ठां कामयते .. ] |
| १२५ | **मन्त्ररहस्यवेदनं मुख्यम् – आख्यायिका**<br>सं.२-५-८ -५ नृमेधश्च परुच्छेपश्च ब्रह्मवाद्यमवदेतां ...<br>नृमेध - परुच्छेप नामानावृत्विजौ परस्परं ब्रह्मवाद्यमवदेतां मन्त्रसामर्थ्यं विषयं वादमकुरुताम् । तत्रानयोरियं प्रतिज्ञा – आवयोरुभयोर्मध्ये यतरो ब्रह्मीयान् ब्रह्मणि सामिधेनीमन्त्रे, अत्यन्तम् कुशलः, तादृशं निश्चेतुं स्वस्वमनसि सामिधेनी-मन्त्रमनुस्मरन्तौ, अस्मिन्नार्द्रे काष्ठे मथनेन अग्निं जनयावेति । तदा प्रथमं नृमेधः, आर्द्रं काष्ठमभिलक्ष्य मन्त्रमवदत् । स तन्मन्त्र-सामर्थ्याद्धूममुत्पादितवान् । परुच्छेपो मन्त्रं पठित्वाऽग्निमजनयत् । तदिदानीं नृमेधः परुच्छेपं प्रति हे ऋषे, त्वमतीन्द्रियद्रष्टाऽसीत्यभिप्रेत्य संबोधितवान् । संबोध्य चैवं पप्रच्छ - यद्यस्मात्कारणात् समावद्विद्व - आवयोः सामिधेनीवेदनं समानमेव, तथा सति कथं त्वमग्निमुत्पादितवान् न त्वहमिति । तत्र परुच्छेप उत्तरमुवाच – यद्यप्यावयोः सामिधेनीपाठस्तदर्थज्ञानं च समानं, तथाऽप्यहं तासामेव सामिधेनीनां वर्णं रहस्यं तेजो वेद त्वं तु न वेत्सि । किं तत्तेज इति तदुच्यते – घृतशब्दोपेतः पादोऽनूच्यत इति सोऽयमनुच्यमानः पादः सामिधेनीनां वर्णः सारभूतं तेजः । स पादः कस्यामृचि वर्तत इति चेत्तदुच्यते – 'तं त्वा समिद्भिरङ्गिरः' इत्येतामृचं पठेत् । तस्यामृचि 'घृतेन वर्धयामसि' इत्ययं पादो वर्तते । ततोऽनेन पठितेन पादेन सामिधेनीष्वेव ज्योतिर्जनयति । तेन त्वं पादं पठन्नपि महिमानं न जानासि । अहं तु जानामि । तस्मादार्द्रकाष्ठे मयाऽग्निरुत्पादितः । |

| | |
|---|---|
| १२६ | सं.२-५-११-१६ वाक्क मनश्चाऽऽर्तीयेतामहं देवेभ्यो हव्यं .... <br> आर्तिरतिशयः, तामिच्छेताम् । सैवाऽऽर्तिः स्पष्टीक्रियते – अहं देवेभ्यो हव्यं वहामि इति वाक्येन । ततो वाक्क मनश्चेत्येतौ हविर्वहननिर्णयाय प्रश्नं कर्तुं प्रजापतिं प्राप्नुताम् । स प्रजापतिर्वाचमब्रवीत् – हे वाक्, त्वं मनसो दूतीरेवासि न तु स्वतन्त्रा । तत्कथमित्युच्यते - यस्माल्लोके पुरुषो यत्पूर्वं मनसा ध्यायति तत्पश्चाद्वाचा वदति, तस्माद्वाचो दूती त्वमेवेति । अनन्तरं क्रुद्धा वागब्रवीत् – हे प्रजापते यद्यहं दूती, तर्हि तुभ्यं कोऽपि वाचा मा जुहोत्विति । तस्मादाघारं प्रजापतये मनसा जुह्वति । यथा मनः सङ्कल्पेन कार्यं साधयति, तथा प्रजापतिरपि । अतः सादृश्यान्मनसा होमः प्रजापतेराप्त्यै भवति । |
| १२७ | सं.२-६-१-१ तनूनपातं यजति - तनूं शरीरं न पातयति न नाशयति किं तु पालयतीति तनूनपात् ।[अग्नेर्मूर्तिः] |
| १२८ | **चतुर्गृहीतम्** – (सं.२-६-३-३, ५-१-१-४) (आ.४-२) आ.५-२-३ छन्दांꣳसि देवेभ्योऽपाक्रामन् । न वो भागानि हव्यं वक्ष्याम इति । तेभ्य एतच्चतुर्गृहीतमधारयन् । पुरोनुवाक्यायै याज्यायै । देवतायै वषट्काराय । यच्चतुर्गृहीतं जुहोति । छन्दांꣳस्येव तत्प्रीणाति । तान्यस्य प्रीतानि देवेभ्यो हव्यं वहन्ति ॥ <br> नानाविध छन्दोयुक्त पुरोनुवाक्याभिमानिनो देवाः हविर्भाग्भ्यो देवेभ्यः अपरक्ताः सन्तः अन्यत्रागच्छन् - हे देवाः भागरहितानि वयं छन्दांसि वः युष्मदीयानि हवींषि न वक्ष्यामः हविर्हवनं न करिष्यामः इति ब्रुवन्तः । तदानीं देवा विचार्य, होमकाले यच्चतुर्ग्रहणं तच्छन्दसां प्रीतिकरं भवतीति तेषां भागं अकल्पयन् । तत्र प्रथमग्रहणं पुरोनुवाक्याख्यायाः गायत्रीदेवतायास्तुष्टिकरं, द्वितीयग्रहणं याज्याख्यायाः त्रिष्टुप् देवतायास्तुष्टिकरं, तृतीयग्रहणं देवताख्यायाः जगती देवतायास्तुष्टिकरं, चतुर्थग्रहणं वषट्काराख्यायाः अनुष्टुप् देवतायास्तुष्टिकरं, अतश्चतुर्गृहीतेन होमे सति छन्दोदेवताः प्रीणन्ति । ताश्च प्रीताः सत्यः हव्यं वहन्ति ॥ |
| १२९ | सं.३-१-१-२ यत्तपस्तस्त्वा – तपःशब्देन स्नानादिनियमः अभिधीयते । आदिशब्देन दानं अनशनं वैदिकमन्त्रपाठश्च इत्येतत् त्रयं विवक्षितम् । |
| १३० | सं.३-३-२-३ इडा देवहूः – वाचमुद्यासं – (वाचं) सवनत्रये कथयामि, देवेभ्यो मधुमतीं देवानां मधुवत्प्रियां, मनुष्येभ्यः शश्रूशेण्यां मनुष्यैर्होत्रादिभिः श्रोतुमिष्यमाणां, तं तादृशीं वाचं ब्रुवाणं मां शोभायै वाचिकप्रमादाभावरूप-शोभार्थं देवा अवन्तु पूर्वोक्ता इडादयः सर्वेऽपि पालयन्तु । पितरश्चानुमदन्तु समीचीनेयं वागित्युपलालयन्तु । |

| | |
|---|---|
| १३१ | सं.३-३-४-४ एतद्वा अस्य ककुहं रूपम् यद्वृष्टिः – ककुहं रूपम् इति पादाभ्यां वृष्टिर्विवक्षिता । |
| १३२ | सं.३-३-८-३ यत्कुसीदमप्रतीत्तं – यत्कुसीदमृणमप्रतीत्तं अनर्पितं । |
| १३३ | सं.३-४-११-२० कितवासो यद्रिरिपुः – कितवासो धूर्तसमानाः स्वार्थसाधनपरा ऋत्विजो यत्कर्माङ्गं रिरिपुर्नाशितवन्तः, न दीवि न तु देवने सम्यक् व्यवहृतौ प्रवर्तन्ते । वाऽथवा यत्पापं सत्यमवश्यं कृतं ज्ञात्वैव कृतमित्यर्थः । घशब्दः पाद-पूरणे । [संहितायां दीर्घः पदकाले ह्रस्वः।] यद्व सत्यमित्यन्वयः । उतापि च यन्न विद्म यत्पापमज्ञानेन कृतमित्यर्थः । सर्वा ता, ऋत्विग्भिर्विनाशितमङ्गं, ज्ञात्वा कृतमज्ञानेन कृतं चेति यानि सन्ति, तानि सर्वाणि शिथिरेव शिथिलानीव विष्य विनाशयेत्यर्थः । अथानन्तरं हे वरुण, ते तव प्रियासः स्याम प्रिया भवेम। |
| १३४ | सं.३-५-१-२ यत्ते देवा अदधुर्भागधेयममावास्ये ..रयिं नो धेहि सुभगे सुवीरम् - हे सुभगे (अमावास्ये), सौभाग्ययुक्ते, नोऽस्मभ्यं रयिं धनं सुवीरं शोभनपुत्रं च धेहि संपादय। |
| १३५ | सं.३-५-१-३ निवेशनी ...सहस्रपोषं सुभगा रराणा – सहस्रपोषं रराणा सहस्रलक्षादिधनपुष्टिं प्रयच्छन्ती, सुभगा सौभाग्य युक्ता । वर्चसा संविदाना बलेन संयोजयन्ती, नोऽस्मान्प्रत्यागच्छतु । |
| १३६ | **त्वान्तप्रत्यये विशेषाः**<br>सं. ४-१-२-१२ भूम्या वृत्वाय नो ब्रूहि -<br>(वृत्वाय – पृथिव्या सह वरणं कृत्वा) [वृत्वा इत्यर्थे वृत्वाय]<br>सं. ४-१-५-१९ कृत्वाय सा महीमुखां -<br>(महीं महतीं उखां कृत्वाय निष्पाद्य ) [कृत्वा इत्यर्थे कृत्वाय]<br>ब्रा. २-५-२-४ दिवं गत्वाय - स्वर्गं प्राप्य [गत्वा इत्यर्थे गत्वाय ]<br>मं.प्र. १-९-५ सौभाग्यमस्यै दत्वायाथास्तं विपरेतन - (दत्वाय – दत्वा अनन्तरं अस्तं स्वगृहं विपरेतन यथेष्टं गच्छत) [दत्वा इत्यर्थे दत्वाय] । |
| १३७ | सं.४-१-६-११ ग्नास्त्वा देवीः - छन्दोभिमानिन्यो देवताः ग्नाः |
| १३८ | **सायुज्यमित्यादि**<br>(१) सं.४-१-७ -१० उद्वयं .. अगन्म ज्योतिरुत्तमम् – उत्तमं ज्योतिरगन्म । प्राप्ताः स्म । ।<br>(२) सं.५-१-८- २१ आदित्यस्यैव सायुज्यं गच्छति – सायुज्यं सहभावम् । |

| | |
|---|---|
| | (३)ब्रा.१-४-१०-११ ऋतूनामेव सायुज्यमुपैति<br>(४) ब्रा. ३-९-२०-७ सायुज्यꣳ सलोकतामाप्नोति –<br>सायुज्यं सहैकत्र वासः, सलोकतां समानलोकस्वामित्वम् ।<br>(५) ब्रा. ३-९-२०-८ सार्ष्टिताꣳ समानलोकतामाप्नोति –<br>सार्ष्टिता समानैश्वर्ययुक्तत्वम् ।<br>(६) आ.१०-१५- एतासामेव देवतानाꣳ सायुज्यꣳ सार्ष्टिताꣳ समान-लोकतामाप्नोति – देवतोपास्तावपि भावनाधिक्ये सति एतासामेवेन्द्रादीनां देवतानां सायुज्यं (सहभावं तादात्म्यं) प्राप्नोति । भावनाया मध्यमत्वे सति सार्ष्टितां समानैश्वर्यतां प्राप्नोति । मान्द्ये तु समानलोकतां (एकलोकनिवासं) प्राप्नोति । [आ.१०-८० अपि पश्यत ।] |
| १३९ | सं.४-१-९-११ द्रुन्नः सर्पिरासुतिः–द्रु शब्देन वृक्षा उच्यन्ते । "द्रुषदमित्याह । वनस्पतयो वै द्रु । (सं.१-७-१२-१,ब्रा.१-३-९- ) इति श्रुत्यन्तरात् । द्रुशब्दाभिधेया वृक्षा अन्नं यस्यासौ द्रुन्नः । सर्पिरेवाऽऽहारत्वेन सूयते प्रक्षिप्यतेऽस्मिन्निति सर्पिरासुतिः । प्रत्नः पुरातनः । होता देवानामाह्वाता । वरेण्यः वरणीयः । सहसो बलस्य पुत्रः, मथनहेतुना बलेनोत्पद्यमानत्वात् । अद्भुतः आश्चर्यरूपः । अग्निरेतैर्विशेषणैःप्रशस्यते । |
| १४० | सं.४-१-१०-१ सं.५-१-१०-१ अपरशुवृक्णं दहति - परशुच्छेदरहितं काष्ठं न ह स्म वै दहति सर्वथा दहति। |
| १४१ | सं.४-१-१०-६ दꣳष्ट्राभ्यां मलिम्लून् – मलं पापाधिक्यं एषामस्तीति मलिनाः। तथाविधा भूत्वा म्लोचयन्ति चौर्यं कुर्वन्तीति मलिम्लवः तान् । |
| १४२ | सं.४-१-१०-१४ सुपर्णोऽसि गरुत्मान् – हे अग्ने, त्वं गरुड इव पक्षिरूपोऽसि । अत अस्माकं प्रति गच्छ । |
| १४३ | सं.४-२-१-११ ध्रुवस्तिष्ठाविचाचलिः – अविचाचलिः अत्यन्तं चलनरहितः । |
| १४४ | सं.४-४-१० कृत्तिका नक्षत्रमग्निर्देवता – विचृतौ नक्षत्रं पितरो देवता – विचृतशब्दो मूलवाची । ..पितृशब्दोऽत्र निर्ऋतिवाची।<br>सं.५-४-१-७ सुकृतां वा एतानि ज्योतीꣳषि यन्नक्षत्राणि – ये शोभनं शास्त्रविहितं कर्म कुर्वन्ति ते सुकृतिनः । तेषामेतानि दिवि दृश्यमानानि नक्षत्ररूपाणि ज्योतींषि। ते हि पुण्यकृतः स्वर्गं गत्वा भासमानविग्रहास्तान्याप्नुवन्ति । |
| १४५ | सं.४-६-४ आशुः शिशानः – अप्रतिरथसूक्तम् – सं.५-४-६-१४ - देवा विजयप्रदत्वेन, अप्रतिरथाख्यमेतत्सूक्तमपश्यन् । तेनैव यजमानः सर्वान्भ्रातृव्यान् .. |

| | |
|---|---|
| | जयति। .. दशर्चं भवति - उद्धर्षयेत्यादीनां पञ्चानां विकल्पार्थत्वात्, सूक्तगता ऋचो दशैव संपद्यन्ते। |
| १४६ | सं.४-६-५-१८ ऋतश्च सत्यश्च [पुँल्लिङ्ग प्रयोगः ] |
| १४७ | सं.४-६-६-(९-११) स्वादुषꣳसदः पितरो वयोधाः - इति तिसृभिः पितृनुपतिष्ठते । - येऽस्मदीयाः पितरः सन्ति, त एतैर्विशेषणैर्विशिष्टाः । ..स्वादुषंसदः – अस्माभिः समर्पिते स्वादुन्यन्ने सम्यक्सीदन्ति तेन तृप्ताः, वयोधाः – अस्मदीयस्य वयस आयुषः स्थापयितारः, कृच्छ्रे व्यसने प्राप्ते सति रक्षार्थं श्रीयन्ते प्राणिभिः सेव्यन्त इति कृच्छ्रेश्रितः, शक्तीवन्तः शक्तियुक्ताः, गभीरा अगाधबुद्धयः, चित्रा विविधा हस्त्यश्वादिरूपा सेना येषां ते चित्रसेनाः, इषुभिर्योद्धुमतिबला इषुबलाः, अमृद्धाः परैर्योद्धुमशक्याः, संविद्यमानो लोके प्रसिद्धो यः शूरः – तस्मादप्यतिशूराः सतोवीराः, उरवो विस्तीर्णा धनसेनादिसमृद्धाः, व्रातं परकीयभटानां संघातं सहन्ते इति व्रातसाहाः, ब्राह्मणासः ब्रह्म वेदस्तदर्थपराः, सोम्यासः – अस्मासु अनुग्रहपरा इत्यर्थः । यथैते पितरस्तथा द्यावापृथिवी उभे अपि, अनेहसा – अनेहसि सर्वस्मिन्काले नोऽस्मान्प्रति शिवे शान्ते अनुग्रहपरे भवतामिति शेषः। |
| १४८ | सं.४-७-४ सग्धिश्च मे सपीतिश्च मे – बन्धुभिः सह भोजनं, सहपानम् ।<br>ब्रा.२-६-१३-५ सग्धिꣳ सपीतिं |
| १४९ | **विहव्यम्** - (१) सं.४-७-१४ - ममाग्ने वर्चो विहवेष्वस्तु - इत्यनुवाकः ।<br>[अस्य ब्राह्मण भागः – सं.३-१-७-१० - विश्वामित्रजमदग्नी वसिष्ठेनास्पर्धेताम् – आ नो भद्रा इत्येतन्नित्यप्रयोगे वैश्वदेव शस्त्रगतं सूक्तं, तस्य स्थाने ममाग्ने वर्चो विहेष्वस्वस्त्वित्येतत्सूक्तं मात्सर्यग्रस्तः प्रयुञ्जीत । तेन प्रतिस्पर्धिनः इन्द्रियसामर्थ्यं वृङ्क्ते विनाशयति । यथा जमदग्निः वसिष्ठस्य वीर्यं तद्वत् ।--- -<br>(२) सं.५-४-११-१० विश्वामित्रजमदग्नी वसिष्ठेनास्पर्धेताम् – इत्यादि विहवशब्दैरुपेतैः मन्त्रैः उपधेया इष्टका विहव्याः । द्वादशोपदधाति - यद्यपि, अत्र मन्त्राणां दशत्वान्मन्त्रकर्मणोः समसंख्या नास्ति, तथापि मन्त्रावृत्त्या कर्मसंख्या पूरणीया । .. पूर्वभागस्यान्तिमं पञ्चमं उत्तरभागस्य अन्तिमं दशमं च, आवृत्त्या वर्धयित्वा सङ्ख्या पूरणीया ।<br>(३) सं.५-४-११-१३- अष्टावष्टावन्येषु धिष्णियेषूपदधाति – प्रशास्त्रीय, पोत्रीय, नेष्ट्रीय, अच्छावाकीयादीनि अन्यानि धिष्णियानि, तत्र नवम दशम मन्त्रलोपेन अष्ट सङ्ख्या अवगन्तव्या । |

| | |
|---|---|
| | (४)सं.५-४-११-१४ षण्मा॒र्जा॒लीये॑ – दैविकस्य पितृकस्य च कस्मिंश्चिद्दतौ कर्तव्यत्वात्, ऋतूनां देवत्वं, पितृत्वं च। अत्र सप्तमादीनां चतुर्णां मन्त्राणां लोपः । [सं १-३-३-८ शु॒न्ध्यूर॑सि मार्जा॒लीयः॑ - हे मार्जालीय, त्वं शुन्ध्यूः शोधकः पात्रप्रक्षालनेन लेपमार्जनस्थानभूतोऽसि (सं.६-३-१-७) अपि पश्यत । ] |
| १५० | सं.४-७-१५-१ प्र॒वि॒वि॒शि॒वाꣳसमीमहे – जाठराग्निरूपेण प्रविष्टवन्तं तमग्निमीमहे वयं प्राप्नुमः । |
| १५१ | सं. ५-१-९-१४ स क्रु॒मु॒कं प्रावि॑शत्- क्रुमुकं अल्पकाष्ठशकलम् । <br> ब्रा.१-४-७-३ ए॒षा वा अ॒ग्नेः प्रि॒या त॒नूः । यत्क्रु॒मु॒कः। - तक्षणेन निष्पन्नो लघुः शकलः सोऽयं क्रुमुकः । |
| १५२ | सं. ५-४-५-५ ग्र॒मु॒ष्टिनावो॑क्षति - गुरुः स्थूलो दर्भमुष्टिः |
| १५३ | **संवत्सरभेदाः** <br> (१) सं.५-५-७-४ यत्ते॑ रुद्र ...संवत्स॒रेण॒ नम॑स्करोमि, परिवत्सरेण, इदावत्सरेण, इदुवत्सरेण, वत्सरेण – एकस्मिन् संवत्सरे निरन्तरं नमस्करोमि । प्रभव, विभवादीनां षष्टिसंवत्सराणां मध्य एकैकस्मिन्पञ्चके स्थिताः संवत्सराः क्रमेण संवत्सर, परिवत्सर, इदावत्सर, इदुवत्सर, वत्सरशब्दैः, विवक्षिताः । प्रथमः संवत्सरः, द्वितीयः परिवत्सरः, तृतीय इदावत्सरः, चतुर्थ इदुवत्सरः, पञ्चमो वत्सरः । [ब्रा.३-४-११, आ.४-१९ -१ अपि पश्यत] <br> (२) आ.१०-७९-३ सं॒व॒त्स॒राश्च॑ परिवत्स॒राश्च॑ - <br> चान्द्राणां प्रभवादीनां पञ्चके पञ्चके युगे । <br> सं परीदान्विदीत्येतच्छब्दपूर्वास्तु वत्सराः ॥ |
| १५४ | सं.५-५-१० स॒मीची॒ नामा॑सि - षट् सर्पाहुतीः, हे॒तयो॒ नाम॑स्थ - षट् महाहुतीः यथा सर्पाहुतीः । |
| १५५ | सं.७-५-२५ यो वा अश्व॑स्य – सर्वजगदात्मकत्वेन, अश्वः स्तूयते । अथवा, विराड् रूपेण, अश्वोपासनप्रतिपादकोऽयमनुवाकः । हयार्ववाज्यश्वा अवान्तर-जातिविशेषाः, तत्तद्रूपेण देवादीन्वहन्ति । एवंविधस्य विराड्रूपस्याश्वस्य समुद्र एव योनिः कारणम् । सम्यक् उद्रवति, उत्पद्यते जगदस्मादिति समुद्रः परमात्मा ।.. स एवास्य बन्धुः स्तम्भः स्थितिहेतुरित्यर्थः। एवमुपासिता पाप-क्षयद्वारा विराड्रूपं प्राप्नोति ।'तं यथोपासते तथैव भवति' इति श्रुत्यन्तरात् । विराट् प्राप्तिश्च क्रममुक्तिहेतुः ।.. इत्यशेषमतिमङ्गलम् ॥ |

| | |
|---|---|
| १५६ | ब्रा.१-२-१-३७ दैवीं वाचं यच्छामि – दैवीं देवसंबन्धिनीं वाचं नियतां करोमि संस्कृत भाषयैव व्यवहरामीत्यर्थः |
| १५७ | **संख्येयशब्दः**<br>ब्रा.१-३-६-९ सप्तदश सप्तदश दीयन्ते । सप्तदशः प्रजापतिः ।<br>[सप्तदश इत्यन्तोदात्तः संख्येयशब्दः । प्रायेण संख्येयशब्दाः अन्तोदात्ता भवन्ति ।] |
| १५८ | ब्रा.१-६-८-२२ कशिपु कशिपव्याय -<br>कशिपु तूलपूरितशय्यादि । कशिपुप्रियः कशिपव्यः पिता । |
| १५९ | ब्रा.१-६-९-१७ ह्रीका हि पितरः - ह्रीकाः लज्जाशीलाः |
| १६० | ब्रा.१-७-१०-१२ अपराजायिनमेवैनं करोति – कदाचिदपि पराजयरहितमेव करोति । |
| १६१ | ब्रा.१-८-५-१ स यत्प्रथमं निरष्ठीवत्। तत्कलमभवत्। यद् द्वितीयम् । तद्बदरम् । यत्तृतीयम् । तत्कर्कन्धु । -<br>स चेन्द्रो वक्त्रेण त्रिवारं निष्ठीवनं कृत्वान् । तेन द्रव्यत्रयमभूत् । प्रथमनिष्ठीवनेन कलं बालखर्जूरफलमभूत्। बदरं क्रमुकपरिमितं सूक्ष्मं बदरीफलम्। कर्कन्धु हरीतकीपरिमितं स्थूलं बदरीफलम् । |
| १६२ | ब्रा.२-१-५-९ सायंयावानश्च वै देवाः प्रातर्यावाणश्चाग्निहोत्रिणो गृहमागच्छन्ति–<br>सायंकाले यान्त्यग्निहोत्रिणो गृहं गच्छन्तीति सायंयावानः । एवं प्रातर्यावाणः । |
| १६३ | ब्रा.२-३-२-१ दक्षिणां प्रतिग्रहीष्यन्थ्सप्तदशकृत्वोऽपान्यात् । आत्मानमेव समिन्धे । तेजसे वीर्याय । - अपान्यात् वायोरन्तराकर्षणरूपं निश्वासं कुर्यात् । तेन शरीरमध्ये स्थितो भवति । तेजः प्रतिग्रहयोग्यता वीर्यं, प्रतिग्रहदोष-निवारणसामर्थ्यं, तदुभयमनेन निश्वासेन मध्ये तिष्ठति । |
| १६४ | **कल्पान्तरगतः**<br>(१) ब्रा.२-३-४-१ तस्य वा अग्नेर्हिरण्यं प्रतिजग्रहुषः – पुरा कदाचिदग्निर्मन्त्रमन्तरेण हिरण्यं प्रतिगृहीतवान् । तस्याग्नेः शरीरवर्ति यदिन्द्रियं वीर्यं तस्यार्धमग्नेः सकाशादपगतम् । तदानीं स्वकीयं बलक्षयं दृष्ट्वा तत्परिहाराय “राजा त्वा वरुणो नयतु देवि दक्षिणेऽग्नये हिरण्यम्” इत्येतेनैव मन्त्रेण प्रत्यगृह्णात् । तत्राग्निना पठ्यमाने मन्त्रे योऽयं चतुर्थ्यन्तोऽग्निशब्दः तस्य कल्पान्तर-गतोऽग्निरित्यर्थः ।<br>(२) ब्रा.३-१-४-१ - अग्निर्वा अकामयत – अस्मिन्कल्पे सर्वेषां प्राणिनां दाहपाक-प्रकाशकारी योऽयमग्निर्दृश्यते, सोऽयमग्निः पूर्वस्मिन्कल्पे मनुष्यः सन्, |

| | |
|---|---|
| | देवत्वपदप्रापकं कर्मानुष्ठाय, अस्मिन्कल्प एतज्जन्म लब्धवान्। अतः पूर्वस्मिन्कल्पे स मनुष्यो भाविनीं संज्ञामाश्रित्य, अग्निरिति व्यपदिश्यते । .. स चाग्निशब्देन व्यवह्रियमाणो मनुष्यः कर्माधिकारी सन्नेवमकामयत । अहं जन्मान्तरे देवानां मध्ये बह्वन्नभक्षकः स्यामिति, एवं कामयमानः स मनुष्यः तस्मिन् कल्पे वर्तमानाय नक्षत्रस्वामिनेऽग्नये कृत्तिकानक्षत्राय च मिलित्वा पुरोडाशमष्टाकपालमेतं निरवपत् । सोऽपि नक्षत्रस्वामी वह्निः, ततः पूर्वस्मिन्कल्पे मनुष्य एव सन् विशिष्टं कर्मानुष्ठाय उत्तरकल्पे नक्षत्रस्वामिरूपं वह्नित्वं प्राप्तः । एवं सति, अग्निः अग्नये निरवपदित्यत्र न काप्यनुपपत्तिः । अनेनैव न्यायेन वक्ष्यमाणास्वपीष्टिषु यजमानदेवतयोरेकविधं नाम कल्पभेदेन व्यवस्थापनीयम् । |
| १६५ | ब्रा.२-३-४-७ अप्राणत् प्रतिगृह्णाति –अप्राणत् प्राणवायुरहितं अचेतनं शकटम्। |
| १६६ | ब्रा.२-३-५-९ आर्यावसतिरिति वै तमाहुः .. । आर्याः पूज्या गुर्वादयः, तेषामावसतिः साकल्येन निवासहेतुः इत्यनेनैव शब्देन लोके व्यवहरन्ति यं प्रशंसितुं इच्छन्ति ।.. आर्यावसतिशब्दो निरतिशयप्रशंसावाची । |
| १६७ | ब्रा.२-३-६-१ कुसिन्धमुपौहन् – कुसिन्धं शिरोव्यतिरिक्तं देहमुपायन्। कुसिं आत्मशोकं दधातीति कुसिन्धः । |
| १६८ | ब्रा.२-४-१-१ जुष्टो दमूनाः – दमूनाः शत्रूणां दमयिता अग्निः। |
| १६९ | ब्रा.२-४-१-२ संजास्पत्यं - जास्पत्यं जायापतिभावं सुयमं सुष्ठु नियतं समाकृणुष्व संपादय ।<br>मं.प्र.१-१-२ संजास्पत्यं - |
| १७० | ब्रा.२-४-२-१० सगुः साश्वः - गोसहितः, अश्वसहितः।<br>ब्रा.३-८-५-४ बहुग्वै बह्वश्वायै- बहवः गावः यस्या विशः सा बहुगुः। |
| १७१ | ब्रा.२-४-३-२२ सुमज्जानये विष्णवे – सुष्ठु माद्यन्ती हृष्यन्ती लक्ष्म्याख्या जाया यस्यासौ सुमज्जानिः। |
| १७२ | **भगवन्नामजपः**<br>ब्रा.२-४-३-२३ तमु स्तोतारः पूर्व्यं यथा विद ऋतस्य । गर्भं हविषा पिपर्तन । आऽस्य जानन्तो नामचिद्विवक्तन । बृहत्ते विष्णो सुमतिं भजामहे ॥ - हे स्तोतारः पुरुषाः, पूर्व्यं जगतः पूर्वमेव अवस्थितं तमु तमेव विष्णुं यथा विद यथावज्जानीत । ज्ञात्वा च, ऋतस्य सत्यस्य देवस्य गर्भं गर्भवदन्तःस्थितं वेदप्रतिपाद्यं, तादृशं विष्णुं हविषा पिपर्तन पालयत पूरयत वा । तत्राशक्तौ यूयं, अस्य विष्णोः नामचिद् केशवनारायणादीनि नामानि जानन्तः शास्त्राचार्यमुखादवगच्छन्तः |

| | |
|---|---|
| | आविवक्तन समन्तात् विशेषेण ब्रूत निरन्तरं जपत । हे विष्णो ते सुमतिं त्वदीयामनुग्रहबुद्धिं बृहद्भजामहे निरन्तरं सेवामहे । |
| १७३ | ब्रा.२-४-५-३ कुण्डपाय्यः [सोमयागविशेषः] । |
| १७४ | ब्रा.२-४-५-७ मार्डीकं धेहि - अतिशयेन सुखसाधनभूतं रयिं धेहि |
| १७५ | ब्रा.२-४-६-३१ गौरी मिमाय सलिलानि तक्षती – परमे व्योम्नि ब्रह्मणि प्रतिष्ठिता गौरी गौरवर्णा वाग्देवी, सृष्ट्युपक्रमे सलिलसदृशानि वर्णपदवाक्यानि तक्षती सृजन्ती मिमाय शब्दमकरोत्। प्रथमं प्रणवात्मना, एकपदी ब्रह्मणो मुखान्निर्गता । अनन्तरं व्याहृतिरूपेण सावित्रीरूपेण च द्विपदी । ततो वेदचतुष्टयरूपेण चतुष्पदी । ततो वेदाङ्गैः षड्भिः पुराणधर्मशास्त्राभ्यां चाष्टापदी । ततो मीमांसा, न्याय, साङ्ख्य, योग, पाञ्चरात्र, पाशुपत, आयुर्वेद, धनुर्वेद, गान्धर्वैः, नवपदी । ततोऽनन्तैर्वाक्यसंदर्भैः सहस्राक्षराऽनन्तविधा बभूवुषी संपन्ना । |
| १७६ | ब्रा.२-६-८-५ कवष्यो धावमानाः – कवष्यः कवाटवत्यः, धावमानाः प्रवेशनिर्गमनरूपगतिमत्यः । शुद्धिमत्यो वा (भ.भा.) । |
| १७७ | ब्रा.२-७-६-९ महान् महित्वे तस्तभानः - महान् विद्याऽऽचारादि गुणैः, अधिकः, महित्वे पूज्यत्वे तस्तभानः स्थिरं वर्तमानः । |
| १७८ | ब्रा.२-७-१७-८ यत्सीमन्तं कङ्कतस्ते लिलेख –<br>ते तव वपनात्पुरा कङ्कतः केशलघिमा संपादकः शलाकाविशेषो यत्सीमन्तं लिलेख शिखावशेषाय वपनीयस्थापनीययोः केशभागयोः विभागं चकार । |
| १७९ | ब्रा.२-७-१८-१ मरुतो नापाचायन् - न अपाचायन् करप्रदानेन पूजां न अकुर्वन् । [करः = tax] |
| १८० | ब्रा.२-७-१८-७ कप्लकौ - कपिवत् गमनसमर्थौ । |
| १८१ | ब्रा.२-८-१-८ यजाम देवमधि नो ब्रवीतु – अस्माभिरिष्टः प्रजापतिः, देवेषु मध्ये नोऽस्मानधिकान्ब्रवीतु । |
| १८२ | ब्रा. २-८-९-२ उभावन्तौ परियात अम्या (परियातः इति पदम्, परिक्रमणं कुर्वतः) । |
| १८३ | ब्रा.३-१-५-९ दृढोऽशिथिलः स्यामिति –<br>स्वस्य कार्यक्षमत्वं दार्ढ्यं , परैः अभिभवाभावः अशैथिल्यम् |
| १८४ | ब्रा.३-६-१-१० त्वे वसु सुषणनानि सन्तु –<br>सुषणनानि सुष्ठु दानयोग्यानि वसूनि धनानि त्वे त्वयि सन्तु |
| १८५ | ब्रा.३-६-८-५ अहान्यस्मै सुदिना भवन्तु – |

| | |
|---|---|
| | अस्मै यजमानाय अहानि दिनानि सुदिना शोभनदिनानि सुप्रातस्त्ववन्ति सम्यग् निर्वर्तितयागानि भवन्तु (भ.भा.)॥ |
| १८६ | ब्रा.३-८-१०-१ तस्यं तेपानस्यं – तपः कृतवतः । |
| १८७ | ब्रा.३-८-२३-२ भीष्मं भावुकम् – भयानकं भवितुं योग्यं भवति । |
| १८८ | ब्रा.३-९-२-५ दशत आलभ्यन्ते – दशानां पशूनां वर्गः दशत् । |
| १८९ | ब्रा.३-९-४-१३ भूरिति महिषी । भुव इति वावाता । सुवरिति परिवृक्ती। - राज्ञः पत्न्यः उत्तम मध्यम अधमा महिष्यादि शब्दैरुच्यन्ते । |
| १९० | ब्रा.३-९-१५-८ खलतेर्विक्लिधस्यं - खलतिः केशरहितमस्तकोपेतः, विक्लिधः स्वेदनशीलशरीरः । |
| १९१ | ब्रा.३-९-२२-१ एकं वा एतद्देवानामहः। यत्संवत्सरः । - योऽयमस्माकं संवत्सरः कालः देवानां एकमेवाहः । |
| १९२ | ब्रा.३-१०-९-१ तान् व्यद्यत् । यद्व्यद्यत् । तस्माद्विद्युत् । तमवृश्चत । यदवृश्चत् । तस्माद्वृष्टिः। <br> प्रजापतिसृष्टा ये देवास्ते पाप्मना सन्दिताः संयुक्ता एवोत्पन्नाः । स प्रजापतिः तान्देवान्पाप्मनः सकाशात् व्यद्यत् वियोजितवान् । अत एव व्यद्यदिति व्युत्पत्या तस्या देवताया विद्युन्नामसंपन्नम् । तं च पाप्मानमवृश्चत् च्छिन्नवान् । अवृश्चदित्यनयैव व्युत्पत्या वृष्टिनाम संपन्नम् । यस्मादेवं, तस्माद्यत्र कर्मण्येते विद्युद्वृष्टिदेवते आभिमुख्येन प्राप्नुतः, तत्रास्य यजमानस्य पापं वियोजयतो विच्छिन्नं च कुरुतः । |
| १९३ | ब्रा.३-११-२ त्वमंग्ने रुद्रो असुरो महो दिवः। - "त्वमग्ने रुद्र इति शतरुद्रीयस्य रूपम्" ।.. अस्याग्निस्वरूपस्य रुद्रस्य मूर्तिविशेषा देवास्त्रय-स्त्रिंशत्संख्याकाः । .. तथाविधा हे देवाः, देवेषु श्रयध्वं अन्योन्यमाश्रयद्ध्वम् मदनुग्रहाय परस्परं प्रीतियुक्ता भवन्तु । .. त्रयस्त्रिंशत्संख्याकानां देवानां मध्य एकैकस्य त्रयो मूर्तिविशेषाः । तत्र प्रथमस्य देवस्य मूर्तिविशेषाः प्रथमा इत्युच्यन्ते । द्वितीयस्य देवस्य द्वितीयाः । हे प्रथमे देवा द्वितीयेषु श्रयद्धं द्वितीयैर्देवैः सह प्रीतियुक्ता भवत । एवं द्वितीयादिषु त्रयस्त्रिंशान्तेषु योजनीयम् । त एते मुख्यदेवा त्रिरेकादशास्त्रिगुणित्ता एकादशसंख्याका लोकत्रयवर्तिनः । .. ते च त्रिविधा अपि पुनस्त्रिस्त्रयस्त्रिंशा अवान्तरमूर्तिभेदादेकैकस्य मूर्तित्रयमित्येवं त्रिगुणितास्त्रयस्त्रिंशत्संख्याका भवन्ति । तावन्तो हे देवा उत्तरे भवतोत्कृष्टा भवत । .. उत्तरमुत्कृष्टं वर्त्मा मार्गो येषां त उत्तरवर्त्मानः स्वर्गमार्गप्रापकाः । उत्तरा |

| | |
|---|---|
| | उत्कृष्टाः सत्वानः सात्विकमूर्तिविशेषा येषां ते उत्तरसत्वानः ।.. तथाविधा हे देवाः, यत्कामो यद्विषयकामनायुक्तः सन्, अहमिदं द्रव्यं जुहोमि, तत्फलं मे मदर्थे समृध्यतां समृद्धं भवतु । युष्मत्प्रसादाद्वयं भूर्भुवःस्वर्लोकत्रये रयीणां पतयो धनस्वामिनः स्याम, स्वाहुतमिदमस्तु । |
| १९४ | ब्रा.३-१२-२-९ तमनुवित्तिरब्रवीत् – अन्विष्य विद्यते लभ्यते अपेक्षितः पदार्थः यया क्रियया, सेयं अनुवित्तिः ।<br>ब्रा.३-१२-४-७ अपाघा अनुवित्तयो नाम । अपहन्यन्ते स्वर्गप्रतिबन्धाः सर्वेऽपि याभिरिष्टिभिः ता अपाघाः । |
| १९५ | ब्रा.३-१२-५-३ स्वर्गस्य लोकस्याञ्जसायनिः स्रुतिः – अञ्जसा - अयनिः अनायासेन प्राप्तिहेतिः स्रुतिः मार्गः। |
| १९६ | ब्रा.३-१२-५-४ स्पृणोत्यात्मानं – स्पृणोति तत्तदपेक्षितफलसंपादनेन प्रीणयति । |
| १९७ | ब्रा.३-१२-५-५ अधिवादं जयति – स्वस्मादधिकेन पुरुषेण सह विद्याविषये वादं कृत्वा जयति । |
| १९८ | ब्रा.३-१२-५-१४ अन्विष्टकं दक्षिणा ददाति । सर्वाणि वयांसि । - प्रतीष्टकमेकैका गौर्देया । तासु गोषु सर्वापि वयांसि संपादनीयानि – "एकहायनप्रभृत्या पञ्चहायनेभ्यो वयांसि" इति । |
| १९९ | **अबीष्टकाः**<br>आ.१ – (उपोद्घाते) अरण्याध्ययनादेतत्, आरण्यकमितीर्यते । अरण्ये तदधीयेतेत्येवं वाक्यं प्रवक्ष्यते॥<br>बोधायने कल्पे – एतेनारुणकेतुको व्याख्यातो यावन्मन्त्रमबीष्टकाः । अब् रूपा इष्टका अबीष्टकाः ।.. हस्तग्राभमबीष्टका उपदध्यात् । हस्तग्राभं हस्तग्राहं हस्तेन गृहीत्वा जलमित्यर्थः । |
| २०० | आ.१-८-३ आपः सूर्ये समाहिताः - मनुना तावदेवं स्मर्यते - अप एव ससर्जादौ तासु वीर्यमवासृजत्। तदण्डमभवद्धैमं सूर्यकोटिसमप्रभम् ॥ |
| २०१ | **अक्षरविपर्ययः**<br>आ.१-८-२१ कश्यपः पश्यको भवति । - आद्यन्तयोः अक्षरयोः व्यत्यासेन पश्यको भवति ।<br>[ हिंसि धातोः सिंह शब्दः वश कान्तौ शिवः स्मृतः।] |

| | |
|---|---|
| | [यस्ते ददाति रवमस्य वरं ददासि यो वा मदं वहसि तस्य दमं विधत्से । इत्यक्षरद्वयविपर्यय केलिशील किं नाम कुर्वति नमो न मनः करोषि ॥] |
| २०२ | आ.१-११-१० नाम् नामैव नाम मे॑ – अत्राद्यौ द्वौ नामशब्दौ नकारान्तौ नामधेयमाचक्षाते । तृतीयो नामशब्दः प्रसिद्धिवाचकमव्ययम् । |
| २०३ | आ.१-११-१२ स्त्रियः सतीः । - या लोके प्रसिद्धाः स्त्रियः सतीः सद्रूपा गुरुकटाक्षेण ...सद्वस्तु बुद्धा तदनुभवेन तद्रूपा वर्तन्ते, ता उ ता अपि स्त्रियः मे मते पुंस आहुः ब्रह्मविदः पुरुषान् कथयन्ति । यद्यपि स्तनवृद्ध्यादि स्त्रीलक्षणं दृश्यते, तथाऽपि पुरुषस्योचितं तत्वज्ञानमस्तीति पुरुषलक्षणसद्भावात् पुरुषत्वं तासां अभिज्ञाः कथयन्ति । ये तु शरीरे श्मश्रुप्रभृतिभिः पुरुषलक्षणैर्युक्ता अपि पुरुषस्योचितं तत्वज्ञानं न संपादयन्ति, ते स्त्रीणामुचितेन मोहेनोपेतत्वात् स्त्रिय एवेत्यभिप्रायः । यथा स्त्रीपुरुषविभागो लोकविपरीत एवं अन्धानन्धविभागोऽपि द्रष्टव्यः । अक्षण्वान्, चक्षुरिन्द्रिययुक्तः पश्यन्नीलपीतादिरूपं पश्यन्नपि न विचेतद्विवेकेन सद्वस्तुतत्वं न जानाति चेत्, सोऽयमन्ध एव । मांसदृष्टिरहितोऽपि स्वरूपतत्वाभिज्ञश्चेत्, सोऽयं चक्षुष्मानेवेत्यपि द्रष्टव्यम् । यथाऽयमलौकिकान्धानन्धविभागः, एवं पितृपुत्रविभागोऽपि अलौकिकः कश्चिद्द्रष्टव्यः । लोके यत्र पिता न जानाति पुत्रस्तु कविः वेदशास्त्रपारङ्गतः तत्र स पुत्र इमा एतानि दृश्यमानानि सर्वाणि भूतानि स्वात्मत्वेन जानाति, तदानीं यः पुत्रः ता विजानात्, तानि सर्वाणि भूतानि स्वात्मतया जानाति, स पुत्रः सवितुः उत्पादकस्यापि पिता सत् पिता भवति । ज्ञानोपदेशेन पालयितुं समर्थत्वात् । किं बहुना, तत्वज्ञानमेव प्रशस्तं, अज्ञानं निकृष्टमिति तात्पर्यार्थः । |
| २०४ | आ.१-१२-९ सुब्रह्मण्योः३ सुब्रह्मण्योः३ सुब्रह्मण्योम् – शोभनं ब्रह्म सुब्रह्म, वेदः, तस्मै हितः सुब्रह्मण्य इन्द्रः । ओमिति संबोधनार्थः । हे सुब्रह्मण्येति । त्रिरभिधानमादरार्थम् । .. हे इन्द्र, परमैश्वर्ययुक्त, इह कर्मण्यागच्छ । हरिवो हरिनामकावश्वावस्य विद्येते इति हरिवांस्तस्य संबोधनम्, शुक्लकृष्णपक्षदेवावेव तदीयाश्वत्वं प्राप्य हरिशब्देनोच्यते, तादृश हे हरिव इह कर्मण्यागच्छ । मेधातिथेर्मेधातिथिर्नामकः कश्चिदृषिः कण्वस्य पुत्रः तत्संबन्धिन् , हे मेषरूप, वृणश्वो नाम कश्चिन्मुनिस्तस्य संबन्धिनी या मेनाकाख्या दुहिता तां मन्यमाने तस्मिन्नर्थे वृषणश्वस्य मेने इति संबुध्यन्तं प्रयुक्तम्। गौरावस्कन्दिन्गौरमृगो भूत्वा यागमध्ये समागत्य सोमं पीत्वा हे विनाशक । .. अहल्यायै जार, अहल्या गौतमस्य भार्या तस्या इन्द्रो जार इति पुराणे प्रसिद्धम् । कौशिकब्राह्मण कौशिकनामा कश्चिन्महर्षिः, |

| | |
|---|---|
| | तस्य समीपे ब्राह्मणवेषेण समागतवान् । गौतम ब्रुवाण गौतमो महर्षिस्तं प्रसादयितुं स्तुतिं कृतवान् । तथाविध हे इन्द्र, आगच्छेत्यन्वयः । |
| २०५ | आ.१-२०-१२ एवा ह्येव । - ई गताविति धातोरुत्पन्नः एवशब्दः । हे एव, अयनशीलादित्य, एवाः एतव्याः प्राप्तव्याः कामास्ते सर्वे त्वमसि । |
| २०६ | आ.१-२२-१ योऽपां पुष्पं वेद । - अमृतमयं हि चन्द्रमण्डलम् । अतो जलकार्यत्वात् अपां पुष्पस्थानीयम् । एतस्य वेदिता स्वयं भोगार्थं चम्पकवकुलादिपुष्पैः पुत्रादिप्रजया गवादिपशुभिश्च समृद्धो भवति । वेदने प्ररोचनार्थं आदौ फलकथनम्, उपसंहारार्थं पुनः कथनम् । |
| २०७ | **प्रणवोपासनम्**<br>(१) आ.२-११-५ ओमिति प्रतिपद्यते - ओमिति प्रणवोच्चारणेन, उपक्रमं कुर्यात् । योऽयं ओमित्येवं रूपो यजुर्मन्त्रः स त्रयीं विद्यां प्रति वेदत्रयस्य प्रतिनिधिरूपः । अत एव .... प्रणवस्य सर्वात्मकत्वम् । किंचैतत् प्रणवस्वरूपं, उत्कृष्टं, अक्षरं, अविनश्वरं, सर्ववेदान्तवेद्यं, परब्रह्म वस्तु ।.. तस्मात्प्रणवेनैव स्वाध्यायप्रारंभो युक्तः ।<br>(२) आ.२-११-६ प्रणवप्रशंसापरामृचमवतारयति - ऋचो अक्षरे परमे व्योमन् - या एता ऋचस्ताः सर्वाः परम उत्कृष्टे व्योमन्विशेषेण रक्षकेऽक्षरे प्रणवे निषेदुः । अत एव कठशाखायामधीयते -<br>"सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति ।<br>यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण ब्रवीम्योमित्येतत् " इति ।<br>न केवलमृच एव तस्मिन्प्रणवे समाश्रिताः, किंतु विश्वे सर्वे देवा अपि यस्मिन्प्रणवाक्षरेऽधि निषेदुः अधिकत्वेन निषण्णाः । ...अनेनैव प्रकारेण, ऋचो देवाश्च यस्मिन्प्रणवे निषेदुः, तत्प्रणवाक्षरं यो न वेद, स पुमानधीयानोऽपि, ऋचा किं करिष्यति, न खलु फलरहितां केवलं कृषिं केचित्प्रार्थयन्ते । य इत्, ये पुनर्महात्मानः तत्प्रणवाक्षरं विदुः, ते महर्षय इमे परिदृश्यमानाः परमहंसाः समासते सम्यगवतिष्ठन्ते। ऐहिकामुष्मिकविषय क्लेशरहिताः सुखिनो वर्तन्ते । .. इत्यनेन मन्त्रेण प्रशस्तत्वात्प्रणवस्य वेदत्रयप्रतिनिधित्वं युक्तम् ।<br>(३) आ.७-४-१ यश्छन्दसामृषभो विश्वरूपः – यः प्रणवो गायत्र्यादि – च्छन्दो-युक्तानां वेदानां मध्य ऋषभः श्रेष्ठः । विश्वरूपः सर्वजगदात्मकः । .. तादृशः प्रणवः, छन्दोभ्यो वेदेभ्योऽधिकत्वेन सारत्वेन संबभूव सम्यक् प्रजापतेः |

| | |
|---|---|
| | प्रादुरभूत् ।.. मरणरहितं मोक्ष रूपं यदमृतं तदेवोंकारप्रादुर्भूतौ निमित्तम् । .. स प्रणववाच्य इन्द्रः परमेश्वरः, मेधया ग्रन्थतदर्थधारणशक्त्या मां विद्यार्थिनं स्पृणोतु प्रीणयतु । हे देव, त्वत्प्रसादादहममृतस्य मोक्षोपलक्षितस्य मुक्तिहेतोर्ग्रन्थादेर्धारयिता भूयासम् ।<br>(४) आ.७-८-१ ओमिति ब्रह्म । - ओंकारः परमात्मनो वाचकः । .. ओमित्यनेनैव शब्देन प्रतिपाद्यं यद्ब्रह्म तदेवात्रोपास्यं वस्तु. । .. ओमित्येतस्मिन्नेवाक्षरे शब्दरूपमर्थभूतं चेदं सर्वं जगदन्तर्भूतम् ।.. यः पुमान् ब्रह्म प्राप्नवानीति कामयते स पुमानोमित्यनेन शब्देन वाच्यं ब्राह्मोपासीत तेनोपासनेन ब्रह्म प्राप्नोत्येव । |
| २०८ | **स्वाध्यायः**<br>(१) आ.२-१४-२ तपो हि स्वाध्यायः – यस्मादयं ब्रह्मयज्ञः स्वाध्यायः कृच्छ्रचान्द्रायणादिवत् तपोरूपः तस्मान्न संत्यनध्यायाः ।<br>(२) आ.२-१५-६ यस्तित्याज सखिविदँ सखायम् - यः पुमान् वेदस्य वाङ्मात्रनिष्पादनं अध्ययनं करोति तं पुमांसं वेदः समस्तपापक्षयद्वारेण मोक्षपर्यन्तोत्तमगतिप्रदानेन प्रियं सखायमिव अतिस्नेहेन पालयति । तस्मादध्येतारं सखायं वेत्तीति सखिवित् स्वाध्यायः स्वयं च तस्य पुरुषस्य सखा अत्यन्तस्नेहेन कदाचिदपि अनपायात् ।.. तादृशं सखिविदं स्वयमपि सखायं यस्तित्याज परित्यक्तवान्, तस्य परित्यक्तुः, वाच्यपि भागो नास्ति आयासरहिते महाफले पाठेऽपि भाग्यं नास्ति । किमु वक्तव्यं महाप्रयाससाध्ये अनुष्ठाने तत्फले वा । यदीं यद्यपि स्वाध्यायत्यागी कदाचिद्विद्वत्सभायामुपविश्य बहूनि शास्त्राणि शृणोति, तदानीमलकं अनृतमेव शृणोति पुरुषार्थपर्यवसानाभावात् । न हि काव्यालङ्कारादिश्रवणेन वृथायुःक्षयमन्तरेण कञ्चित्पुरुषार्थं पश्यामः । ...वेदव्यतिरिक्तस्य शब्दजालस्य कण्ठशोषमात्रपर्यवसायित्वमेवोपपद्यते । यस्मादयं वेदत्यागी सुकृतस्य पन्थां पुण्यानुष्ठानमार्गं न जानाति तस्मात्कण्ठशोष मात्रपर्यवसानम् । ...<br>(३) आ. २-१५ -७ यं यं क्रतुमधीते तेन तेनास्येष्टं भवति - विषयध्याननिवृत्त्यर्थमेव चित्तवृत्तिनिरोधरूपं योगं वक्तुं कृत्स्नं योगशास्त्रं प्रवृत्तम् । सा च विषयध्याननिवृत्तिः स्वाध्यायनिरतस्य अप्रयासेनैव सिद्धा । तत्र किमनेन योगशास्त्रेण कृच्छ्रचान्द्रायणादिना तपसा वा । अत एव अभिज्ञा आहुः –<br>अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत् ।<br>इष्टस्यार्थस्य सम्सिद्धौ को विद्वान् यत्नमाचरेत् इति । .. |

| | |
|---|---|
| | अयमध्येता अग्निष्टोमवाजपेयराजसूयाश्वमेधादीनां मध्ये यं यं क्रतुं साङ्गमधीते. अस्याध्येतुः पुरुषस्य तेन तेन क्रतुनेष्टं भवति । त्रिविधो हि यागः । कायिको वाचिको मानसश्चेति । तत्राध्येतुः वाचिकस्य निष्पत्तौ नास्त्येव विवादः । यद्यध्येता अर्थमपि जानाति तदा अध्ययनकाले तदनुसंधानात् मानसोऽपि निष्पद्यते । कायिकश्चेन्नास्ति माऽस्तु नाम, द्रव्यार्जनरहितस्याधिकाराभावात् । यस्य त्वधिकारः कायिकमप्यसौ करोतु, इतरस्य तु वाचिकेनैव तत्फलं लभ्यते । तस्मादयमध्येता अग्न्यादीनां सायुज्यं गच्छति । |
| २०९ | आ.३-११-२७ पतङ्गमक्तमसुरस्य मायया – असून् प्राणान् राति ददादीत्यसुरः परमात्मा । तस्य मायया अचिन्त्यशक्त्या अक्तं अभिव्यक्तं पतङ्गं आदित्यं हृदा मनसा हृत्पुण्डरीकगतेन नियमितेनान्तःकरणेन मनीषिणो वेदशास्त्राभिज्ञा महर्षयः पश्यन्ति ध्यात्वा साक्षात्कुर्वन्ति । .. |
| २१० | आ.४-१-१ मन्त्रकृद्भ्यः – मन्त्रं कुर्वन्तीति मन्त्रकृतः , यद्यप्यपौरुषेये वेदे कर्तारो न सन्ति, तथाऽपि कल्पादावीश्वरानुग्रहेण मन्त्राणां लब्धारो मन्त्रकृत इत्युच्यन्ते । तल्लाभश्च स्मर्यते –<br>“युगान्तेऽन्तर्हितान् वेदान् सेतिहासान्महर्षयः ।<br>लेभिरे तपसा पूर्वामनुज्ञाताः स्वयंभुवा ॥<br>त एव महर्षयः संप्रदायप्रवृत्या मन्त्राणां पालनात्, मन्त्रपतय इत्युच्यन्ते । .. |
| २११ | आ.४-१-८ विघ्नत्रयनिवारणार्थं त्रिः शान्तिं पठति - ओं शान्तिः शान्तिः शान्तिः – आध्यात्मिकानां विघ्नानां ज्वरादिरूपाणां शान्तिरस्तु, आधिभौतिकानां रोगोपद्रवादीनां शान्तिरस्तु, आधिदैविकानां यक्ष-राक्षसोपद्रवादीनां शान्तिरस्तु । |
| २१२ | आ.४-२-१८ (५-२-३०) मदन्तीभिरुपसृजति – तप्ता आपो मदन्त्यः |
| २१३ | आ.४-११-२८ (५-१०-९) इदमहममुष्यामुष्यायणस्य शुचा प्राणमपिदहामि – आमुष्यायणस्य देवदत्तपुत्रस्य अमुष्य यज्ञदत्तस्य प्राणमिदं प्रत्यक्षं यथा भवति तथा शुचा संतापेन अपिदहामि । |
| २१४ | आ.४-११-२८ (५-१०-१०) एता वा अपामनूझ्झावर्यो नाम – य एते दर्भाः, अपामनूझ्झावर्य इत्येतन्नामभाजो भवन्ति । अनूझ्झा अनुक्रमगताः प्रवाहाः, तद्युक्ता नद्योऽनूझ्झावर्यः । आपो वै दर्भाः इति श्रुत्यन्तरात्, दर्भाणामविच्छिन्नप्रवाहोपेत – नदीरूपत्वम् । |
| २१५ | आ.६-५-(६-८) योऽस्य कौष्ठ्य – “...तिसृभिः यमगाथाभिः”<br>सं.५-१-८-३ – यमो गीयते यास्वृक्षु ता यमगाथाः .. योऽस्य कौष्ठ्येत्याद्याः । |

| | |
|---|---|
| २१६ | आ.७-१० वाजिनीव स्वमृतमस्मि – वाजो गतिः तद्वान् आदित्यः वाजी । स हि सर्वदा वेगेनैव गच्छति । तथा चोक्तम् –<br>योजनानां सहस्रे द्वे द्वे शते द्वे च योजने ।<br>एकेन निमिषार्धेन क्रममाण नमोऽस्तु ते ॥ |
| २१७ | आचार्यः<br>आ.७-११-१ वेदमनूच्याऽऽचार्योऽन्तेवासिनमनु शास्ति - आचार्यस्वरूपं मनुना स्मर्यते –<br>"उपनीय तु यः शिष्यं वेदमध्यापयेद्विजः ।<br>सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते" इति ॥ |
| २१८ | आ.८-८-३ स एको मानुष आनन्दः – चतुर्दिक्षु समुद्रवेष्टिता सा पृथिवी सर्वाऽपि वित्तस्य पूर्णा भोग्यद्रव्यजातेन पूरिता । .. कस्यचित् सार्वभौमस्य एतत्सर्वं संभवेत् तदाऽयं मानुष आनन्दो भवति । .. अस्मिन्कल्पे मनुष्याः सन्तो विद्याकर्मविशेषानुष्ठानेन गन्धर्वत्वं प्राप्ता मनुष्यगन्धर्वाः । ते ह्यन्तर्धानादि-शक्तियोगेन मनुष्येभ्य उत्कृष्टाः । ..मनुष्यगन्धर्वास्त्वन्तरिक्षलोकवासिनः । ..सृष्टिकाल एव देवलोके समुत्पन्ना गायका देवगन्धर्वाः ।.. चिरकालस्थायी यो लोकस्तमालोकयन्त इति चिरलोकलोकाः । ..पितृलोकादूर्ध्वभावी कश्चिदा-जानाख्यो देवलोकविशेषः, तत्रोत्पन्ना आजानजाः। ये वैदिकं कर्मविशेषमनुष्ठाय देवान्प्राप्नुवन्ति ते कर्मदेवाख्या देवाः।..त्रयस्त्रिम्शद्धविर्भुजोऽत्र देव शब्देन विवक्षिताः। इन्द्रो हविर्भुजां स्वामी । ..प्रजापतिर्विराट् पुरुषः ।.. ब्रह्मा हिरण्यगर्भः कृत्स्नसंसारमण्डलव्यापी समष्टिव्यष्टिरूपः सर्वात्मा । .. तेन सांसारिक आनन्दोत्कर्षः तत्र विश्राम्यति । |
| २१९ | (१) आ.८-८-१४ स यश्चायं पुरुषे – अथ बोधनीयं ब्रह्मानन्दं दर्शयति । पुरुषशब्देन बुभुत्सुर्मनुष्यो विवक्षितः । ..अध्यात्ममधिभूतमधिदैवं च सर्वेषूपाधिषु योऽयमानन्दोऽस्ति, स सर्वोऽपि स्वरूपेणैक एव न तु भिद्यते ।.. यस्याखण्डैकरसस्यास्य समुद्रस्थानीयस्य आनन्दस्य बिन्दुस्थानीया हिरण्यगर्भाद्यानन्दाः सोऽयमेक आनन्दो बुभुत्सुभिर्बोद्धव्यः – इत्येवं मीमांसया निर्णयः संपन्नः ।..यः पुमान् एवमुक्तप्रकारेण निजानन्दं वेत्ति स पुमाननैव क्रमेण तमानन्दं प्राप्नोति।<br>(२) आ.८-९-१ यतो वाचो निर्वर्तन्ते - ... अतो ब्रह्मानन्दस्य हिरण्य-गर्भानन्दादाधिक्यात् एतावदिति वक्तुमवगन्तुं वा न शक्यते । ..ब्रह्मोपासीनस्य, इह |

| | |
|---|---|
| | जन्मनि जन्मान्तरे वा कदाचिदपि भीतिर्नास्ति । .. अद्वितीयब्रह्मानन्दं प्रमाणेन विजानतो भयकारणमेव नास्तीत्यभिप्रेत्य कुतश्चनेत्युक्तम् । "द्वितीयाद्वै भयं भवति" इति श्रुत्या स्वातिरिक्तं वस्तु भयकारणम् । तच्चाद्वितीये ब्रह्मणि नास्तीत्यभिप्रायः ।.. |
| २२० | **ऋतं, सत्यं**<br>आ.१०-१-६ तदे॒वर्तं तदु॑ स॒त्यमा॑हुः ... इ॒ष्टापू॒र्तं ....<br>मनसा यथावस्तु चिन्तनं ऋतं, वाचा तदुच्चारणं सत्यं, एतदुभयमपि तदेवाधिष्ठानं ब्रह्मैव । .....इष्टं दर्शपूर्णमासादि श्रौतं कर्म, पूर्तं वापीकूपादि स्मार्तं कर्म तदुभयमपि तदेव ब्रह्म ।.... |
| २२१ | आ.१०-१-३१ ना॒रा॒य॒णाय॑ वि॒द्महे॑ – (सायणभाष्ये ६४ अनुवाकात्मके)<br>नरशरीराणां उपादानरूपाणि अन्नादिपञ्चभूतानि नारशब्देनोच्यन्ते । तेषु भूतेषु या आपो मुख्यास्ता अयनं आधारो यस्य विष्णोः सोऽयं नारायणः । समुद्रजलशायीत्यर्थः । तथा च स्मर्यते –<br>आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।<br>अयनं तस्य ताः प्रोक्तास्तेन नारायणः स्मृतः ॥<br>... ता एता गायत्र्यःचित्तशुद्ध्यर्थं ध्यानपुरःसरं जपितव्याः ॥ |
| २२२ | आ.१०-१-३५ का॒त्या॒य॒नाय॑ वि॒द्महे॑ - (सायणभाष्ये ६४ अनुवाकात्मके)<br>कृत्तिं वस्त इति कात्यो रुद्रः । स एव अयनमधिष्ठानमुत्पादको यस्या दुर्गायाः सा कात्यायनी । कुत्सितमनिष्टं मारयति निवारयतीति कुमारी । कन्या चासौ कुमारी चेति कन्यकुमारी । दुर्गिः दुर्गा । लिङ्गादिव्यत्ययः सर्वत्र छान्दसो द्रष्टव्यः ॥<br>**[परिशिष्टत्वेन सङ्गृहीते ८० अनुवाकात्मके भाष्ये –**<br>आदिशक्तिं प्रार्थयते - छान्दसप्रयोगं लोकानुसारेण व्याख्यास्यामः । दाक्षायणी सती किल दक्षस्य पितुर्याज्ञिके पावके भाविगिरिराजन्य - भागधेयोदयवशेन दिव्यं परममङ्गलास्पदं कायं तिरश्चक्रे । ततः परमयोगिन्यां मेनकायां प्रालेयाचला-दाविश्चक्रे । जनित्वाऽऽदौ कन्या चाऽसौ प्राक्परिणयात्कुमारी चेति कन्यकुमारी तत्सम्बुद्धौ हे कन्यकुमारि । ... भो हैमवति, भो मैनकेयि, त्वां विद्महे, हरिहरविरिञ्च्यादिभिराराध्यां सर्वत उत्कृष्टां भक्त्यैकसुलभां जानीमहे । विदित्वा च रात्रिन्दिवं धीमहि । भुक्तिमुक्तिप्रदात्रीमिति शेषः । कस्मै कात्यायनाय स्वपित्रे । यथा रामकृष्णादिरूपेणावतीर्णस्य भगवतो बहवो मातापितरस्तथा भगवत्या अपि |

| | |
|---|---|
| | देवकार्यचिकीर्षया जगदनुजिघृक्षया चाऽवतीर्णायाः । राक्षसैर्दुःखेन गम्या दुर्गा(र्गिः) । इकारान्तत्वं छान्दसम् ॥] |
| | **इतःपरं आरण्यक-दशमप्रश्नस्य मन्त्राः परिशिष्टत्वेन सङ्गृहीत - अशीत्यनुवाकात्मकभाष्याद् उद्धृताः ।** |
| २२३ | आ.१०-१-४९ ग॒न्धद्वा॒रां दु॑राध॒र्षां - ...भूदेवतां, इह कर्मण्युपह्वये समीपमाह्वयामि । .. श्रीयते चतुर्विधैर्जनुष्मद्भिः, इति श्रीः, तां श्रियम् । गन्धो द्वारं, अनुपमापकलिङ्गं यस्याः सा गन्धद्वारा ताम् ।... दुराधर्षां कुद्दालखननाद्युपायसहस्रैरपि, अप्रकंप्याम् । नित्यं नानाविधसस्यैर्नगर- ग्रामादिभिः, नदीसमुद्रद्वीपादिभिश्च पुष्टा नित्यपुष्टा ।.. करीषिणीं कृषीवलैः, बीजावापाय कृष्यमाणां, करीषं गोमयमस्यामस्तीति करीषिणीम् । करिणो (करीषा) लक्षणया गवादिपशवो यस्यां सन्ति सा करीषिणी तामिति वा । नानाविधचतुष्पाद्वतीमित्यर्थः । सर्वभूतानामीश्वरीम् । |
| २२४ | आ.१०-१-५० श्रीर्मे भ॒जतु । अ॒लक्ष्मीर्मे न॒श्यतु । - मे मां श्रीः, गजान्तलक्ष्मीर्भजतु । मे मत्संबन्धिन्यलक्ष्मीर्ज्येष्ठा देवी नश्यतु । अस्मत्तः, अस्मत्कुलीनतः, अस्मद्बन्धुवर्गतः, अस्मद्ग्रामतः, अस्मद्राष्ट्रतः बहुयोजनान्तरितं दूरीभवत्वित्यर्थः । |
| २२५ | आ.१०-१-६६ इ॒मं मे॑ गङ्गे यमुने सरस्वति ... तीर्थभूतानां गङ्गादीनामावाहनमन्त्रमाह – हे गङ्गे, विश्वनाथ-राजधानीसमीपस्थे भागीरथि, हे यमुने, आदित्यतनये, हे सरस्वति, नदीरूपेण विद्यमाने ब्रह्मपत्नि, हे शुतुद्रि, एतन्नामसरिद्वरे, हे आर्जीकीये, एतन्नाम्ना सरिद्वरे, हे मरुद्वृधे, एतन्नामसरिद्वरे, यूयं मे व्यत्ययेन मयेमं मनःपूर्वया वाचा पठ्यमानं स्तोमं स्तुतिरूपमन्त्रसमुदायं श्रृणुहि व्यत्ययेन श्रृणुत । श्रुत्वा च युष्मद्युष्मत्स्थानेभ्यः आसचत आगच्छत । मां पावयितुं यथावाञ्छितं दातुं च प्रकृतस्नानस्थानजलमध्यभागं प्रतीति शेषः। सन्निधध्वं च । काभिः सह । परुष्णी नाम नदी तया परुष्णिया । असिक्नी नाम नदी तयाऽसिक्निया । ..वितस्ता नाम नदी तया वितस्तया सह । सुषोमा नाम नदी तया सुषोमया सह। प्रार्थयितुरयमाशयः – यद्यप्यहं एतन्मन्त्रोक्तानां अनुक्तानां च महानदीनां रोधांसि गत्वा चिरकालं स्थित्वा स्नात्वा पीत्वा च दिवसानपनेतुमक्षमः, तथाऽप्यहं यत्रकुत्रचिद् ह्रदकूपाद्युदकेन स्नानं कुर्वाणः, एतेन मन्त्रेण गङ्गाद्या नदीरुपतिष्ठे, उपस्थिताश्चाऽऽगत्य संनिदधतां, संनिधाय च मदीयानां महतामप्येनसां विनाशं विदधतां, विधाय चैवं मामभिदधतां, |

| | |
|---|---|
| | पूतोऽपि शुद्धोऽपि भुङ्ग्क्ष्व भौमान्भोगान् सकुटुम्बः सपरिवारः साश्रितवर्गश्च भुक्त्वा चान्ते यथेच्छं पुण्यकृतां लोकानाप्नुहीति ॥ |
| २२६ | आ.१०-२७ कृणुष्व पाज इति पञ्च – (पञ्चमे मन्त्रे) जामिमजामिं – ....जामिं आलस्यादिकं परित्यज्य, ...अजामिं अनालस्यं यथा भवति तथा .. शत्रून् प्रमृणीहि नाशय । पञ्चानां ऋचां च, अयं अभिप्रायः - भो भगवन्नग्ने त्रैलोक्यनायक, अस्मदीय-अन्तर्बहिः शत्रून् निर्मूल्य, सत्कर्मसु प्रवृत्य, अन्तः करणं विमलीकृत्य, शतं संवत्सरान् भार्यापुत्रादिभिः सह भुक्तिं दत्वा, मरणादूर्ध्वं सकुटुम्बाय मह्यं मुक्तिं प्रयच्छेति । <br> तथा च नीतिशतकम् – <br> दिवा सूर्यप्रतापेन रात्रौ वह्निप्रतापतः । पिशाचराक्षसादीनां दूरतस्तु पलायनम् ॥ तस्माद्रात्रौ मनुष्याणां वने मार्गे गृहेऽपि वा । वह्निसेवनमाहात्म्यात् पिशाचादिपलायनम् ॥ |
| २२७ | आ.१०-३० आपः पुनन्तु पृथिवीं .. स्वाहा – अन्यभुक्तावशिष्टरूपमुच्छिष्टं यदस्ति, यदभोज्यं भोक्तुमयोग्यं तादृशं कदाचिन्मया भुक्तं, यद्वा दुश्चरितं, अन्यदपि प्रतिषिद्धाचरणरूपं मम किंचित्संपन्नं तत्सर्वं परिहृत्येति शेषः। ततो मामापः पुनन्तु । तथा, असतां शूद्रादीनां प्रतिग्रहं च मया कृतं पुनन्तु । तदर्थमिदमभिमन्त्रितमुदकं मदीयवक्त्राग्नौ सुहुतमस्तु । |
| २२८ | आ. १०-३५-२ ओं भूः । ओं भुवः ।...भूरादिसत्यान्तलोकप्रतिपादिकाः सप्त व्याहृतयः । तेषां च लोकानां प्रणवप्रतिपाद्यब्रह्मस्वरूपत्वविवक्षया प्रत्येकं प्रणवोच्चारणम् । तत्सवितुरित्यादिको गायत्रीमन्त्रः । तत्प्रतिपाद्यस्य ब्रह्मत्व-विवक्षया तदादौ प्रणवोच्चारणम् । मन्त्रस्यायमर्थः – सवितुः प्रेरकस्या-न्तर्यामिणो देवस्य वरेण्यं वरणीयं श्रेष्ठं तद्भर्गस्तेजः, धीमहि ध्यायामः। यः सविता परमेश्वरः, नोऽस्मदीया धियो बुद्धिवृत्तीः प्रचोदयात्, प्रकर्षेण तत्वबोधे प्रेरयति तस्य तेजो ध्यायाम इति पूर्वत्रान्वयः । आपो ज्योतिरित्यादि गायत्राः शिरः, तस्याऽऽद्यन्तयोः प्रणवद्वयं पूर्ववदुच्चार्यते । या आपो नदीसमुद्रादिगताः सन्ति, यच्च ज्योतिः, आदित्यादिकमस्ति, योऽपि रसो मधुराम्लादिः षड्विधोऽस्ति, यदप्यमृतं देवैः पीतमस्ति, तत्सर्वमों प्रणवप्रतिपाद्यं ब्रह्म । भूर्भुवःसुवरोम् पूर्ववद्व्याख्येयम् । अस्य मन्त्रस्य प्राणायामाङ्गत्वं, अमृतनादोपनिषदि श्रूयते – |

| | |
|---|---|
| | सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह ।<br>त्रिः पठेदायतप्राणः प्राणायामः स उच्यते ॥ |
| २२९ | **त्रिसुपर्णं**<br>आ.१०- ३८,३९,४० - ज्ञानप्रतिबन्धक – ब्रह्महत्यादिपाप – निवृत्तिहेतवः, त्रिसुपर्णनामकमन्त्राः उच्यन्ते । |
| २३० | **सत्यादीनि एकादश-उत्कृष्टसाधनानि**<br>आ.१०-७८ सत्यं परं परꣳ सत्यं - सन्यासस्य निरतिशयोत्कर्षार्थत्वं वक्तुं सत्यादीनि एकादश-उत्कृष्टसाधनानि उपन्यस्यति – सत्यं, तपः, दमः, शमः, दानं, धर्मः, प्रजनः, अग्नयः, अग्निहोत्रं, यज्ञः, मानसं – इति । |
| २३१ | **न्यासः**<br>आ.१०-७९ ...न्यासमेषां तपसामतिरिक्तमाहुः – सत्यादीनां तपसां मध्ये सन्यासमतिरिक्तं अत्युत्कृष्टं साधनम् मनीषिण आहुः ।<br>.. ओमित्यात्मानं युञ्जीत – त्रिमात्रप्रणवमुच्चारयन्, सर्ववेदान्तेषु निर्णितमात्मानं स्वात्मरूपेण चित्ते समादध्यात् । .. एतद्वै महोपनिषदं, देवानां गुह्यम् । य एवं वेद – तत्ववेदनेन जीवत्वकृतभ्रमो निवर्तते ब्रह्मस्वभाव आविर्भवति ततो जीवन्मुक्तो भवतीत्यर्थः । |
| २३२ | आ.१०-८० तस्यैवं विदुषो - अस्मिन्ननुवाके पूर्वभागेन योगिनोऽवयवा यज्ञाङ्गद्रव्यत्वेन, आम्नायन्ते ।..<br>यावद्म्रियते – द्वितीयभागेन योगिव्यवहारस्य ज्योतिष्टोमावयवक्रियारूपत्वं दर्शयति ।<br>ये अहोरात्रे - तृतीयभागेन जीवन्मुक्तस्य संबन्धिनां कालविशेषाणां नानाविधयागरूपत्वमाह ।<br>एतद्वै जरामर्यमग्निहोत्रं – चतुर्थभागेन सर्वयज्ञात्मकं योगिन उपासीनस्य क्रममुक्तिलक्षणं फलमाह ।<br>ब्रह्मणो महिमानमाप्नोति – ...महत्त्वं प्राप्नोति विदेहमुक्तिर्भवतीत्यर्थः । |
| २३३ | म.प्र. १-५-३ तुभ्यमग्रे पर्यवहन्थ्सूर्यां वहतुना सह - वहतुः पितृकुललब्धस्य स्त्रीधनस्य नाम । |
| २३४ | मं.प्र. २–२-१० सहमाना अरातीः (सहमाना इति आकारान्तपदम् )। |

*******

# सायणभाष्यादुद्धृतद्विषयाणां अकाराद्यनुक्रमणिका


| क्रमसंख्या | मन्त्रारम्भः / विषयः | | क्रमसंख्या | मन्त्रारम्भः / विषयः |
|---|---|---|---|---|
| ३८ | अकः धातुशब्दः | | ६३ | आनुजावर आसीत् |
| १०१ | अक्षन्नमीमदन्त | | २२७ | आपः पुनन्तु पृथिवीं .. स्वाहा – |
| २०१ | अक्षरविपर्ययः | | २०० | आपः सूर्ये समाहिताः - |
| ८७ | अग्निः स्विष्टकृत् | | ११७ | आयतनवन्तमेव |
| ८६ | अग्ने देवेद्ध मन्विद्ध | | १६६ | आर्यावसतिरिति वै तमाहुः |
| ६६ | अग्नेः पुनराधानम् | | ३४ | आशीर्पदयर्चा |
| ७७ | अछंबट्कारं | | १४५ | आशुः शिशानः |
| १०६ | अजस्तूपरः - | | ९१ | आश्रावयेति चतुरक्षरं |
| १९५ | अञ्जसायनिः स्रुतिः | | १३० | इडा देवहूः |
| १५ | अथो वाग्वा अनुष्टुक् – | | २१३ | इदमहममुष्या |
| १८१ | अधि नो ब्रवीतु | | ३३ | इदं विष्णुर्विचक्रमे |
| १९७ | अधिवादं जयति | | ७ | इन्द्र आपो वव्रे |
| ११० | अनागास्त्वे | | ४९ | इन्द्र मरुत्व |
| १९८ | अन्विष्टकं दक्षिणा ददाति । | | १०० | इन्द्राणीं |
| ९८ | अपन्नदती भवति । | | १०३ | इन्द्राय शुनासीराय |
| १४० | अपरशुवृक्णं | | १०७ | इन्द्रो मायाभिः |
| १६० | अपराजायिनमेवैनं | | ७६ | इन्धानास्त्वा |
| २१४ | अपामनूझावर्यो नाम – | | २२५ | इमं मे गङ्गे यमुने सरस्वति ... |
| १६५ | अप्राणत् प्रतिगृह्णाति | | ९५ | इष्टापूर्त |
| १९९ | अबीष्टकाः | | ४० | उपयामगृहीतोऽसि |
| ४३ | अयं वां मित्रावरुणा | | १ | उपोद्घाते |
| ७४ | अयज्ञो वा एष | | १८२ | उभावन्तौ परियात अम्या |
| ८० | अयमग्निः श्रेष्ठतमोऽयं | | ५८ | उशब्दो अवधारणे । |
| १०२ | अवाम्ब रुद्रमदिमह्यव | | २२० | ऋतं, सत्यं |
| ७३ | अस्मिन् क्षये | | १४६ | ऋतश्च सत्यश्च [पुँल्लिङ्ग प्रयोगः ] |
| १८५ | अहान्यस्मै सुदिना | | २१ | ऋषिश्छन्दो देवता |
| २३ | आकूत्यै प्रयुजे | | १९१ | एकं वा एतद्देवानामहः। |
| २१७ | आचार्यः | | ३ | एकः शब्दः सम्यक् ज्ञातः |
| ९६ | आजिधावनम् | | २०५ | एवा ह्येव । |
| २१८ | आनन्दः | | २२८ | ओं भूः । ओं भुवः |

| | | | | |
|---|---|---|---|---|
| १२३ | ओषधयः फलपाकान्ताः | | १९४ | तमनुवित्तिरब्रवीत् |
| १३१ | ककुहꣳ रूपम् | | १८६ | तस्य तेपानस्य |
| १८० | कल्कौ | | २३२ | तस्यैवं विदुषो - |
| १६४ | कल्पान्तरगतः | | १९२ | तान् व्ययत् । यद्व्ययत् । |
| १७६ | कवष्यौ धावमानाः | | ५० | तिसृभिर् ऋग्भिर्गृह्णाति |
| १५८ | कशिपु कशिपव्याय - | | ६० | तेज आग्नेयेनेन्द्रिय |
| ८९ | कस्त्वा युनक्ति | | ३९ | त्रयः पशूनाꣳ हस्तादानाः |
| २२२ | कात्यायनाय विद्महे - | | २११ | त्रिः शान्ति पठति |
| १३३ | कितवासो यद्रिरिपुः | | २२९ | त्रिसुपर्ण |
| १७३ | कुण्डपाय्यः | | ९३ | त्व शब्दः |
| १६७ | कुसिन्धमुपौहन् | | ७९ | त्वत्पितारो अग्ने |
| २२६ | कृणुष्व पाज इति पञ्च – | | १९३ | त्वमग्ने रुद्रो असुरो महो दिवः। |
| १४४ | कृत्तिका नक्षत्रमग्निर्देवता | | १३६ | त्वान्तप्रत्यये विशेषाः |
| १९० | खलतेर्विक्लिधस्य | | १८४ | त्वे वसु सुषणनानि |
| १२४ | गतश्रीः | | ४८ | त्सारी छद्मगतिर्व्याधः |
| २२३ | गन्धद्वारां दुराधर्षा - | | १४१ | दꣳष्ट्राभ्यां मलिम्लून् |
| २७ | गायत्रीमहिमा | | १६३ | दक्षिणां प्रतिग्रहीष्य |
| १०९ | गोमृगं | | ३७ | दघ्नं , अरत्निः |
| १७५ | गौरी मिमाय | | १८८ | दशत आलभ्यन्ते |
| १३७ | ग्नास्त्वा देवीः | | ५५ | दाक्षिणानि , द्वादशशतम् |
| १५२ | ग्रुमुष्टिनावोक्षति | | १८३ | दृढोऽशिथिलः |
| ९९ | घृणिः, नञर्थाः | | १९ | देवा गातुविदः |
| १२८ | चतुर्गृहीतम् | | ८५ | दैवीं नावं |
| २६ | चन्द्रमसि | | १५६ | दैवीं वाचं यच्छामि |
| २९ | छन्दोविशेषाः, अतिच्छन्दसः | | १३९ | द्रन्नं न्नः सर्पिरासुतिः |
| ५७ | जक्षिवाꣳसः पपिवाꣳसश्च | | ११८ | धन्वन् , धन्वना यन्ति |
| १२२ | जञ्जभ्यमानात् | | ५६ | धाता रातिः सवितेदं |
| ११५ | जरदष्टिर्यथासत् – | | ५४ | धानाः करम्भः |
| ३५ | जामिमजामि | | १४३ | ध्रुवस्तिष्ठाविचाचलिः |
| ११४ | जीवातवे जीवनस्यायै | | ७८ | नक्तमुपतिष्ठते, उपस्थेयः |
| १६८ | जुष्टो दमूनाः | | १२० | नवोनवो भवति |
| १०५ | ज्योगामयावी | | २०२ | नाम नामैव नाम मे |
| ४७ | तं प्रत्नथा पूर्वथा | | २२१ | नारायणाय विद्महे – |
| १२७ | तनूनपातं यजति | | २२ | नास्माल्लोकात्स्वेतव्यं |

| | | | | |
|---|---|---|---|---|
| ५३ | निदानवान्भवति | | १३२ | यत्कुसीदमप्रतीत्तं |
| १३५ | निवेशनी ...सहस्रपोषᳪ | | १२९ | यत्तपस्तप्त्वा |
| २३१ | न्यासः | | १३४ | यत्ते देवा अदधुर्भागधेयममावास्ये |
| १०४ | नियुत् | | १७८ | यत्सीमन्तं कङ्कतस्ते |
| ६७ | पङ्क्त्यौ याज्यानुवाक्या | | ६ | यथायजुरेवैतत् |
| २०९ | पतङ्गमक्तमसुरस्य मायया – | | ६५ | यस्मै त्वᳪ सुकृते जातवेदः |
| ३१ | परिधीनकुर्वत । | | ७५ | याञ्चैवास्यैषोपतिष्ठते |
| १० | पर्यग्निकरणं | | ३२ | या ते अग्ने रुद्रिया |
| १८ | "पितु" शब्दः अन्नवाची | | ४४ | या वां कशा मधुमती |
| २० | पूः, पुरः, नरः | | ८२ | यूयं पात स्वस्तिभिः सदा नः |
| ८१ | पृष्टो दिवि | | ११ | योगक्षेमः |
| ११६ | प्रजापतिर्वरुणायाश्वमनयत् | | २०६ | योऽपां पुष्पं वेद । |
| २०७ | प्रणवोपासनम् | | ५९ | योऽवगतः सोऽपरुध्यतां ... |
| ८८ | प्राणापानौ मे पाहि | | १५५ | यो वा अश्वस्य |
| १५० | प्रविविशिवाᳪसमीमहे | | २१५ | योऽस्य कौष्ठ्य – यमगाथाभिः |
| १७ | बहुवचने विशेषाः । | | १६ | रलयोरभेदः । |
| १७२ | भगवन्नामजपः | | ४६ | रुद्रस्य शिरश्छेदनम् |
| १८७ | भीष्मं भावुकम् | | ७१ | लेकः सलेकः |
| ६८ | भूमिर्भूम्नेति | | ४ | वचनव्यत्ययः |
| १८९ | भूरिति महिषी । | | १०४ | वडबा |
| १११ | मतुपो वत्वम् | | ९० | वयङ्स्याम पतयो रयीणाम् |
| २१२ | मदन्तीभिरुपसृजति | | १०८ | वसन्ता प्रातः |
| ८३ | 'मधु' शब्दः | | २३३ | वहतुः |
| ६१ | मन इव हि प्रजापतिः | | १२६ | वाक्च मनश्चाऽऽर्तीयेता |
| ८४ | मरुतः | | ४२ | वाग्वै पराच्यव्याकृता |
| १७७ | महान् महित्वे | | ९७ | वाजपेयः |
| १३ | महीनां पयोऽसि | | २१६ | वाजिनीव स्वमृतमस्मि |
| २१० | मन्त्रकृद्भ्यः – | | ५१ | वाममद्य सवितः |
| १२५ | मन्त्ररहस्यवेदनं – आख्यायिका | | ४१ | वायुः शोधयिता |
| ९ | मन्त्रसामर्थ्येन अभिवृद्धिः | | ३६ | विभूरसि |
| १७९ | मरुतो नापाचायन् | | २४ | विश्वे देवस्य नेतुः |
| १७४ | मार्डीकं धेहि | | १४९ | विहव्यम् - ममाग्ने |
| १४ | मृगतृष्णांभसि स्नातः | | २ | विहितस्याननुष्ठानात् |
| ४५ | यज्ञस्य शिरश्छेदनम् | | ११९ | वृत्रः – आख्यायिका |

| | | | | |
|---|---|---|---|---|
| २५ | वृष्टिः, कृषिः, सस्यम् | | १२१ | सस्त्रीषꣳसादं |
| ६९ | व्यख्यन्महिषः | | २३४ | सहमाना अरातीः |
| ११३ | व्यत्यासम् | | १६२ | सायंयावानश्च वै देवाः |
| ६२ | शतमानं भवति | | १३८ | सायुज्यमित्यादि |
| २२४ | श्रीर्मे भजतु । | | १४२ | सुपर्णोऽसि गरुत्मान् |
| १५७ | संख्येयशब्दः | | २०४ | सुब्रह्मण्योꣳ सुब्रह्मण्योꣳ सुब्रह्मण्योम् |
| १६९ | संज्ञास्पत्यं | | १७१ | सुमज्जानये विष्णवे |
| १५३ | संवत्सरभेदाः | | ३० | सूक्ष्मसमयनिर्णयः (Punctuality in vedaas) |
| १५१ | स क्रुमुकं प्राविशत् | | ९२ | सूनृता |
| १७० | सगुः साश्वः | | २०३ | स्त्रियः सतीः । |
| १४८ | सग्धिश्च मे सपीतिश्च मे | | १९६ | स्पृणोत्यात्मानं |
| ९४ | सत्याः सन्तु यजमानस्य कामाः। | | १२ | स्योना, सुषदा, सुशेवा |
| २३० | सत्यादीनि एकादश | | ५ | स्वरप्राधान्यम् – स्वरभेदे अर्थभेदः |
| २८ | सप्त ग्राम्याः पशवः सप्ताऽऽरण्याः | | १४७ | स्वादुषꣳसदः |
| ७० | सप्त ते अग्ने समिधः | | २०८ | स्वाध्यायः |
| ११२ | सनिमेष्यन् | | १०४ | स्वेन भागधेयेनोप धावति |
| १५४ | समीची नामासि | | ५२ | हरिरसि हारियोजनः |
| १६१ | स यत्प्रथमं निरष्ठीवत्। | | ६४ | हरिवच्छस्यते |
| २१९ | सयश्चायं पुरुषे – | | ८ | हिरण्यपाणिः प्रतिगृह्णातु |
| ७२ | सर्पा वै जीर्यन्तः | | १५९ | ह्लीका हि पितरः |



******

# ॥ अनुषङ्गमन्त्राः ॥

## [ अनुषङ्गमन्त्राः # एतच्चिह्नेन निर्दिष्टाः]

| मन्त्रारम्भः | मन्त्रसङ्ख्या |
|---|---|
| देवस्य॑ त्वा सवि॒तुः प्र॑स॒वे ... अ॒ग्नये॒ जुष्टं॑ निर्व॑पामि ।<br># दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे ... अ॒ग्नीषोमा॑भ्यां॒ जुष्टं॑ निर्व॑पामि । | १-१-४-९,१० |
| **देवस्य त्वेत्येतमेव भागमुपक्रमं कृत्वा जुष्टं निर्वपामीत्युपसंहारं कृत्वा तयोर्मध्ये, अग्नीषोमाभ्यामिति प्रयोक्तव्यम् ।** | |

| | |
|---|---|
| अ॒ग्नये॑ वो॒ जुष्टं॑ प्रोक्षा॑म्यग्नीषोमा॑भ्यां - अ॒ग्नये॑ वो॒ जुष्टं॒ प्रोक्षा॑मि,<br># अ॒ग्नीषोमा॑भ्यां॒ जुष्टं॑ प्रोक्षा॑मि | १-१-५-४ |
| ब्रा. ३-२-५- य॒था॒दे॒व॒तमे॒वैना॒न्प्रोक्ष॑ति | |

| | |
|---|---|
| गो॒ष्ठं मा निर्मृ॑क्षं वा॒जिनं॑ त्वा सपत्नसा॒हꣳ संमा॑र्ज्मि।<br># वाचं॑ प्रा॒णं.. मा निर्मृ॑क्षं.., # चक्षुः श्रोत्रं॒..मा निर्मृ॑क्षं..<br>प्र॒जां योनिं॒ मा निर्मृ॑क्षं वा॒जिनीं॑ त्वा सपत्नसा॒हीꣳ संमा॑र्ज्मि। | १-१-१०-(३ -६) |
| **द्वितीय-तृतीयमन्त्रयोः मा निर्मृक्षमित्यादिरनुषज्यते।** | |

| | |
|---|---|
| शु॒क्रं त्वा॑ शु॒क्रायां॒ धाम्ने॑धाम्ने दे॒वेभ्यो॒ यजु॑षेयजुषे गृह्णामि ।<br># ज्योति॑स्त्वा॒ज्योति॑षि..धाम्ने , अ॒र्चिस्त्वा॒र्चिषि॒ धाम्ने॑.. | १-१-१०-(२१-२३) |
| **मध्यममन्त्रे धाम्नेधाम्न इत्यादिकमनुषज्यते।** | |

| | |
|---|---|
| # जु॒हूः...अ॒सि॒ घृ॒ताची॑, # उ॒प॒भृत् ..अ॒सि॒ घृ॒ताची॑ | १-१-११-१७, १८ |
| **प्रथमद्वितीययोः असि घृताचीत्यादिकमनुषज्यते ।** | |

| | |
|---|---|
| # चि॒त्पति॑स्त्वा.. अच्छि॑द्रेण…., # वा॒क्पति॑स्त्वा ..अच्छि॑द्रेण…. दे॒वस्त्वा॑ सवि॒ता पु॑ना॒त्वच्छि॑द्रेण प॒वित्रे॑ण॒ वसो॒ः सूर्य॑स्य र॒श्मिभि॑ः । | १-२-१-(१२ – १४) |
| **प्रथमद्वितीय-मन्त्रयोः, अच्छिद्रेणेत्यनुषज्यते।** | |

| | |
|---|---|
| या ते॑ अग्ने॒ रुद्रि॑या त॒नूस्तया॑ नः पाहि॒ तस्या॓स्ते॒ स्वाहा॓ ।<br># या ते॑ अग्नेऽयाश॒या (त॒नूः….), # (या ते॑ अग्ने) रजाश॒या (त॒नूः….), # (या ते॑ अग्ने) हराश॒या त॒नूः… | १-२-११-(४-७) |
| **अयाशयादिपदत्रयेण त्रयो मन्त्रा भवन्ति । तेषु प्रथममन्त्रे तनूरित्यादिरनुषज्यते । द्वितीये तु या ते अग्न इति, तनूरीति चोभयमनुषज्यते । तृतीये तु या ते अग्न इत्ययमेवानुषज्यते ।** | |

| | |
|---|---|
| वि॒दे॒रग्निर्नभो॒ नामाग्ने॑ अङ्गिरो॒ यो॓ऽस्यां पृ॑थि॒व्यां<br># (वि॒देः..)अग्नेअङ्गिरो॒ यो द्वि॒तीय॑स्यांपृथि॒व्यां …, # (वि॒देः..)तृ॒तीय॑स्यां पृथि॒व्यां… | १-२-१२-(५-७) |
| **अत्र अग्ने अङ्गिरो यो द्वितीयस्यामित्याम्नातो द्वितीयमन्त्रः, तस्यादौ विदेरित्यादिरनुषज्यते, अवसाने च पृथिव्यामित्यादिरनुषज्यते । तृतीयस्यामित्यादिः, चरममन्त्रः, तस्य विदेरित्यादिरेवानुषज्यते ।** | |

| | |
|---|---|
| # वि॒भूर॑सि ..(रौद्रे॑ण..), # वह्नि॑रसि ..(रौद्रे॑ण..), # श्वा॒त्रो॑ऽसि..(रौद्रे॑ण..), # तु॒थो॑ऽसि..(रौद्रे॑ण..), # उ॒शिग॑सि..(रौद्रे॑ण..),# अङ्घा॑रिरसि.. (रौद्रे॑ण..),# अ॒व॒स्युर॑सि..(रौद्रे॑ण..), # शु॒न्ध्यूर॑सि ..(रौद्रे॑ण..), # स॒म्राड॑सि ..(रौद्रे॑ण..),# प॒रि॒षद्यो॑ऽसि ..(रौद्रे॑ण..), # प्र॒तक्वा॑ऽसि ..(रौद्रे॑ण..), # अस॑मृष्टोऽसि .. (रौद्रे॑ण..), # ऋ॒तधा॑मासि .. (रौद्रे॑ण..), # ब्रह्म॑ज्योतिरसि .. (रौद्रे॑ण..), # अ॒जो॓ऽस्येक॑पात् ..(रौद्रे॑ण..), अहि॑रसि बु॒ध्नियो॒ रौद्रे॒णानी॑केन पा॒हि मा॓ऽग्ने पिपृ॒हि मा॒ मा मा॑ हिꣳसीः । | १-३-३- (१-१६) |
| **अत्र रौद्रेणेति वाक्यं सर्वमन्त्रशेषत्वादन्ते समाम्नायते ।** | |

| | |
|---|---|
| गा॒य॒त्रं छन्दोऽनु॒ प्रजा॑यस्व, # त्रैष्टु॑भं॒ छन्दोऽनु॒ जा॑यस्व, जाग॑तं॒ छन्दोऽनु॒ प्रजा॑यस्व | १-३-७-(१०-१२) |
| **त्रैष्टुभमित्यत्र च्छन्द इत्यनुषङ्गः** | |

| | |
|---|---|
| # (उपयामगृहीतो) मधुश्च (असि), # (उपयामगृहीतो) माधवश्च (असि), इत्यादि .. # (उपयामगृहीतः) तपस्यश्च (असि)। | १-४-१४-(१-१२) |
| **मन्त्रादावुपयामेति प्रयुञ्जीत । हे सोम त्वमुपयामगृहीतो मधुश्चासि । एवमन्यत्रापि योजयम् ।** | |

| | |
|---|---|
| देवस्य त्वा .. अग्नेस्त्वा साम्राज्येनाभिषिञ्चामि ।<br># (देवस्य त्वा ..) इन्द्रस्य त्वा साम्राज्येन ..,# (देवस्य त्वा ..)बृहस्पतेस्त्वा.. | १-७-१०-(८-१०) |
| **इन्द्रस्येत्येतावानेवाम्नातो द्वितीयो मन्त्रः, स च पूर्वोत्तरभागयोरनुषङ्गेण व्याख्यातव्यः, बृहस्पतेरित्यादौ तृतीयमन्त्रे पूर्वभागोऽनुषञ्जनीयः।** | |

| | |
|---|---|
| एतत्ते तत ये च त्वामनु, # एतत्ते पितामह (ये च त्वामनु), # (एतत्ते) प्रपितामह ये च त्वामनु, | १-८-५-(२-४) |
| **मध्यममन्त्रे, ये च त्वामन्वित्यनुषङ्गः, प्रपिताहमन्त्र एतत्त इत्यनुषङ्गः।** | |

| | |
|---|---|
| # ये देवाः पुरःसदोऽग्निनेत्रा रक्षोहणः, # (ये देवा) दक्षिणसदो यमनेत्राः (रक्षोहणः...), # (ये देवाः) पश्चात्सदः सवितृनेत्राः (रक्षोहणः...), # (ये देवा) उत्तरसदो वरुणनेत्राः (रक्षोहणः...), # (ये देवा) उपरिषदो बृहस्पतिनेत्राःरक्षोहणः..., | १-८-७-(३-७) |
| **दक्षिणसदो यमनेत्रा इत्यस्य मन्त्रस्याऽऽदौ ये देवा इत्यनुषज्यते । अन्ते च रक्षोहण-मित्यादिकमनुषज्यते । एवं तृतीयचतुर्थयोर्द्रष्टव्यम् । पञ्चमे तु ये देवाइत्येतावदेवानुषज्यते । प्रथमे तु रक्षोहण इत्यादिकमेवानुषज्यते।** | |

| | |
|---|---|
| अग्नये रक्षोघ्ने स्वाहा, # यमाय (रक्षोघ्ने स्वाहा), # सवित्रे (रक्षोघ्ने स्वाहा), # वरुणाय (रक्षोघ्ने स्वाहा), बृहस्पतये ... रक्षोघ्ने स्वाहा | १-८-७-(९-१३) |
| **यमायेत्यादिषु रक्षोघ्ने स्वाहेत्यनुषज्यते ।** | |

| | |
|---|---|
| # अर्थेतः स्थ ..(अपो देवीः), # अपां पतिरसि ..(अपो देवीः), # वृषास्यूर्मिः....(अपो देवीः), # वृषसेनोऽसि..(अपो देवीः), # व्रजक्षितः स्थ..(अपो देवीः), # मरुतामोजः स्थ..(अपो देवीः), # सूर्यवर्चसः स्थ..(अपो देवीः),# सूर्यत्वचसः स्थ ..(अपो देवीः), # मान्दाः स्थ..(अपो | १-८-११-(१-१५) |

| | |
|---|---|
| देवीः), # वाशाः स्थ....(अपो देवीः), # शक्करीः स्थ..(अपो देवीः), # विश्वभृतः स्थ ..(अपो देवीः), # जनभृतः स्थ ..(अपो देवीः), # अग्नेस्तेजस्याःस्थ ..(अपो देवीः), # अपामोषधीनाꣳरसस्थापो देवीः | |
| **अत्र, अर्थेत्यादिषु पञ्चदशसु मन्त्रेषु, अपो देवीरित्यृगियं शेषत्वेनानुषज्यते ।** | |

| | |
|---|---|
| मक्षू देववतो .. देवानां य इन्मनः* , # न यजमान .. देवानां ** , # असदत्र सुवीर्य .. देवानां, # न किष्टं कर्मणा .. देवानां | १-८-२२-(११-१४) |
| ***इदमुत्तरार्धमुत्तरेषु त्रिषु मन्त्रेष्वनुवर्तते । ** अनुवर्णितं देवानामित्युत्तरार्धं पूर्ववद्योज्यम्।** | |

| | |
|---|---|
| # आमनमस्यामनस्य.. सजाताः (समनसः...),# (आमनमसि..) कुमाराः समनसः ... | २-३-९-(४-६) |
| **अत्र सजाता इत्यन्ते मन्त्रभागे समनस इत्युक्तभागोऽनुषञ्जनीयः। कुमारा इत्यादिके मन्त्रभागे, आमनमसीत्यादि – मन्त्रपूर्वभागः, अनुषञ्जनीयः। तथा सति त्रिभिर्मन्त्रैः, आहुतित्रयं संपद्यते ।** | |

| | |
|---|---|
| अग्निरायुष्मान्त्स वनस्पतिभिः..(तेन..), # सोम आयुष्मान्त्स ओषधीभिः.. ..(तेन..), # यज्ञ आयुष्मान्त्स दक्षिणाभिः.. ..(तेन..), # ब्रह्मायुष्मत्तद्ब्राह्मणैः.. ..(तेन..), # देवा आयुष्मन्तस्तेऽमृतेन.. ..(तेन..), पितर आयुष्मन्तस्ते स्वधया.. | २-३-१०-(११-१६) |
| **प्रतिवाक्यमनुषङ्गद्योतनाय तेन त्वाऽऽयुषेति पुनः पठ्यते ।** | |

| | |
|---|---|
| यावामिन्द्रावरुणा यतव्या तनूस्तयेममꣳहसो मुञ्चतं # यावामिन्द्रावरुणा सहस्या तनूः.., # (यावामिन्द्रावरुणा) रक्षस्या तनूः..(तयेमं...), # (यावामिन्द्रावरुणा) तेजस्या तनूः ..तयेमं.., | २-३-१३-(१-४) |
| **सहस्येत्यत्र तनूरित्यस्य, अन्त्यभागस्यानुषङ्गः, तेजस्येत्यत्र या वामित्याद्यभागस्य, अनुषङ्गः । रक्षस्येत्यत्र, उभयोर्भागयोरनुषङ्गः ।** | |

| | |
|---|---|
| यो वामिन्द्रवरुणावग्नौ स्रामस्तं वामेतेनावयजे # यो वामिन्द्रावरुणा द्विपात्सु....(स्रामस्तं...), # (यो वामिन्द्रावरुणा) | २-३-१३-(५-१२) |

| | |
|---|---|
| चतुष्पात्सु पशुषु.. (स्त्रामस्तं...)., # (यो वामिन्द्रावरुणा) गोष्ठे..., # (यो वामिन्द्रावरुणा) गृहेषु.. (स्त्रामस्तं...).,# (यो वामिन्द्रावरुणा) अप्सु.... (स्त्रामस्तं...), # (यो वामिन्द्रावरुणा) ओषधीषु.... (स्त्रामस्तं...)., # (यो वामिन्द्रावरुणा) वनस्पतिषु स्त्रामस्तं... | |
| **द्विपात्सु पशुष्वित्यत्र स्त्रामस्तं वामित्याद्युत्तरभागस्यानुषङ्गः । वनस्पतिषु स्त्राम इत्यत्र यो वामित्यादेः प्रथमभागस्यानुषङ्गः। चतुष्पात्स्वित्यादिषु पञ्चसु पूर्वोत्तरभागयोरनुषङ्गः । [चतुष्पात्स्विति मन्त्रे तु चतुष्पात्स्वित्यनन्तरं पशुष्विति पदस्याप्यनुषङ्गो ज्ञेयः।]** | |

| | |
|---|---|
| # संवेशाय त्वोप..गायत्रिया अभिभूत्यै स्वाहा, # (संवेशाय त्वोप..) त्रिष्टुभो (अभिभूत्यै...), # (संवेशाय त्वोप..) जगत्या अभिभूत्यै | ३-१-७-(२-४) |
| **गायत्र्या इति पदादूर्ध्वं, अभिभूत्यै स्वाहेति पदद्वयस्यानुषङ्गः । त्रिष्टुभ इति पदस्य संवेशायेत्यादिः पूर्वानुषङ्गः, अभिभूत्यै स्वाहेत्युत्तरानुषङ्गः। जगत्या इति पदस्य संवेशायेत्यादिः पूर्वानुषङ्गः। एवमेते त्रयो मन्त्राः ।** | |

| | |
|---|---|
| उपयामगृहीतोऽसि प्रजापतये त्वेति, # (उपयाम..) इन्द्राय त्वेति, # (उपयाम..) विश्वेभ्यस्त्वा | ३-२-१-(३-५) |
| **उत्तरयोरपि मन्त्रयोः, उपयामगृहीतोऽसीत्यनुषज्यते ।** | |

| | |
|---|---|
| प्राणाय मे वर्चोदा वर्चसे पवस्व<br># अपानाय (मे वर्चोदाः...), # व्यानाय (मे वर्चोदाः..), # वाचे (मे वर्चोदाः..), # दक्षक्रतुभ्यां (मे वर्चोदौ..), # चक्षुर्भ्यां मे वर्चोदौ..., # श्रोत्राय (मे वर्चोदाः...),# आत्मने (मे वर्चोदाः...), # अङ्गेभ्यो (मे वर्चोदाः..), # आयुषे (मे वर्चोदाः...),# वीर्याय (मे वर्चोदाः...)., # विष्णो (जठरमसि वर्चोदा मे वर्चसे पवस्व),<br># इन्द्रस्य (जठरमसि वर्चोदा मे वर्चसे पवस्व,)# विश्वेषां देवानां जठरमसि वर्चोदा मे वर्चसे पवस्व | ३-२-३-(२-१५) |
| **अपानायेत्यादिषु मन्त्रेषु 'मे वर्चोदा वर्चसे पवस्व' इति शेषोऽनुषज्यते । अत्र शुक्रामन्थिनोर्द्वित्वाद्, वर्चोदाविति द्विवचनान्तत्वं द्योतयितुं, अनुषज्यमानस्य पुनः पाठः । विष्णोरिन्द्रस्येत्यनयोर्मन्त्रयोः, जठरमसीत्याद्यनुषज्यते ।** | |

| | |
|---|---|
| उप॑ मा॒ द्यावा॑पृथि॒वी ह्व॑येतां, # उपा॒॑ऽऽस्ता॒वः(ह्वयतां,)# (उप॑..)क॒लशः॑.. (ह्वयतां), # (उप॑..)सोमः॑.(ह्वयतां), #(उप॑..)अ॒ग्निः..(ह्वयतां), # (उप॑) दे॒वाः.. (ह्वयन्तां), # (उप॑ )यज्ञः..(ह्वयतां), उप॑ मा होत्रा उ॑पहवे ह्व॑यन्तां | ३-२-४-(२ -९) |
| **यथायोगमनुषङ्गद्योतनाय, उपशब्दः प्रयुक्तः। कल्पः – ह्वयेतां ह्वयन्तां ह्वयतां इति यथालिङ्गं सर्वत्रानुषजति ।** | |

| | |
|---|---|
| सूर्यो॑ मा दे॒वो दि॒व्यादꣳह॑सस्पातु, # वा॒युरन्तरि॑क्षात्.. (अꣳह॑सस्पातु), # अ॒ग्निः पृ॑थि॒व्याः.. (अꣳह॑सस्पातु),# य॒मः पि॒तृभ्यः॑... (अꣳह॑सस्पातु),# सर॑स्वती मनु॒ष्ये॒॑भ्यः... (अꣳह॑सस्पातु), | ३-२-४-(१५-१९) |
| **वाय्वग्निसरस्वतीमन्त्रेषु (अꣳहसः) पात्वित्यनुषञ्जनीयम् ।** | |

| | |
|---|---|
| ए॒तत्ते॑ तत॒ ये च॒ त्वामनु॒, # ए॒तत्ते॑ पितामह(ये च॒ त्वामनु),# (ए॒तत्ते॒॑) प्रपितामह॒ ये च॒त्वामनु॒, | ३-२-५-(१५-१७) |
| **पितामहेति मन्त्रे, ये च त्वामन्वित्युत्तरानुषङ्गः । प्रपितामहेति मन्त्रे, एतत्त इति पूर्वानुषङ्गः ।** | |

| | |
|---|---|
| # यो न॑ इन्द्रवायू ..अभि॒दास॑ति..., # मि॒त्रावरु॑णौ..(अभि॒दास॑ति...), अ॒श्विना॑वभि॒दास॑ति.... | ३-२-१०-(१३-१५) |
| **मित्रावरुणाविति द्वितीयमन्त्रे, अश्विनाविति तृतीयमन्त्रे च शेषं सर्वमनुषज्य व्याख्येयम्।** | |

| | |
|---|---|
| मान्दा॑सु ते शुक्र शु॒क्रं..., # भन्द॑नासु (ते शुक्र शु॒क्रं..),# कोत॑नासु (ते शुक्र शु॒क्रं...), # नूत॑नासु (ते शुक्र शु॒क्रं...),# रेशी॑षु (ते शुक्र शु॒क्रं...), # मेषी॑षु (ते शुक्र शु॒क्रं....), # वाशी॑षु (ते शुक्र शु॒क्रं...), # वि॒श्व॒भृत्सु॑ (ते शुक्र शु॒क्रं...), # माध्वी॑षु (ते शुक्र शु॒क्रं..).,# क॒कु॒हासु (ते शुक्र शु॒क्रं...), # शक्व॑रीषु (ते शुक्र शु॒क्रं....), शु॒क्रासु॑ ते शुक्र शु॒क्रं.... | ३-३-३-(४-१५) |
| **ते शुक्र शुक्रमाधूनोमीत्येतावान्, द्वादशस्वपि पदेष्वनुषज्यते । अनुषङ्गद्योतनायैव, आदावन्ते च द्विः पाठः ।** | |

| | |
|---|---|
| # अ॒ग्निर्भू॒ताना॒मधि॑पतिः..अ॒स्मिन्, # इन्द्रो॒॑ ज्ये॒ष्ठानां (अधि॑..अ॒स्मिन्...), # य॒मः पृ॑थि॒व्याः (अधि॑..अ॒स्मिन्...), | ३-४-५-(१-१८) |

| | |
|---|---|
| # वायुरन्तरिक्षस्य (अधि..अस्मिन्...), # सूर्यो दिवो (अधि..अस्मिन्...), # चन्द्रमानक्षत्राणां (अधि..अस्मिन्...), # बृहस्पतिर्ब्रह्मणो (अधि..अस्मिन्...), # मित्रः सत्यानां (अधि..अस्मिन्...), # वरुणोऽपां (अधि..अस्मिन्...), # समुद्रः स्रोत्यानां (अधि..अस्मिन्...), # अन्नꣳसाम्राज्यानामधिपति तन्माऽवत्वस्मिन् *, # सोम ओषधीनां (अधि..अस्मिन्...), # सविता प्रसवानां (अधि..अस्मिन्...), # रुद्रः पशूनां (अधि..अस्मिन्...), # त्वष्टा रूपाणां (अधि..अस्मिन्...), # विष्णुः पर्वतानां(अधि..अस्मिन्...), # मरुतो गणानामधिपतयस्ते माऽवन्त्वस्मिन् @, पितरः पितामहाः .. अस्मिन् | |
| **स मावत्वस्मिन्ब्रह्मन्, इत्येवं सर्वत्र पाठः संपद्यते । * लिङ्गव्यत्ययं द्योतयितुं, अधिपति तन्माऽवत्वित्याम्नातम्। @ वचनव्यत्ययंद्योतयितुं, अधिपतयस्ते माऽवन्त्वित्याम्नातम्।** | |

| | |
|---|---|
| ऋताषाडृतधामाऽग्निर्गन्धर्वस्तस्यौषधयोऽप्सरस ऊर्जो नाम स इदं ब्रह्म .. तस्मै स्वाहा। # सꣳहितो विश्वसामा.. नाम स .., # सुषुम्नः सूर्यरश्मिश्चन्द्रमा..(नाम स..) # भुज्युः सुपर्णो यज्ञो गन्धर्वः.. (नाम स..), # प्रजापतिर्विश्वकर्मा मनो..(नाम स..), # इषिरो विश्वव्यचा वातो.. (नाम स..), # परमेष्ठ्यधिपतिर्मृत्युः ..(नाम स..), # सुक्षितिः सुभूतिर्भद्रकृत् ..(नाम स..), # दूरेहेतिरमृडयो मृत्युः ..(नाम स..), # चारुःकृपणकाशी कामो.. नाम स.. | ३-४-७-(१,३,५,७,९,११,१४,१६,१८,२०) |
| **नाम स इदं ब्रह्मेत्यादिकं सर्वत्रानुषज्जनीयम् ।** | |

| | |
|---|---|
| अग्निना देवेन पृतना जयामि.. क्रामामि<br># इन्द्रेण देवेन ..भ्रातृव्यान् ..# विश्वेभिर्देवेभिः ..(भ्रातृव्यान् ..) | ३-५-३-१, २, ३ |
| **भ्रातृव्यानधरान्पादयामीत्यादिकमनुषज्य पूर्ववद्व्याख्येयम्** | |

| | |
|---|---|
| वसुभ्यो रुद्रेभ्य आदित्येभ्यः.. गृह्णामि, # (वसुभ्यो रुद्रेभ्यः..) सादयामि | ३-५-६-७,८ |
| **अत्र सादयामीत्येतावानाम्नातो मन्त्रः । तस्य च शेषत्वेन वसुभ्य इत्यादिकं गृह्णामीति पदव्यतिरिक्तं सर्वमनुषज्य पूर्ववद् व्याख्येयम् ।** | |

| | |
|---|---|
| ग्रास्त्वा॑ दे॒वीर्वि॒श्वदे᳚व्यावतीः, # वरू᳚त्रयः (त्वा दे॒वीर्वि॒श्वदे᳚व्यावतीः), जन॑यस्त्वा दे॒वीर्वि॒श्वदे᳚व्यावतीः | ४-१-६-(११-१३) |
| **वरूत्रय इति मन्त्रे, त्वा देवीरित्याद्युत्तरभागोऽनुषज्यते ।** | |

| | |
|---|---|
| # प्राची॑ दि॒शां॑ व॒स॒न्तऋ॑तू॒नाम॒ग्निः..., # दक्षि॑णा दि॒शां ग्री॒ष्मऋ॑तू॒नां..., # प्र॒तीची॑ दि॒शां व॒र्षा ऋ॑तू॒नां..., # उदी॑ची दि॒शाꣳ श॒रदृ॑तू॒नां..., ऊ॒र्ध्वा दि॒शाꣳ हे॑मन्तशिशि॒रावृ॑तू॒नां.... पि॒तर॑ः ... | ४-३-३-(१-५) |
| **सर्वेष्वेतेषु पञ्चसु मन्त्रेषु, अनुषज्जनीयं शेषमाह – पितरः पितामहा इति ।** | |

| | |
|---|---|
| # स॒जूर्ऋ॒तुभि॑ः स॒जूर्वि॒धाभि॑ः स॒जूर्व॒सुभि॑ः (स॒जूर्दे॒वैर्व॒यो॑ना॒धैः), # स॒जू रु॒द्रैः... (स॒जूर्दे॒वैर्व॒यो॑ना॒धैः), # स॒जूरा॑दि॒त्यैः..(स॒जूर्दे॒वैर्व॒यो॑ना॒धैः), # स॒जूर्विश्वै᳚र्दे॒वैः.. (स॒जूर्दे॒वैर्व॒यो॑ना॒धैः), स॒जूर्दे॒वैः ...स॒जूर्दे॒वैर्व॒यो॑ना॒धैः | ४-३-४-(६ -१०) |
| **पूर्वोत्तरभागौ सर्वत्रानुषज्यते। विधाभिरित्यन्तः पूर्वो भागः । सजूर्देवैर्वयोनाधैरित्याद्युत्तरो भागः ।** | |

| | |
|---|---|
| # राज्ञ्य॑सि॒ प्राची॒ दिक् ..(अ॒न्तरि॑क्षाय....) , # वि॒राड॑सि दक्षि॒णा दिक्.. (अ॒न्त-...) # स॒म्राड॑सि प्र॒तीची॒ दिक् ..(अ॒न्त-...), # स्व॒राड॒स्युदी॑ची॒ दिक्.. (अ॒न्त-...),अधि॑पत्न्यसि बृह॒ती दिक्.. अ॒न्तरि॑क्षाय ... | ४-४-२-(१-५) |
| **सर्वेष्वपि मन्त्रेषु, अनुषज्जनीयं शेषमाह – अन्तरिक्षायेति।** | |

| | |
|---|---|
| # अ॒यं पु॒रो हरि॑केशः सूर्य॑..(तेभ्यो॒नम॑ः..) # अ॒यं द॑क्षि॒णा वि॒श्वक॑र्मा (..तेभ्यो॒ नम॑ः...), # अ॒यं प॒श्चाद्वि॒श्वव्य॑चाः (..तेभ्यो॒ नम॑ः....) # अ॒यमु॒त्त॒रात्सं॒यद्व॑सुः.. (तेभ्यो॒ नम॑ः....), अ॒यमु॒पर्य॒र्वाग्व॑सु॒स्तस्य॒ .. (तेभ्यो॒ नम॑ः....) | ४-४-३-(१-५) |
| **एतेषु पञ्चस्वपि मन्त्रेषु, अनुषज्जनीयं शेषमाह – तेभ्यो नमस्त इति ।** | |
| इ॒न्द्रा॒ग्निभ्या᳚ं त्वा स॒युजा॑ यु॒जा यु॑नज्मि , # आ॒घा॒राभ्या᳚ं(त्वा स॒युजा᳚..), # तेज॑सा (त्वा स॒युजा᳚..), # वर्च॑सा (त्वा स॒युजा᳚..), # उक्थेभि॑ः (त्वा स॒युजा᳚..), # स्तोमे॑भिः(त्वा स॒युजा᳚...), # छन्दो॑भिः (त्वा स॒युजा᳚..), | ४-४-५-(१-७) |
| **आघाराभ्यामित्यादिभिःषड्भिस्तृतीयान्तैःसहप्रत्येकं, त्वा सयुजेत्यादि – शेषस्यानुषङ्गे सति षण्मन्त्राः संपद्यन्ते ।** | |

| | |
|---|---|
| # अम्बा (नामासि…), # दुला (नामासि…), #नितत्निः (नामासि…)<br># अभ्रयन्ती (नामासि…), # मेघयन्ती (नामासि…),<br># वर्षयन्ती (नामासि….), चुपुणीका नामासि… | ४-४-५-(९-१५} |
| **नामासीत्यादिशेषः सर्वेष्वपि पदेष्वनुषज्यते । ततः सप्तैते मन्त्राः ।** | |

| | |
|---|---|
| # यशोदां त्वा यशसि (सादयामि…), # तेजोदां त्वा तेजसि (सादयामि..),<br># पयोदां त्वा पयसि (सादयामि..), # वर्चोदां त्वा वर्चसि (सादयामि…),<br>द्रविणोदां त्वा द्रविणे सादयामि… | ४-४-६-(३०-३४) |
| **तेजोदां त्वेत्यादिषु चतुर्षु मन्त्रेषु सादयामीत्यादिकं सर्वमनुषज्य व्याख्येयम् ।** | |

| | |
|---|---|
| गोभिर्यज्ञं दाधार, # क्षत्रेण मनुष्यान्दाधार | ४-४-८-१६, १७ |
| **क्षत्रेण राज्ञा सह मनुष्यान्दाधारेत्यनुवर्तते ।** | |

| | |
|---|---|
| कृत्तिका नक्षत्रमग्निर्देवताऽग्ने रुचःस्थ .. (ऋचे..), # रोहिणी नक्षत्रं<br>प्रजापतिः..(ऋचे..), # मृगशीर्षं नक्षत्रꣳ सोमो .. (ऋचे..)<br># आर्द्रा नक्षत्रꣳ रुद्रो ..(ऋचे..), # पुनर्वसू नक्षत्रमदितिः ..(ऋचे..),<br># तिष्यो नक्षत्रं बृहस्पतिः..(ऋचे..), # आश्रेषा नक्षत्रꣳ सर्पाः ..(ऋचे..),<br># मघा नक्षत्रं पितरः ..(ऋचे..), # फल्गुनी नक्षत्रमर्यमा ..(ऋचे..),<br># फल्गुनी नक्षत्रं भगो ..(ऋचे..), # हस्तो नक्षत्रꣳ सविता..(ऋचे..),<br># चित्रा नक्षत्रमिन्द्रो..(ऋचे..), # स्वाती नक्षत्रं वायुः ..(ऋचे..),<br># विशाखे नक्षत्रमिन्द्राग्नी ..(ऋचे..), # अनूराधा नक्षत्रं मित्रो ..(ऋचे..),<br># रोहिणी नक्षत्रमिन्द्रो ..(ऋचे..), # विचृतौ नक्षत्रं पितरो ..(ऋचे..),<br># अषाढा नक्षत्रमापो ..(ऋचे..), # अषाढा नक्षत्रं विश्वे देवाः ..(ऋचे..),<br># श्रोणा नक्षत्रं विष्णुः ..(ऋचे..) , # श्रविष्ठा नक्षत्रंवसवो.. (ऋचे..),<br># शतभिषङ्नक्षत्रमिन्द्रो..(ऋचे..), # प्रोष्ठपदा नक्षत्रमजएक..(ऋचे..),<br># प्रोष्ठपदा नक्षत्रमहिर्बुध्नियो..(ऋचे..), # रेवती नक्षत्रं पूषा ..(ऋचे..),<br># अश्वयुजौ नक्षत्रमश्विनौ..(ऋचे..), # अपभरणीर्नक्षत्रं यमो ..(ऋचे..) | ४-४-१०-(१ – २६) |
| **कल्पः – ऋचे त्वा रुचे त्वेति सर्वासु नक्षत्रेष्टकास्वनुषजति । [द्वितीया रोहिणी ज्येष्ठा, विचृतशब्दो मूलवाची, पितृशब्दो निर्ऋतिवाची, शतभिषङ्नक्षत्रस्य वरुणो देवता, स च परमैश्वर्ययोगादिन्द्र इत्युच्यते ।]** | |

| | |
|---|---|
| # मधु॑श्च॒ माध॑वश्च ..(अ॒ग्नेर॑न्तः...), #शु॒क्रश्च॒ शुचि॑श्च .. (अ॒ग्नेर॑न्तः...),<br># नभ॑श्च नभ॒स्य॑श्च .. (अ॒ग्नेर॑न्तः...), #इ॒षश्चो॒र्जश्च॑ ..(अ॒ग्नेर॑न्तः...),<br># सह॑श्च सह॒स्य॑श्च .. (अ॒ग्नेर॑न्तः...), तप॑श्च तप॒स्य॑श्च .. अ॒ग्नेर॑न्तः... | ४-४-११-(१ -१२) |
| **सर्वेष्वप्यनुषज्जनीयं मन्त्रशेषमाह – अग्नेरन्त इति ।** | |

| | |
|---|---|
| # सं॒यच्च॒ प्रचे॑ताश्च ..(तेते॑...), # उ॒ग्रा च॑ भी॒मा च॑.. (तेते॑...),<br># ध्रु॒वा च॑ पृथि॒वी च॑ .. (तेते॑...),# ध॒र्त्री च॒ धरि॑त्री च.. (तेते॑...),<br>प्राची॑ च प्र॒तीची॑ च ..ते ते॑.... | ४-४-११-(१३-१७) |
| **सर्वेष्वप्यनुषज्जनीयं मन्त्रशेषमाह –ते तेऽधिपतयः इति ।** | |

| | |
|---|---|
| नमो॑ वः किरि॒केभ्यो॑ दे॒वाना॒ꣳ हृद॑येभ्यः, # नमो॑ विक्षीण॒केभ्यो॑ (दे॒वानां॑..),<br># नमो॑ विचिन्व॒त्केभ्यो॑ (दे॒वानां॑...), # नम॑ आनिर्ह॒तेभ्यो॑ (दे॒वानां॑...),<br># नम॑ आमीव॒त्केभ्यो॑ (दे॒वानां॑...), | ४-५-९-(१५-१९) |
| **अत्र विक्षीणक, विचिन्वत्क, आनिर्हत, आमीवत्केषु देवानाꣳ हृदयेभ्य इत्यनुषज्यते ।** | |

| | |
|---|---|
| स॒हस्रा॑णि सहस्र॒शो ये .. तेषां॑...,# अ॒स्मिन्म॑ह॒त्य॑र्ण॒वे॑ऽन्तरि॑क्षे..(तेषां॑..),<br># नील॑ग्रीवाःशिति॒..श॒र्वाः.. (तेषां॑..), # नील॑ग्रीवाः शिति॒..दिवꣳ॑..<br>(तेषां॑..), # ये वृ॒क्षेषु॑ स॒स्पिञ्ज॑राः .. (तेषां॑...), # ये भू॒ताना॒मधि॑पतयः<br>..(तेषां॑...), # येअन्ने॑षु वि॒विध्य॑न्ति .. (तेषां॑..), # ये प॒थां प॑थि॒रक्ष॑यः<br>..(तेषां॑..), # ये ती॒र्थानि॑प्र॒चर॑न्ति.. (तेषां॑...), य ए॒ताव॑न्तश्च॒<br>भूयाꣳ॑सश्च..तेषां॑... | ४-५-११-(१-१०) |
| **तेषां सहस्रयोजन इत्याद्युक्तार्थं द्वितीयादिषुनवमान्तास्वृक्षु अनुषज्यते ।** | |

| | |
|---|---|
| # नमो॑ रु॒द्रेभ्यो॒ ये पृ॑थि॒व्यां येषा॒मन्न॒मिष॑वः..(तेभ्यो..), # (नमो॑ रु॒द्रेभ्यो॒)<br>ये॑ऽन्तरि॑क्षे॒ येषां॒ वात॒ इष॑वः. ..(तेभ्यो..), # (नमो॑ रु॒द्रेभ्यो॒) ये दि॒वि<br>येषां॑व॒र्षमिष॑वः. ..(तेभ्यो..),. | ४-५-११-(११-१३) |
| **नमो रुद्रेभ्य इत्युपक्रम्य ये पृथिव्यां येषामन्नमिषव इत्याद्यो मन्त्रः । येऽन्तरिक्षे येषां वात इषव इति द्वितीयो मन्त्रः । ये दिवि येषां वर्षमिषव इति तृतीयो मन्त्रः । तेभ्यो दश प्राचीरित्यादि सर्वत्र समानम् ।** | |

| | |
|---|---|
| वि॒श्वक॑र्मा दि॒शां पति॒ः स न॑ः..., # प्रजाप॑तिः (दि॒शां पति॒ः स न॑ः....),<br># रु॒द्रो (दि॒शां पति॒ः स न॑ः...), # वरु॑णो (दि॒शां पति॒ः स न॑ः....),<br>अ॒ग्निर्दि॒शां पति॒ः स न॑ः... | ५-५-५-(१-५) |
| **प्रजापतिरित्यादिभिः, चतुर्भिः पदैः, चत्वारो मन्त्रा उत्पन्नाः। सर्वत्रानुषङ्गाय दिशां पतिरिति पुनः पाठः।** | |

| | |
|---|---|
| # प्रा॒णाय॑(त्वा॒ चक्षु॑षे त्वा..), # व्या॒नाय॑ (त्वा॒ चक्षु॑षे त्वा..),<br># अ॒पा॒नाय॑ (त्वा॒ चक्षु॑षे त्वा..), वा॒चे त्वा॒ चक्षु॑षे त्वा .. | ५-५-५-(१०-१३) |
| **त्वा चक्षुषे त्वा तयेत्यादि सर्वत्रानुषज्यते।** | |

| | |
|---|---|
| अग्ने॑ उद॒धे या त॒ इषु॑र्यु॒वा नाम .., # अग्ने॑ दु॒ध्र (या त इषु॑र्यु॒वा नाम॑...),<br># (अग्ने॑) गह्य॒ (या त॒ इषु॑र्यु॒वा नाम॑.....), # (अग्ने॑) किꣳशिल॒ (या त॒ इषु॑र्यु॒वा..), # (अग्ने॑) वन्य॒ या त॒ इषु॑र्यु॒वा नाम॑... | ५-५-९-(१-५) |
| **दुध्रादीनि चत्वार्यग्निविशेषनामानि । तैर्मन्त्रश्चतुर्धा भिद्यते । सर्वेषामप्यग्निशब्द आदावनुषज्यते । या त इषुरित्यादिरन्त्यानुषङ्गः ।** | |

| | |
|---|---|
| स॒मीची॒ नामा॑सि॒ प्राची॒ दिक्तस्या॑स्ते... (र॒क्षि॒ता..) # ओ॒ज॒स्विनी॒ नामा॑सि द॒क्षि॒णा दिक्... (र॒क्षि॒ता..)., # प्राची॒ नामा॑सि प्र॒तीची॒ दिक्.... (र॒क्षि॒ता..),<br>#अ॒व॒स्थावा॒ नामा॒स्युदी॑ची॒दिक्.... (र॒क्षि॒ता..), #अधि॑पत्नी॒ नामा॑सि बृह॒ती दिक्.... (र॒क्षि॒ता..), व॒शिनी॒ नामा॑सी॒यं दिक्तस्या॑स्ते.. र॒क्षि॒ता.. | ५-५-१०-(१-६) |
| **रक्षितेत्यादिशेषोऽनुषज्यते । रक्षितेत्यादेः सर्पस्य वाचकेभ्यः शब्देभ्य ऊर्ध्वमनुषङ्गद्योतनाय, अन्तिममन्त्रे पुनः पाठः ।** | |

| | |
|---|---|
| # हे॒तयो॒ नाम॑स्थ॒ तेषा॑ं वः पु॒रो ..(वा॒त॒ना॒मं..), # नि॒लि॒म्पा नाम॑ स्थ॒ .. द॒क्षि॒णा....(वा॒त॒ना॒मं..), # व॒ज्रि॒णो॒ नाम॑ स्थ॒ .. प॒श्चात्......(वा॒त॒ना॒मं..),<br># अ॒व॒स्थावा॑नो॒ नाम॑ स्थ॒ .. उ॒त्त॒रात्....(वा॒त॒ना॒मं..), # अधि॑पतयो॒ नाम स्थ॒ ..उ॒परि....(वा॒त॒ना॒मं..), क्र॒व्या नाम॑स्थ॒ पार्थि॑वाः... ..वातना॒मं.. | ५-५-१०-(८-१३) |
| **चरममन्त्रे पठितं वातनाममित्यादिकं सर्वेष्वपि मन्त्रेष्वनुषज्यते ।** | |

| | |
|---|---|
| # इन्द्र॑स्य॒ वज्रो॑ऽसि ..यो न॑ः पु॒रस्ता॑त् ..अ॒घा॒युः...., # (इन्द्र॑स्य॒.. यो न॑ः)<br>दक्षि॒णतः..(अ॒घा॒युः…), # (इन्द्र॑स्य॒.. यो न॑ः) प॒श्चात्.. (अ॒घा॒युः…), | ५-७-३-(१-४) |

| | |
|---|---|
| # ( इन्द्रस्य.. यो न)उत्तरतः .. (अघायुः…), | |
| **दक्षिणत इत्यादिभिस्त्रिभिः पदैस्त्रयो मन्त्रा भिद्यन्ते । तेषु त्रिष्वपि, अवशिष्टमनुषज्जनीयम् ।** | |

| | |
|---|---|
| अग्निना तपोऽन्वभवत्, # वाचा ब्रह्म (अन्वभवत्), # मणिना रूपाणि (अन्वभवत्), # इन्द्रेण देवान् (अन्वभवत्), # वातेन प्राणान् (अन्वभवत्),# सूर्येण (द्यां (अन्वभवत्), # चन्द्रमसा नक्षत्राणि (अन्वभवत्),# यमेन पितृन् (अन्वभवत्), # राज्ञा मनुष्यान् (अन्वभवत्),# फलेन नादेयान् (अन्वभवत्), # अजगरेण सर्पान् (अन्वभवत्),# व्याघ्रेणारण्यान्पशून् (अन्वभवत्), # श्येनेन पतत्रिणः (अन्वभवत्), # वृष्णाश्वान्(अन्वभवत्), # ऋषभेण गाः (अन्वभवत्), # बस्तेनाजाः(अन्वभवत्), # वृष्णिनावीः (अन्वभवत्), # व्रीहिणान्नानि (अन्वभवत्), # यवेनौषधीः (अन्वभवत्), # न्यग्रोधेन वनस्पतीन् (अन्वभवत्), # उदुम्बरेणोर्जं (अन्वभवत्), # गायत्रिया छन्दांसि (अन्वभवत्), # त्रिवृता स्तोमान् (अन्वभवत्), # ब्राह्मणेन वाचं (अन्वभवत्), | ७-३-१४-(१-२४) |
| **अन्वभवदिति सर्वत्रानुषज्यते ।** | |

| | |
|---|---|
| मेषस्त्वा पचतैरवतु @<br># लोहितग्रीवश्छागैः (त्वाऽवतु), # शल्मलिर्वृद्ध्या (त्वाऽवतु),<br># पर्णो ब्रह्मणा (त्वाऽवतु), # प्लक्षो मेधेन(त्वाऽवतु),<br># न्यग्रोधश्चमसैः (त्वाऽवतु), # उदुम्बर ऊर्जा (त्वाऽवतु),<br># गायत्री छन्दोभिः (त्वाऽवतु), # त्रिवृत्स्तोमैस्त्वाऽवतु | ७-४-१२-(१-९) |
| **@ एवमुत्तरेष्वपि मन्त्रेषु त्वामवत्विति (त्वाऽवतु) अनुषज्जनीयम् ।** | |

| | |
|---|---|
| देवस्य त्वा सवितुः प्रसवे । अश्विनोर्बाहुभ्याम्। पूष्णोहस्ताभ्यां प्रतिगृह्णामि ।राजा त्वावरुणो नयतु देवि दक्षिणेऽग्नये हिरण्यम् । तेनामृतत्वमश्याम्। … उत्तानस्त्वाऽङ्गीरसः प्रतिगृह्णातु ।<br># सोमाय वासः । # रुद्राय गाम् । # वरुणायाश्वम् । # प्रजापतये पुरुषम् । # मनवे तल्पम् । # त्वष्ट्रेऽजाम् । # पूष्णेऽविम् ।<br># निर्ऋत्या अश्वतरगर्दभौ । # हिमवतो हस्तिनम् ।<br># गन्धर्वाप्सराभ्यः स्रगलङ्करणे । # विश्वेभ्यो देवेभ्यो धान्यम् । | आ.३-१०-(१-१७) |

| | |
|---|---|
| # वा॒चेऽन्न॑म् । # ब्रह्म॑ण ओद॒नम् । # स॒मु॒द्रायाप॑ः ।<br># उ॒त्ता॒नाया॑ऽङ्गीर॒सायान॑ः । # वै॒श्वा॒न॒राय॒ रथ॑म् । | |
| **एतेषु सर्वेषु मन्त्रेषु देवि दक्षिण इत्यन्तः पूर्वानुषङ्गः । तेनामृतत्वादिकमित्युत्तरानुषङ्गः ।<br>रथप्रतिग्रहमन्त्रस्य शेषभूतां, उत्तरानुषङ्गात्पूर्वभाविनीं कांचिदृचमाह -<br>वै॒श्वा॒न॒रः प्र॒त्नथा॒ नाक॒मारु॑हत् ... इत्यादि ।<br>अस्या ऋच उपरितनं रथप्रतिग्रहमन्त्रशेषमाह - राजा॑ त्वा वरुणो नयतु देवि दक्षिणे वैश्वान॒राय॒ रथ॑म् । तेना॑मृत॒त्वम॑श्याम् । ... इत्यादि ।** | |

| | |
|---|---|
| या पु॒रस्ता॑द्वि॒द्युदाप॑तत् । तां त॑ ए॒तेनाव॑यजे ।<br># या द॑क्षि॒ण॒तः (वि॒द्युदाप॑तत् .....), # या प॒श्चात् (वि॒द्युदाप॑तत् .....),<br># योत्त॑र॒तः(वि॒द्युदाप॑तत् .....), । | आ.४-१४ |
| **या दक्षिणत इत्यादिषुत्रिषुविद्युदापददित्यादिकमनुषज्यते।** | |

| | |
|---|---|
| अग्ने॑ व्रतपते व्र॒तं च॑रिष्यामि ।... # वायो॑ व्रतपते....(व्र॒तं...),<br># आदि॑त्यव्रतपते....(व्र॒तं...), । | आ.४-४१-५ |
| **वायो व्रतपत इत्येतस्मिन्नुत्तरस्मिंश्चव्रतं चरिष्यामीत्यादिकमनुषज्यते ।** | |

| | |
|---|---|
| आदि॑त्य व्रतपते व्र॒तम॑चारिषं....), # वायो॑ व्रतपते (व्र॒तं...), # अग्ने॑ व्रतपते (व्र॒तं...) । | आ.४-४१-६ |
| **...आवृत्तैर्देवता उपस्थाय। [पूर्ववदनुषज्यते]** | |
| पृ॒थि॒व्यास्त्वा॑ लो॒के सा॑दयाम्य॒मुष्य॒ शर्मा॑सि पि॒तरो॑ दे॒वता॑ । प्र॒जाप॑तिस्त्वा सादयतु॒ तया॑ दे॒वत॑या * ।<br># अ॒न्तरि॑क्षस्य त्वा .. # दि॒वस्त्वा॑ .., # दि॒शां त्वा॑ .., #नाक॑स्य त्वा पृ॒ष्ठे.. , # ब्र॒ध्नस्य॑ त्वा वि॒ष्टपे॑ सादयामि ... । ** | आ. ६-७-(१५-२०) |
| ***   अत्र, अङ्गिरस्वद्ध्रुवा सीदेत्येतावत् अध्याहर्तव्यम् ।<br>**  सर्वत्र अनुषङ्गद्योतनाय सादयामीत्यादेः पुनः पाठः ।** | |

| | |
|---|---|
| अ॒पू॒पवा॑न् घृ॒तवा॑ꣳ श्च॒रुरेह सीदतू॒त्तभ्नु॒वन्पृ॑थि॒वीं द्यामु॒तोपरि॑ । यो॒नि॒कृत॑ः पथि॒कृत॑ः सपर्य॒त ये दे॒वाना॑ं घृ॒तभा॑गा इ॒ह स्थ । ए॒षा ते॑ य॒मसाद॑ने स्व॒धा निधी॑यते गृ॒हेऽसौ । दशा॑क्षर॒ा ता ꣳ रक्ष॑स्व॒ तां गोपा॑यस्व॒ तां ते॒ परि॑ददामि॒ तस्या॑ं त्वा॒ मा द॑भन्पि॒तरो॑ दे॒वता॑ । प्र॒जाप॑तिस्त्वा सादयतु॒ तया॑ दे॒वत॑या * । | आ.६-८-(१-५) |

| | |
|---|---|
| # अ॒पू॒पवा᳚न् श्रृ॒तवा᳚न् .. श्रृ॒तभा॑गाः .. श॒ताक्ष॑रा .. ता ॳ र॑क्षस्व - इत्यादि । <br> # अ॒पू॒पवा᳚न् क्षी॒रवा᳚न् .. क्षी॒रभा॑गाः..स॒ह॒स्रा᳚क्षरा .. ता ॳ र॑क्षस्व - इत्यादि । <br> # अ॒पू॒पवा॒न् द॒धि॑वान् .. द॒धि॑भागाः..अ॒यु॒ता᳚क्षरा ...ता ॳ र॑क्षस्व - इत्यादि । <br> अ॒पू॒पवा॒न् म॒धु॑मान् .. म॒धु॑भागाः .. अच्यु॑ताक्षरा .. ता ॳ र॑क्षस्व - इत्यादि । | |
| **अत्र श्रृतवानित्यादि -पदचतुष्टयेन मन्त्रभेदो द्रष्टव्यः । श्रृतभागा इत्यादीन्यपि चत्वारि पदानि, शताक्षरेत्यादीन्यपि चत्वारि पदानि, चतुर्ष्वपि मन्त्रेषु विभज्य योजनीयानि । * प्रजापतिरित्यादि पूर्ववत् । [अत्र, अङ्गिरस्वद्ध्रुवा सीदेत्येतावत् अध्याहर्तव्यम् । ]** | |

| | |
|---|---|
| अग्ने᳚ प्रायश्चित्ते॒ त्वं दे॒वानां॒ प्राय॑श्चित्तिरसि... कृणोमि॒ स्वाहा᳚। <br> # वायो᳚ प्रायश्चित्ते (त्वं दे॒वानां....) # आदि॑त्य प्रायश्चित्ते (त्वं दे॒वानां....) <br> प्रजा॑पते प्रायश्चित्ते॒ त्वं दे॒वानां.... । | मं.प्र. १-१०-(३-६) |
| **मध्यमयोश्च 'त्वं देवानाम्' इत्यादेरनुषङ्गः । [हरदत्तभाष्यम्]** | |

| | |
|---|---|
| भूर॒पां त्वौष॑धीनां .. सन्त्वसौ । # भुवो॒ऽपां (ओष॑धीनां ....), # सुव॑र॒पां (ओष॑धीनां ....), भूर्भुव॒स्सुव॑र॒पाम् त्वौष॑धीनां .. सन्त्वसौ | मं.प्र. २-१४-(११-१४) |
| **उत्तरेषु व्याहृतिमात्रं भिद्यते । [हरदत्तभाष्यम्]** | |

*******

# ॥ सन्नन्त पदानि ॥ (Desideratives)

[**धातोः कर्मणः समानकर्तृकादिच्छायां वा** ।इषि कर्मीभूतव्यापारवाचकाद्धातोः सन् प्रत्ययो वा स्यात् इच्छायाम् ॥]

## उदाहरणानि

| | |
|---|---|
| १ | सं.१-२-१४-७ **पिप्रीषति** स्व आयुषि दुरोणे<br>यो यजमानः स्व आयुषि यावज्जीवं दुरोणे स्वगृहे नित्येन प्रतिदिनमनुष्ठेयेन हविषा त्वां पिप्रीषति प्रीणयितुं इच्छति… । |
| २ | सं. १-२-१४-१३ **विश्ववेदादिप्संन्तः** - रिपुं दंभितुं परिभवितुं इच्छन्तः (भ.भा.) |
| ३ | सं.१-४-४६-९ (सं.२-२-४-९ ) वाजं वा एष **सिसीर्षति** यः संग्रामं **जिगीषति** - लोके युद्धं जेतुमिच्छुः, जयादूर्ध्वं वैरिसंबद्धमन्नं कृत्स्नं प्राप्तुमिच्छति। [सिसीर्षति – सर्तुं इच्छति – प्राप्तुं इच्छति भ.भा.] |
| ४ | सं.१-५-१-१ **अवरुरुत्समानाः**– अवरोद्धुं इच्छावन्तः । |
| ५ | सं. १-५-२ आरम्भे भाष्ये – **विधित्सुः** विधातुं इच्छुः । |
| ६ | सं.१-५-२-८ प्रकाशं **जिगमिषति** ,<br>सं.२ -३-३-३, २-३-४-३ यत्र **जिगमिषति** - गन्तुं इच्च्छति। |
| ७ | सं.१-७-१०-३ **अदित्सन्तं** दापयतु प्रजानन्<br>हविर्दातुं अनिच्छन्तं मां मदीयबुद्धि-प्रेरणेन हविर्दापयतु । |
| ८ | सं. १-८-५-१३ **यन्मातरं पितरं** वा **जिहिंस्सिम** -जिहिंस्सिम हिंसितुं इच्छेम । |
| ९ | सं २-१-१०-१ **सोमं पिपासति** - [पिपासति पातुं इच्छति।] |
| १० | सं.२-६-१-१० **अथासुरा यज्ञमजिघांस्सन्** - असुरा यज्ञं हनिष्याम इत्यैच्छन् |
| ११ | सं. ३-२-२-४ **असुरा यज्ञमन्ववाजिगांस्सन्** - असुरा देवैः क्रियमाणं यज्ञं अनुक्रमेण अवगन्तुमैच्छन् |

| | |
|---|---|
| १२ | सं.३-२-३-१८ **बुभूषन्नवेक्षेत** - बुभूषन् भवितुं इच्छन् |
| १३ | सं.३-३-२-३ वाचमुद्यासꣳ **शुश्रूषेण्यां** मनुष्येभ्यः - उद्यासं सवनत्रये कथयामि । कीदृशीं वाचम् । देवेभ्यो मधुमतीं देवानां मधुवत्प्रियतमां मनुष्येभ्यः शुश्रूषेण्यां मनुष्यैः होत्रादिभिः श्रोतुं इष्यमाणाम् ।<br>ब्रा.२-३-११-३ **शुश्रूषुः** पुत्राणाꣳ हृद्यतमः - शुश्रूषुः – यः पितुर्वाक्यमादरेण श्रोतुं इच्छति स एव पितुर्हृद्यतमः, अत्यन्तं प्रियः । |
| १४ | सं.३-५-८-२ अपेन्द्र द्विषतो मनोऽप **जिज्यासतो** जहि - जिज्यासतः योऽस्मान् क्षपयितुं इच्छति तस्य च मनोऽप जहि (भ.भा.) |
| १५ | सं. ४-६-७-७ **जिगीषमाणमिष** आ पदे गोः - जिगीषमाणं जेतुं इच्छायुक्तम् |
| १६ | सं.५-५-५-१४ अग्निना वै देवाः सुवर्गं लोकम**जिगाꣳसन्** - पुरा कदाचिद् देवाः चीयमानमग्निं साधनं कृत्वा स्वर्गं प्राप्तुमैच्छन् ।<br>सं. ६-५-८-३ देवा वा इत इतः पत्नीः सुवर्गं लोकम**जिगाꣳ सन्** - देवाः पत्नीः इत इतः पात्नीवतं ग्रहमुपेक्ष्य अन्यस्माद् ग्रहात् स्वर्गं ज्ञातुं इच्छन्तोऽपि न प्रज्ञातवन्तः। |
| १७ | ब्रा.२-७-१४-१ इमान्म **ईप्सेति** - ईप्स आप्तुं इच्छ<br>ब्रा. ३-८-१६-१ प्रजापतिं वा एष **ईप्सतीत्याहुः** - ईप्सति आप्तुं इच्छति |
| १८ | ब्रा.२-८-६-१६ **सिषासन्तो** जीगिवाꣳसः स्याम - सिषासन्तः फलं लब्धु-मिच्छन्तः वयं जीगिवांसः जेतुं प्राप्तवन्तः स्याम। |
| १९ | ब्रा.३-१२-९-८ इदꣳ सर्वꣳ **सिषासतां** - अन्तपर्यन्तं कर्तुं इच्छताम्। |
| २० | ब्रा. ३-१२-२-९ स्वर्गं वै लोकमनु **विवित्ससि**- अन्विष्य वेतुं लब्धुं इच्छसि । |
| २१ | आ.१-२८-२ ईर्ष्यासूये **बुभुक्षां** – अन्नाभावेनबाधा बुभुक्षा (भोक्तुं इच्छा बुभुक्षा) |
| २२ | आ.६-१-१९ हरसा **जर्हृषाणः** स्वकीयेन तेजसा हर्तुमिच्छन् । |
| २३ | आ.१०-७९-१७ स भव्यं जिज्ञासक्लृप्तः– जिज्ञासया वेदान्तविचारणेन सर्वात्मकतया निश्चितो भवति [ज्ञातुं इच्छा जिज्ञासा] |

*****

# ॥ यङ्न्त पदानि ॥ (Frequentatives)

**[धातोरेकाचो पौनःपुन्ये भृशार्थे च द्योत्ये एकाचो हलादेर्धातोर्यङ् स्यात्।**

पुनः पुनर्भवति इत्यर्थे भूधातोःयङ् भवति ॥]

**[यङोऽचि च । यङोऽच् प्रत्यये परे लुक् स्यात् ]**

## उदाहरणानि

| | |
|---|---|
| १ | सं.१-१-१४-४ सुहवा **जोहवीमि** - जोहवीमि भृशं आह्वयामि ह्वयतेर्यङ् लुक्।(भ.भा.)<br>सं.४-७-१५-२ नाथितो **जोहवीमि**– जोहवीमि पुनः पुनः जुहोमि ।<br>ब्रा.२-५-६-९ **इन्द्रमाजोहुवानाः** - आजोहुवानाः सर्वतः आह्वानं कुर्वन्तः । |
| २ | सं.१-३-१४-१० **नानदद्भिर्यविष्ठः** - नानदद्भिः अत्यर्थं नदद्भिः। स्तुवद्भिः ऋत्विग्भिःयजमानगणैर्वा परिवृतः । यङ् लुगन्ताच्छतरि ‘अभ्यस्तानामादिः’ इत्याद्युदात्तत्वम्।(भ.भा.) |
| ३ | सं.१-५-११-६ त्वमग्ने शोचिषा **शोशुचानः**– शोचिषा दीप्त्या शोशुचानः भृशं दीप्यमानः । शुचेर्यङ् लुगन्ताद्व्यत्ययेनात्मनेपदम् ।(भ.भा.)<br>सं.२-५-१२-२२ त्वंनो अग्ने ... **शोशुचानः** – अत्यन्तं दीप्यमानः ।<br>सं. ४-१-५-१ विपाजसा पृथुना**शोशुचानः**।<br>ब्रा.२-४-२-१४ वृषभः **शोशुचानः** - अत्यन्तं दीप्यमानः। |
| ४ | सं. १-८-१३-४३ **सरीसृपेभ्यः** स्वाहा– सर्पणशीलाः सारीसृपाः । सृपेर्यङ् लुगन्तात् पचाद्यचि अभ्यासस्य रीगागमः । (भ.भा.) |
| ५ | सं.२-४-१४-६ अभि त्वा शूर **नोनुमः** – हे शूर, विक्रान्त, इन्द्र, त्वामभि नोनुमः आभिमुख्येन अत्यर्थं नुमः । नौतेर्यङ् लुगन्तात् लट् ।(भ.भा.) |
| ६ | सं. २-५-२-४ **जञ्जभ्यमानात्**- शीतरूरावेशनेन आस्यं व्यादाय जृम्भमाण-गात्रात्... लुपसदचरजपजभदहदशगृभ्यो भावगर्हायां इति यङ् ।(भ.भा.) |
| ७ | सं.२-५-१२-१८ **मर्मृज्यमानाः** परियन्त्यापः– मर्मृज्यमानाः तत्संयोगेन शोध्यमानाः । |

| | |
|---|---|
| | ब्रा.१-२-१-७० **मर्मृज्यमाना** महते सौभगाय - मर्मृज्यमाना अतिशयेन शोध्यमाना (भ.भा. भृशं शोधयन्ती भुवनानि भृशं अलङ्क्रियमाणा वा मृजूष् शौचालङ्कारयोः )। <br> ब्रा.२-७-१६-१७ **मर्मृज्यन्ते** द्वीपिनमप्स्वन्तः – मर्मृज्यन्ते, अभिषेकलेपान्पुनः पुनः शोधयन्ति। अप्स्वन्तः – जलमध्ये द्वीपिनं गजं यथा प्रक्षालयन्ति तद्वदित्यर्थः । |
| ८ | सं. ३-१-११-२१ कृष्णो **नोनाव** - पुनःपुनः, गर्जनमकरोत् । <br> नोनाव प्रशस्तं शब्दं भृशं करोति नौतेर्यङ् लुगन्तात् च्छान्दसो लिट् (भ.भा.)। |
| ९ | सं. ४-६-६-१३ आजङ्घन्ति – सर्वतस्ताडयन्ति [यङ् लुकि] |
| १० | सं.५-३-१-८ **वायुरावरीवर्ति** - वायुः पुनः पुनः आवर्तते । <br> आ. ४-७-१ **आवरीवर्ति** भुवनेष्वन्तः - सर्वेषु लोकेषु मध्ये पुनःपुनरावर्तते। |
| ११ | ब्रा.१-२ -१-३१ स **वावृधानः** - अत्यन्तं वर्धमानः। |
| १२ | ब्रा.२ -४-६-३४ अयꣳ शत्रूञ्जयतु **जर्हृषाणः** – जर्हृषाणः अत्यन्तं हृष्यन् शत्रूञ्जयतु । |
| १३ | ब्रा.२-५-५-१२ दम आ **दीदिवाꣳसं**- दीदिवांसं सर्वतो दीप्यमानं। |
| १४ | ब्रा.२-५-८-२७ श्रुधि ब्रह्म **वावृधस्वोत** गीर्भिः - वावृधस्व अतिशयेन वर्धस्व । (भ.भा.) |
| १५ | ब्रा.२-८-४ -१२ प्र स्वां मतिर्मतिरच्छा**शदानः** - शाशदानः पुनः पुनः वैरिणः विनाशयन् । |
| १६ | ब्रा.२-८-५-१० कृतब्रह्मा **शूशुवद्**रातहव्य इत् –शूशुवत् अतिशयेन वर्धते। |
| १७ | ब्रा.२-८-७ -२२ स **पप्रथानो** अभि पञ्च भूम - पप्रथानः अतिशयेन प्रथमानः । |
| १८ | आ.३-११-२३ श्वेतꣳ रश्मिं **बोभुज्यमानं** - बोभुज्यमानं सर्वैः प्राणिभिः वृष्टिद्वारेण पुनः पुनर्भुज्यमानं । |
| १९ | ब्रा.३-१-१-१८ ऋषभो **रोरवीति** - अस्मदनुग्रहाय देवलोके घोषं करोति । <br> आ. ६-३-१ वृषभो **रोरवीति** - रोरवीति अतिशयेन ध्वनिं करोति। <br> आ.१०-१२-१० वृषभो **रोरवीति** - रोरवीति अतिशयेन प्रतिपादयति । |

*****

# ॥ लेड्रूपाः शब्दाः ॥

लड्वर्तमाने लेड्वेदे भूते लङ् लुङ् लिटस्तथा ।
विध्याशिषोस्तु लिङ् लोटौ लुट् लृट् लृङ् च भविष्यति ॥

लेड्रूपाः शब्दाः प्रायशः ऐकारान्ताः भवन्ति (लेटि ऐकारः) । [लिङर्थे लेट्]

उदाहरणानि -

| | |
|---|---|
| १ | सं.१-१-१३-१४ नेदेष त्वदप चेतयातै – त्वत्तो नैव, अपरक्तचित्तो भवेत् – लेटि अडागमः, ऐत्वम् (भ.भा) |
| २ | सं.१-३-१४-१७ स्वाधियं जनयत्सूदयच्च – जनयत् जनयतु – जनेर्लेट् ; सूदयच – सूदयतु च –किं? यजमानस्य पापं – पूर्ववल्लेट् (भ.भा.) |
| ३ | सं.१-५-१-२ ऋध्नवत्खलु– ऋध्नवत् ऋध्नुयात् ऋध्नोतेर्लेटि अडागमः (भ.भा.) |
| ४ | सं.१-५-१-२ अग्निमादधाता इति– आदधातै आदधीत– दधातेर्लेटि अडागमः(भ.भा.) |
| ५ | सं. २-३-६-१ लोकानभ्यतिरिच्यातै- लोकानभिव्याप्य अतिरिक्तं भवति |
| ६ | सं. २-५-२-८ सतोभयेन भुनजाध्वा इति -भुनजाध्वै सुहिता भवितुमर्हथ |
| ७ | सं. २-५-६-११ देवा इज्यान्ता इति – इज्यन्तामिति |
| ८ | सं. २-६-१०-१ यजातै – यजेत, अपगुरातै - अपगोरणादि करोति, अपगोरणं ताडनोद्योगः |
| ९ | सं.३-३-११-१२ अन्विदनुमते त्वं मन्यासै -सर्वथेदमनुमन्यस्व |
| १० | सं.५-२-१०-८ उपधीयान्तै – उपधीयन्ते |
| ११ | सं.६-२-७-१ आहुतिरश्नवता इति – विशेषेण प्राप्नोतु |
| १२ | सं.-६-२-८ -६ अस्थानि शातया इति - शातयै परित्यजानि |
| १३ | सं ६-४-७-२ ग्रहा गृह्यान्तै– गृह्यन्ताम् |
| १४ | सं ६-४-७-३ पात्राण्युच्यान्तै – उच्यन्ताम् |
| १५ | सं ६-४-७-५ सह गृह्यातै– गृह्यताम् |
| १६ | सं ६-५-६-३ योऽतो जायातै–जायते , प्रजायामृध्यातै – प्रजायां यः समृद्धः |
| १७ | सं. ७-५-१-१ शृङ्गाणि नो जायन्तै – जायन्ताम् |

| | |
|---|---|
| १८ | ब्रा. १-६-७-९ निरुप्यातै – निरुप्यताम् |
| १९ | ब्रा. १-७-७-१३ नाभिचरितवै– नाभिचरणीयः |
| २० | ब्रा. २-४-३-११ मनसा यजातै –प्रकर्षेणयजते |
| २१ | ब्रा.२-४-७-२१ न पराजयासै– कदाचिदपि पराजयं न प्राप्स्यसि |
| २२ | ब्रा.२-६-६-१३ विभुं कामं व्यश्नवै – व्याप्तं फलं प्राप्नवानि |
| २३ | ब्रा.२-७-३-८ अनुमतवज्रः सूयाता इति– सूयातै – अभिषेकमर्हति |
| २४ | ब्रा. ३-३-३-८ युक्तं क्रियाता आशीः कामे युज्याता इति – मया शास्त्रीयं कर्म क्रियते अतः सौमनस्यादिरूपा ममेयमाशीः फले युज्यताम् |
| २५ | ब्रा. ३-७-६-२४ इह कामयातै – कामयेत – लेट्याडागमः [भ.भा.] |
| २६ | आ. ३-२-२ जजनदिन्द्रमिन्द्रियाय - जजनत् जनयतु इन्द्रं यजमानं कर्मेश्वरं इन्द्रियाय वीर्यार्थं वीर्यस्याऽऽश्रयोऽयं यथा स्यादिति । जनेर्लेटि शपः श्लुः, अडागमः [भ.भा.] |
| २७ | आ.५-७-२० पूर्वाभ्यां वषड्क्रियाता इति – वषट्कारेण हविः प्रदातव्यमिति |
| २८ | आ. ६-१-१९ पर्यङ्ख्यातै– परितो नैव चालयतु |
| २९ | मं.प्र. १-११-६ उशती विस्रयातै – उशती कामयमाना विश्रयेत |

| | |
|---|---|
| ३० | ब्रा.३-१०-९-६ प्राणमत्यप्रक्ष्यः, मूर्धा ते व्यपतिष्यत् - यदि त्वं ...अन्यां देवतां पृच्छेत् तव मूर्धा विपतेत् (लृङ् - रूपम्) |
| ३१ | ब्रा.३-११-८-४ गन्तासीति होवाच – गन्तासि गमिष्यसि गच्छेत्यर्थः (लुट् - रूपम्) |

*****

# तारतम्यम् (तर-तमभावः)– विशेषशब्द प्रयोगाः (उदाहरणानि)

## [Words in Comparative & Superlative degree]

| | |
|---|---|
| १ | सं.१-१-१-४ (ब्रा.३-२-१) श्रेष्ठतमाय कर्मणे ।<br>सं.१-५-१०-५ अयमग्निः श्रेष्ठतमोऽयं भगवत्तमोऽयꣳ सहस्रसातमः – प्रशस्यानां मध्ये अतिशयेन श्रेष्ठः, पुनरपि तादृशानां मध्ये अतिशयेन श्रेष्ठः श्रेष्ठतमः ।..अतिशयेन भगवान् भगवत्तमः, सहस्रसङ्ख्याकस्य धनस्य सनितारः दातारः, तेषु अतिशयेन दाता सहस्रसातमः ।<br>[श्रेष्ठतमः अतिशयेन प्रशस्यतमः, प्रशस्तानामपि प्रशस्ततमः । प्रकर्षवतामपि अतिशयविवक्षया द्वितीय आतिशायनिको भवत्येव, यथा श्रेष्ठतमाय कर्मणे - भ.भा.] (double superlative) |
| २ | सं.१-१-४-५ त्वं देवानामसि सस्नितमं पप्रितमं जुष्टतमं वह्नितमं देवहूतमम् – हे शकट, त्वं देवानां संबन्धि भवसि । शुद्धतमं, व्रीहिभिः पूर्णतमं, प्रियतमं, हविषो वाहकतमं, देवानां आह्वातृतमम् चासि । (देवान् आह्वयतीति देवहूः – व्याकरणभागे) |
| ३ | सं.१-१-१४-२ भूरिदावत्तरा - अतिशयेन बहुप्रजाप्रदौ |
| ४ | सं.१-३-१४-३ यजीयान् - अतिशयेन यष्टा<br>सं.१-५-५-४ यजिष्ठः– मनुष्येभ्योऽतिशयेन यष्टा |
| ५ | सं.१-३-१४-१८ अग्ने रायो नृतमस्य प्रभूतौ – नृतमस्य मनुष्यतमस्य मनुष्येषु श्रेष्ठस्य यजमानस्य , वसवः वसुमत्तमः<br>ब्रा.२-८-१-८ नृतमं वाजसातौ– अतिशयेन पुरुषं, पुरुषेषूत्तममित्यर्थः |
| ६ | सं.१-३-१४-२७ अग्निः शुचिव्रततमः – स्वत एव शुचिव्रततमः अतिशयेनशुद्धव्रतमाचरणं दाहपाकप्रकाशरूपम् यस्य सः। |
| ७ | सं.१-४-१३ ध्रुवाणां ध्रुवतमोच्युतानामच्युतक्षित्तमः –<br>ध्रुवाणां आदित्यस्थाल्यादीनां मध्येऽतिशयेन ध्रुवः, तस्यैव व्याख्यान-मच्युतानामच्युतक्षित्तम इति । |
| ८ | सं.१-४-४६-९ त्वामग्ने वाजसातमं – वाजसातमं अतिशयेनान्नप्रदम् । |
| ९ | सं.१-६-६-८ वसुमान् यज्ञो वसीयान्भूयासं - वसुमान् धनवान् , वसीयान् वसुमत्तरः । |

| | |
|---|---|
| | सं.२-१-११-९ (सं.२-२-११-६) वसिष्ठः समानानां भवति - समानानां वसिष्ठः वासयितृतमःपालको भवति [समानानां वसिष्ठः वसुमत्तमो भवति भ.भा.]<br>सं.३-५-११-१६ वसुवित्तमं - अतिशयेन हविर्लक्षण धनाभिज्ञं [धनानां लब्धृतमं भ.भा.] |
| १० | सं.२-४-२-१ योनौ वीर्यावत्तमः<br>ब्रा.२-७-३-५ अथ वीर्यावत्तरो भवति<br>ब्रा.३-८-७-१ वीर्यावान् - वीर्योपेतः<br>सं.५-२-१-३ वीर्यावत्तरः<br>ब्रा.३-८-७-१ वीर्यावत्तमः - अतिशयेन वीर्यवान् |
| ११ | सं.२-५-८-५ ब्रह्मीयान् - ब्रह्मणि सामिधेनीमन्त्रे अत्यन्तं कुशलः<br>सं.२-६-८-१४ ब्रह्मिष्ठः– मन्त्रवित्तमः |
| १२ | सं.२-५-११-३ तिष्ठन्नन्वाह तिष्ठन् ह्याश्रुततरं वदति - तिष्ठन् मनुष्य आ समन्तादतिशयेन श्रुतं यथा भवति तथा वदितुं प्रभवति । |
| १३ | सं.३ ३-१-१ अग्ने तेजस्विन् तेजस्वी–अतिशयेन दीप्तिमान् (भ.भा)<br>सं.१-३-१४-१८ तेजीयसा – अत्यन्ततेजोयुक्तेनमनसा<br>ब्रा.३-९-५-३ तेजस्वितरः – शक्तिमत्तरः<br>सं.६-१-६-८ तेजस्विनीतमा – अतिशयेन तेजस्विनी (भ.भा)<br>सं.१-१-१०-२ तेजिष्ठेन– अतितीक्ष्णेन अग्नेस्तेजसा |
| १४ | सं.३ ३-१-३ इन्द्रौजस्विन्नोजस्वी – बलहेतुरष्टमो धातुरोजः<br>ब्रा.३-८-७-२ ओजिष्ठौ बलिष्ठौ - अतिशयेन ओजसा बलहेतुना युक्तौ, बलाधिक्ययुक्तौ च<br>ब्रा.१-५-९-१ बलीयाꣳसः |
| १५ | सं.३-५-१० स्वादोः स्वादीयः – स्वादोरपि रसातिशयेन स्वादु । स्वादुतरं(भ.भा)<br>ब्रा.३-७-११-४ स्वादिष्ठा धीतिः – स्वादुतमा धीतिःसाधनहेतुः आज्याहुतिः |
| १६ | सं.४-२-९-९ मधुमान् – माधुर्यरसोपेतः<br>सं. १-१-३-८ ऊर्मिणीर्मधुमत्तमा – ऊर्मिमत्वेन अत्यन्तमाधुर्येण |

| | |
|---|---|
| १७ | सं.४-५-१०-१० मीढुष्टम शिवतम – हेमीढुष्टम अतिशयेन सेचक कामानामभिवर्षक, हेशिवतम, अतिशयेन शान्तस्वरूप<br>आ.१०-२५ मीढुष्टमाय तव्यसे |
| १८ | सं.५-१-५-१४ भारभारितमः –वोढव्यो द्रव्यविशेषो भारः तं भरति धारयतीति भारभरी, अतिशयेन भारभारी भारभारितमः ।<br>ब्रा.३-८-७-३ सारसारितमः- अतिशयेनसारसार्युत्कर्षगामी। |
| १९ | सं.५-४-८-९ भूयिष्ठभाक्तमः – अयमिन्द्रः भूयिष्ठभाक्तमः भूयिष्ठं प्रभूतं हविर्भवतीति भूयिष्ठभाक् अतिशयेन तादृशः ।(double superlative) |
| २० | सं.६-१-६-८ गायत्री कनिष्ठा छन्दसां<br>आ.५-२-२७ आरण्याः पशवः कनीयाꣳसः – द्विविधानां पशूनां मध्ये आरण्या एव पशवः कनिष्ठाः । न हि जना गवाश्वादिषु यावन्तमादरं तावन्तं कृष्णाजिनमृगेषु कुर्वन्ति । |
| २१ | ब्रा.२-२-३-१ पूर्वपक्षं देवा अन्वसृज्यन्त ... तस्मात्पूर्वपक्षोऽपर-पक्षात्करुण्यतरः – शुक्लपक्षमनु देवानां सृष्टत्वात् तेषां चैश्वर्ययुक्तत्वात् पूर्वपक्षे यागं कुर्वाणो धनिको भवति । अपरपक्षे तु विपरीतः । तस्मात् अनुक्तकालविशेषेषु पूर्वपक्षःकरुण्यतरः अतिशयेन प्रशस्तः ।<br>आ.५-२-२० मृत्खनः करुण्यतमः – यस्मादयं मृत्खनः स्वकीयां वेदनां अगणयित्वा यजमानोपकारार्थं मृदं प्रयच्छति, तस्मादयं अतिशयेन करुण्यः कृपालुः । |
| २२ | ब्रा.२-२-९-१४ व्युच्छन्ती व्युच्छन्त्यस्मै वस्यसी वस्यसी व्युच्छति – यथोक्तं ब्रह्मसृष्टिप्रकारं विदित्वोपास्ते, अस्मै वेदित्रे प्रतिदिनं प्रभातं कुर्वती देवता पुनरधिकश्रेयस्करा सती प्रभातं करोति । दिने दिने श्रेयो वर्धत इत्यर्थः । |
| २३ | ब्रा.२-४-३-२७ सदसो वरीयान् - सभा-गताद्देवसमूहात् अतिशयेन श्रेष्ठः<br>ब्रा.२-४-३-३१ या ते काकुत्सुकृता या वरिष्ठा – हे इन्द्र, या ते काकुत् जिह्वा सुकृता प्रजापतिना सुष्ठु निर्मिता, अत एव सा जिह्वा वरिष्ठा अतिशयेन श्रेष्ठा |
| २४ | ब्रा.३-८-७-५ देवानामपचिततमाः – अतिशयेन पूजिताः |
| २५ | ब्रा.३-११-९- यशस्वी<br>ब्रा.३-८-७ यशस्वितमाः |

| | |
|---|---|
| २६ | आ.२-१३-१ तेक्ष्णिष्ठं तपति – अतिशयेन तीक्ष्णं यथा भवति तथा तपति |
| २७ | आ. ३-११-९-८ ब्रह्मवर्चसी<br>ब्रा.३-९-५-२ ब्रह्मवर्चसितरः |
| २८ | आ.८-८-३ आशिष्ठो दृढिष्ठो बलिष्ठः – आशिष्ठः आशुतमः सर्वकार्येषु शीघ्रं प्रवर्तते । यद्वा सर्वेषु भोज्यद्रव्येषु रुचिबाहुल्यादाऽऽशितृतमः । दृढिष्ठः मनोदार्ढ्ययुक्तः । बलिष्ठः [अतिशयेन शारीरबलयुक्तः] |
| २९ | आ.१०-१२-१ अणोरणीयान्महतो महीयान् -<br>मायाकार्यभूते लौकिकव्यवहारे सूक्ष्मत्वेन प्रसिद्धः परमाणुः द्व्यणुकादिः अणुशब्दवाच्यःतस्मादप्ययमात्मा अतिशयेन सूक्ष्मत्वात् अणीयान्, आकाश-दिगादयःपरिमाणाधिक्यत्वाल्लोके महच्छब्दवाच्यः ततोऽप्ययमात्मा अतिशयेन अधिकत्वात् महीयान् ।<br>सं. २-५-५-२ स्थविष्ठाः, अणिष्ठाः– स्थूलराशिगताः, अणुराशिगताः। |

*****

# ऋषीणां, इतरव्यक्तीनां च नामानि (Proper Nouns)

| | |
|---|---|
| १ | सं.१-१-७-११ भृगू॒णाम॑ङ्गि॒रसां<br>ब्रा.१-१-४-१० भृगू॒णान्त्वाङ्गि॒रसां व्रतपते |
| २ | सं.१-२-२-९ ऊर्ग॒स्याङ्गि॒रसि – हे मेखले, त्वं, अङ्गिरसां संबन्धिनी, अन्नरसरूपा, कंबलवन्मृदुरसि ।<br>सं.२-३-१४-२१ बु॒ध्नादग्र॒मङ्गि॒रोभिः – अङ्गिरो नाम्ना मुनिना सदृशैर्ऋत्विग्भिः<br>सं.२-६-३-४ अङ्गि॒रसो॒ वा इ॒त उ॒त्त॒माः<br>सं.३-१-९-८ अङ्गि॒रस इ॒मे स॒त्रमा॑सते<br>सं.३-५-१-५, ब्रा.३-९-२१-१, ब्रा.३-१०-३-१ आ॒दि॒त्याश्चाङ्गि॒रसश्च - आदित्या देवाः, अङ्गिरसः ऋषयः<br>सं. ५-२-८-१२, ५-४-२-९, ५-४-३-४, ६-१-१-५, ६-१-३-८,<br>ब्रा.१-८-२-१, ब्रा.६-१-३-८ - अङ्गि॒रसः सु॒व॒र्गं लो॒कं यन्तः - अङ्गिरसो महर्षयः कर्मानुष्ठायिनः ... ।<br>सं.५-७-१७-१७ अङ्गि॒रसां चतु॒र्थी<br>सं.७-१-४-१ अङ्गि॒रसो॒ वै स॒त्रमा॑सत – अङ्गिरसो महर्षयः<br>सं.७-१-१८-५ अङ्गि॒रोभि॒र्दे॒वेभि॒र्दे॒वत॑या<br>सं.७-५-११-४५ अङ्गि॒रोभ्यः॒ स्वाहा॒ – अङ्गिरोभिर्मुनिभिर्दृष्टाः चतुर्थवेदोत्पन्ना अङ्गिरसः<br>ब्रा.२-१-१-१ अङ्गि॒रसो॒ वै स॒त्रमा॑सत – अङ्गिराश्चतुर्थवेद- प्रवर्तकाचार्यः तस्य कुले समुत्पन्नाःसर्वेऽप्यङ्गिरसः<br>ब्रा.२-२-३-५,६ आ॒दि॒त्याश्चाङ्गि॒रसश्च... आ॒ङ्गी॒रसीः प्र॒जा ह॒व्यं व॑हन्ति - अङ्गिरोगोत्रे समुत्पन्नाःप्रजा गायत्र्यादिछन्दांस्युच्चार्य तेष्वादित्यान् भावयन्तः तेभ्यो हव्यं प्रयच्छन्ति<br>ब्रा.२-२-५-२, २-३-२-६,२-३-४-७,८, आ.३-१०-१ – उ॒त्ता॒नस्त्वाङ्गी॒र॒सः प्रति॑गृह्णातु - अङ्गिरोगोत्रे समुत्पन्नः उत्तानाख्यो महर्षिः त्वां प्रतिगृह्णातु (अङ्गिरसः पुत्रः उत्तानाख्यः)<br>ब्रा.२-२-७-४ ते स॒प्तहो॑तारं य॒ज्ञं वि॒धा॒या॒यास्य॒म् । आ॒ङ्गी॒र॒सं प्राहि॑ण्वन् । - सप्तहोतृमन्त्रसाध्यं कञ्चिद्यागं निर्माय, अङ्गिरो-गोत्रोत्पन्नं अयास्य-नामकमृषिं मनुष्यलोके प्रेषितवन्तः ।<br>ब्रा.२-२-१०-७ अङ्गि॒रसः प्र॒त्यञ्चम्॒ । अङ्गिरःप्रभृतयो महर्षयः । |

| | |
|---|---|
| | ब्रा.३-९-२०-१ आदित्याश्चाङ्गिरसश्च सुवर्गे लोकेऽस्पर्धन्त –आदित्या गणदेवता अङ्गिरसो महर्षयश्च स्वर्गलोकं निमित्तीकृत्य स्पर्धां कृतवन्तः ।<br>आ.४-९-१ यमाय त्वाङ्गिरस्वते पितृमते स्वाहा– अङ्गिरोभिः पितृभिश्च युक्ताय यमनामकाय वाताय |
| ३ | सं.१-२-७-९ स्वान भ्राजाङ्घारिबम्भारि हस्तसुहस्तकृशानवेते वः – स्वानादयः सोमरक्षकाः।<br>आ.१-९-९ स्वान भ्राट्।अङ्घारिर्बम्भारिः । हस्तः सुहस्तः । कृशानुर्विश्वावसुः । मूर्धन्वान्थ्सूर्यवर्चाः । कृतिरित्येकादश गन्धर्वगणाः । -गन्धर्वाणां नाममन्त्राः<br>सं.६-१-६-११ गन्धर्वो विश्वावसुः<br>आ.४-११-१९ विश्वावसुꣳ सोमगन्धर्वम् – सोमस्य परिमोषको गन्धर्वः सोमगन्धर्वः स च विश्वावसुनामकः ।<br>मं.प्र.१-१०-१,२ उदीर्ष्वातो विश्वावसो, विश्वावसुं नमसा - विश्वावसुनाम गन्धर्वः । |
| ४ | स. १-४-४-१ मधुश्चमाधवश्च – अत्र मध्वादिशब्दाः क्रमेण चैत्रादिमासानां वाचकाः । संसर्पोंहस्पतिशब्दयोरर्थोऽन्यत्र दर्शितः –<br>असङ्क्रान्तावेकवर्षे द्वौ चेत्संसर्प आदिमः।<br>क्षयमासो द्विसङ्क्रान्तः स चांहस्पतिसंज्ञकः ॥<br>सं.४-४-११-१ मधुश्च माधवश्च - [चैत्रवैशाखादिमासाः] |
| ५ | सं.१-४-१८-१ इन्द्र मरुत्वइह पाहि सोमं यथा शार्याते अपिबः सुतस्य - हे मरुद्गणयुक्तेन्द्र, त्वमिहास्मिन्कर्मणि सोमं पाहि पिब । यथा शार्यातिनामकस्य यजमानस्यसंबन्धिनि कर्मणि, अभिषुतस्य सोमस्यांशमपिबस्तद्वत्। |
| ६ | सं.१-५-४-२ कसर्णीरः काद्रवेयो मन्त्रमपश्यत् –<br>कसर्णीरनामकः कद्रूपुत्रः। |
| ७ | सं.१-५-५-४ यमप्नवानो भृगवो विरुरुचुः -<br>अप्नवान संज्ञकाः भृगु - संज्ञकाश्च मुनयः । |
| ८ | सं १-७-२-१ सꣳश्रवा ह सौवर्चनसस्तुमिञ्जमौपोदितिमुवाच- संश्रवा इत्यृषेर्नामधेयम् ।स च सुवर्चनसः पुत्रः । तुमिञ्ज इत्यृष्यन्तरस्य नामधेयम् । स चोपोदितस्य पुत्रः । |
| ९ | सं.१-८-१४-५ निरस्तं नमुचेः शिरः– न मुञ्चत्यधर्ममिति नमुचिरसुरः बाधकः(भ.भा.) |

| | |
|---|---|
| १० | सं.२-३-८-१ रजनो वै कौणेयः क्रतुजितं जानकिंचक्षुर्वन्यमयात्<br>रजननामकः कश्चित् पुरुषः क्रतुजिन्नामकं पुरुषमयात् प्राप्नोत् । रजनः कुणेरपत्यं, क्रतुजिज्जनकस्यापत्यम्, स तु चक्षुर्वन्यः चक्षुषोर्दृष्टेर्वननं समजनं तदर्हतीतिचक्षुर्वन्यः। रोगोपहृतां दृष्टिं समाधातुं शक्त इत्यर्थः । |
| ११ | सं.२-४-७-३ पुरोवातो वर्षन्जिन्वरावृत्स्वाहा" – कल्पः"पुरो वातो वर्षन्नित्यष्टौ वातनामानि हुत्वा " इति ।<br>सं.२-४-९-३ वातनामानि जुहोति । |
| १२ | सं.२-४-७-११ मान्दा वाशाः शुन्ध्यूरजिराः – मान्दादीनि एकादश अपां नामानि संबुद्ध्यन्तानि । |
| १३ | सं.२-५-१-१ विश्वरूपो वै त्वाष्ट्रः – विश्वरूपनामकः त्वष्टुःपुत्रः । |
| १४ | सं.२-६-२-८ केशिनꣳह दार्भ्यं केशी सात्यकामिरुवाच –<br>दर्भनाम्नः पुत्रः कश्चित् केशी, सत्यकामपुत्रोऽपरः केशी, तयोर्दार्भ्यं प्रति सात्यकामिरुवाच। |
| १५ | सं.२-६-९-१२ एतदुर्वैनामासुर आसीत् –<br>एतदुर्नामा कश्चिदसुर आसीत्। स कस्यचिद्यज्ञ एतस्मिन्सूक्तवाक-काले समागत्याऽऽयुराशास्ते सुप्रजास्त्वमाशास्त इत्यादिकामाशिषं यजमानसंबन्धिनीं विनाश्य स्वसंबन्धिनीमकरोत् । तस्मात् एतदु द्यावापृथिवी इति यदि होता पठेत् तदाऽऽसुरस्यैवाऽऽशीः प्राप्तिः स्यात् । ततः शाखान्तरपाठं परित्यज्येदं द्यावापृथिवी भद्रमित्येव पठेत् । तथा सति यजमानस्यैवाऽऽशीः प्राप्तिर्भवति । |
| १६ | सं.२-६-१२-१४, १५, १६ - मातली कव्यैर्यमो अङ्गिरोभिः, इमं यम प्रस्तरमाहि सीदाङ्गिरोभिः, अङ्गिरोभिरागहि - अङ्गिरोभिः एतन्नामभिः पितृभिः<br>सं.२-६-१२- १७ अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः –<br>अङ्गिरो नामका अथर्वनामका भृगुनामकाश्च नोऽस्माकं पितरो नवग्वा अभिनवागमनयुक्ताः तदा तदा नूतनवत्प्रीतिजनकाः। |
| १७ | सं.३-१-७-१०,५-४-११-१० विश्वामित्र जमदग्नी वसिष्ठेनास्पर्धेतां |
| १८ | सं.३-१-९-७ मनुः पुत्रेभ्यो दायं व्यभजत्स नाभानेदिष्ठं – मनोः बहवः पुत्राः तेषु कनिष्ठो नाभानेदिष्ठनामकः |
| १९ | सं.३-१-११-३३और्वभृगुवच्छुचिमप्नवानवदाहुवे - और्वादयः ऋषयः ।<br>[और्वाप्नवानौ भार्गवावृषी । और्वश्चासौभृगुश्च और्वभृगुः – भ.भा.] |

| | |
|---|---|
| २० | सं.३-३-५-११ जमदग्निस्तपसाऽपश्यत् |
| २१ | सं.३-५-२-१ तं वसिष्ठः प्रत्यक्षमपश्यत्, वासिष्ठो ब्रह्मा कार्यः योगसामर्थ्ययुक्तो वसिष्ठः, वसिष्ठगोत्रोत्पन्न एव ब्रह्माकार्यः । |
| २२ | सं. ३-५-११-११, ४-१-३-७ त्वामग्ने पुष्करादध्यथर्वा निरमन्थत- हे अग्ने, अथर्वाख्यऋषिः पुष्करादधि पद्मपत्रस्योपरि त्वां निरमन्थत निःशेषेण मथितवान्। |
| २३ | सं. ३-५-११-११ , ४-१-३-८ तमु त्वा दध्यङ्ङृषिः पुत्र ईधे अथर्वणः– अथर्वणः पुत्रो दध्यङ् नामक ऋषिः तमुत्वेधे तमुत्वा प्रज्वालितवान् । |
| २४ | सं. ३-५-११-१३ , ४-१-३-९ तमु त्वा पाथ्यो वृषा समीधे – पाथ्यनामक कश्चिदृषिः तमु त्वा समीधे सम्यक् प्रज्वालितवान्। |
| २५ | सं.४-१-३-६ अथर्वा त्वा प्रथमो निरमन्थदग्ने– हे अग्ने, अथर्वाख्यऋषिःप्रथम इतरेभ्यःपूर्वभावीसंस्त्वां निरमन्थत् निःशेषेण मथितवान् । |
| २६ | सं.४-३-२-(१-५) वसिष्ठ ऋषिः, भरद्वाज ऋषिः, विश्वामित्र ऋषिः, जमदग्निर् ऋषिः, विश्वकर्मर् षिः। |
| २७ | सं.४-३-३(१-५) सानग ऋषिः, सनातन ऋषिः, अहभून ऋषिः, प्रत्न ऋषिः, सुपर्ण ऋषिः। |
| २८ | सं.५-२-१-४ शुनश्शेपमाजीगर्तिं – शुनश्शेपो नाम ऋषिः स चाजीगर्तस्य पुत्रः ... । |
| २९ | सं.५-२-१-१३ वात्सप्रेणोपतिष्ठत एतेन वै वत्सप्रीर्भालन्दनोऽग्नेः - भालन्दनस्य पुत्रो वत्सप्रीनामको महर्षिरेतेन सूक्तेनाग्नेः प्रियं धाम स्थानं प्राप्तवान् । |
| ३० | सं.५-२-३-८ विश्वामित्रस्य सूक्तं भवति |
| ३१ | सं.५-२-१०-१३ वसिष्ठ आर्ध्नोत्, भरद्वाजः, विश्वामित्रः, जमदग्निः, विश्वकर्मा |
| ३२ | सं.५-३-८-१ यज्ञसेनश्चैत्रियायणश्चितिं विदाञ्चकार – चित्रनामकस्य कस्यचित्पुरुषस्य वंशे समुत्पन्नो यज्ञसेननामकः । |
| ३३ | सं.५-४-२-५ उवाच ह विश्वामित्रः |
| ३४ | सं.५-४-७-१६ तमस्य कण्व एव श्रायसोऽवेत् कण्वाख्य एको महर्षिः .. स च कण्वः श्रयसोऽपत्यं श्रायसः । |

| | |
|---|---|
| ३५ | सं.५-६-५-६ एतं वै परं आह्णारः कक्षीवाँ औशिजो वीतहव्यः श्रायसस्त्रसदस्युः पौरुकुत्स्यः प्रजाकामा अचिन्वत – परशब्दाभिधेयः कश्चिदृषिः सोऽयं अह्णारस्य पुत्रः, कक्षीवानन्य ऋषिः स चोशिजः पुत्रः,वीतहव्योऽन्य ऋषिः स च श्रयसः पुत्रः, त्रसदस्युरन्यः स च पुरुकुत्सस्य पुत्रः, त एते प्रजाकामाः सन्तः -। |
| ३६ | (सं.१-२-४)सं.६-१-६-१ कद्रूश्च वै सुपर्णी च – कद्रूः सुपर्णी चोभे सपत्न्यौ । |
| ३७ | (सं.१-२-५, १-४-२) सं.६-१-९-२, ६-४-५-२, ब्रा.२-१-५-११,ब्रा.३-१२-५-५ अरुणो ह स्माऽऽहौपवेशिः– उपवेशस्य पुत्रः अरुण नामा । |
| ३८ | (सं.१-२-१३)सं.६-२-९-१० दण्डो वा औपरः (दण्डो नाम कश्चिदसुरः उपरनामकस्य असुरस्य पुत्रः ) । |
| ३९ | सं.६-६-२-६ वासिष्ठो ह सात्यहव्यो देवभागं – वसिष्ठगोत्रोत्पन्नः सत्यहवस्य पुत्रः सात्यहव्यः देवभाग नामानं मुनिं पप्रच्छ । ब्रा.३-१० -९-१९ देवभागो हश्रौतर्षः देवान्भजतीति देवभाग एतन्नामकः कश्चिन्मुनिः श्रौतर्षःश्रौतानुष्ठानाभिज्ञः। |
| ४० | सं.७-१-६-१८ इडे रन्तेऽदिते सरस्वति प्रिये प्रेयसि महि विश्रुत्युत्येतानि ते अघ्निये नामानि – केनाऽपिन हन्यते इत्यघ्निया गौः । हे अघ्निये इडादीनि तव नामानि । अतस्तैर्नामभिरिह संबोध्यते। एतादृशी त्वं देवेषु मध्ये मां यजमानं सुकृतं पुण्यकृतं ब्रूहि । ...एतन्मन्त्रपाठेन इयं गौः देवेभ्य एवैनं यजमानमावेदयति। ते च देवा एनं पुण्यकारिणं जानन्ति । |
| ४१ | सं.७-१-८-१ अत्रिरदादौर्वाय – उर्वस्य पुत्रः और्वः |
| ४२ | सं.७-१-९-१ जमदग्निः पुष्टिकामः, जामदग्नियौ- तद्वम्शोत्पन्नौपितृपुत्रौ । |
| ४३ | सं.७-१-१०-३ सार्वसेनिः शौचेयोऽकामयत – सर्वसेनाख्यस्य पुरुषस्यापत्यं, शुच्याख्यायाः स्त्रिया अपत्यम् । |
| ४४ | सं.७-१-१०-४ बबरः प्रावाहणिरकामयत - बबरो नामतः, प्रवाहणस्यापत्यं प्रावाहणिः । |
| ४५ | सं.७-१-१२-१ ययुर्नामासि – स्वर्गप्रापक इत्येतदेव तव प्रियं नाम । ब्रा.३-८-९-६ ययुर्नामासीत्याह । एतद्वा अश्वस्य प्रियं नामधेयम्। (मं.प्र.२-२१-२० अपि पश्यत) |
| ४६ | सं.७-२-२-१ कुसुरुबिन्दु औद्दालकिरकामयत – कुसुरुबिन्दो नामतः, उद्दालकस्य पुत्रः। |

| | |
|---|---|
| ४७ | सं.७-४-५-९,७-५-४-७ एता ॑ ह वा उदङ्कः शौल्बायनः – उदङ्को नामतः, स च शुल्बस्य अपत्यभूतः । |
| ४८ | सं.७-४-७-१ वसिष्ठो हतपुत्रः – विश्वामित्रशापेन हतेषु पुत्रेषु प्रजां शत्रुक्षयं च कामयमानो वसिष्ठः । |
| ४९ | ब्रा.१-१-२-८ कालकञ्जा वै नामासुरा आसन् – कालकञ्जशब्दोऽसुरविशेष नामधेयम् । |
| ५० | ब्रा.१-५-२-१ यज्ञेषुं च शतद्युम्नं च मात्स्यो निरवसाययाञ्चकार– मात्स्यो नाम कश्चिदृषिः यज्ञेषुनामकं शतद्युम्नं च पुरुषमीदृशे मुहूर्ते कारयित्वा निश्शेषेण श्रैष्ठ्यं प्रापयामास। |
| ५१ | ब्रा.१-५-९-१ प्रह्लादो ह वै कायाधवः। विरोचनङ्ं स्वं पुत्रं – कयाधुसंज्ञितायाः हिरण्यकशिपुभार्यायाः पुत्रः प्रह्लादः स्वकीयं पुत्रं विरोचनं .... । |
| ५२ | ब्रा.१-७-७-९ पृथिर्वैन्यः – वेनस्य पुत्रः पृथिनाम कश्चिद्राजा<br>ब्रा.२-७-५-१ एतं वै पृथये देवाः प्रायच्छन् – पृथिः आरण्यानामपि पशूनामसूयत अधिपतिरासीत् किमुत ग्राम्याणाम्। पृथिना अनुष्ठितत्वात् अयं पृथिसवः । |
| ५३ | ब्रा.१-८-४-१ कुरुपञ्चालाः प्राञ्चो यान्ति – कुरुपञ्चालदेशिनो राजानः |
| ५४ | ब्रा.२-१-९-१ त्रयो वै प्रैयमेधा आसन् – मेधा श्रुतग्रन्थ-तदर्थयोः धारणाशक्तिः, प्रिया मेधा यस्यासौ प्रियमेधः कश्चिदृषिः, तस्य पुत्राः प्रैयमेधाः ।<br>ब्रा.२-५-८-७, आ.४-४२-१८ वयः सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयः – वयः पक्षिमूर्तिधारिणः, सुपर्णाः शोभनपक्षोपेताः, प्रियमेधाः अधीतस्य श्रुतस्य धारणाशक्तिर्मेधा, तस्यां प्रीतियुक्ताः केचिदृषयः इन्द्रमुपसेदुः |
| ५५ | ब्रा.२-४-१-१२ अग्ने अत्रिवन्मनसा गृणानः – हे अग्ने, अत्रिवत् अत्रिणा महर्षिणा चतूरात्रे कर्मणि यथा स्तूयसे, तथा अस्माभिः मनसा गृणानः स्तूयमानः |
| ५६ | ब्रा.२ -४-७-१५ अयं कृत्नुरगृभीतः – कृत्नुर्नाम कश्चिदृषिः |
| ५७ | ब्रा.२-७-११-१ अगस्त्यो मरुद्भ्यः - |
| ५८ | ब्रा.२-७-११-४ एकयावा कान्दमः –<br>कान्दमो नाम कश्चिदृषिः .. एकयावा एकेन वाहनेन यातीत्येकयावा रथेनैव गच्छति न तु वाहनान्तरेणेत्यर्थः । |

| | |
|---|---|
| ५९ | ब्रा.२-८-७-२६ युवं भुज्युमवविद्धꣳ समुद्रे – हे अश्विनौ, युवामुभौ समुद्रे, अवविद्धं निमग्नं भुज्युं कश्चिद्राजानं भुज्युनामकं, अर्णस उदगादुदूहथुः ऊर्ध्वमानीतवन्तौ । |
| ६० | ब्रा.३-२-९-५ विषाद्वै नामासुर आसीत् – विषमत्तीति विषात् |
| ६१ | ब्रा.३-२-९-१० अररुर्वै नामासुर आसीत्– अररुर्नामकोऽसुरः |
| ६२ | ब्रा.३-२-९-३६ उवाच हासितो दैवलः – देवलेनोक्तत्वात् ... |
| ६३ | ब्रा.३-३-८-१ धिष्णिया वा एते न्युप्यन्ते –<br>धिष्णियनामकाः केचन देवाः सोमरक्षकाः । |
| ६४ | ब्रा.३-३-८-२६ शंयुमेव बार्हस्पत्यं – शंयुर्बृहस्पतेः पुत्रः<br>आ.१-५-४ एतदेव शंय्योर्बार्हस्पत्यस्य– बृहस्पतिपुत्रः शंय्युः |
| ६५ | ब्रा.३-५-३-१ असावसौ - यथाप्रवरंमन्त्रविशेषा निर्देष्टव्याः–यथा–भार्गव च्यावनाप्नवानौर्व जामदग्न्य इति (भ.भा) । |
| ६६ | ब्रा.३-६-६- २ अध्रिगुश्चापापश्च– अध्रिगुनामको देवः, अपापनामको देवः |
| ६७ | ब्रा.३-९-११-७ आयास्यो वै प्रजाः – अयास्यनामकमहर्षिणा सृष्टत्वात् प्रजा आयास्यः । |
| ६८ | ब्रा.३-९-१५-६ एताꣳ ह वै मुण्डिभ औदन्यवः – उदकमात्मन इच्छतीत्युदन्यः जलमात्राहारः कश्चित् तपस्वी मुनिः , तस्य पुत्रः औदन्यवः, तस्य च मुण्डिभ इति नामधेयम् । |
| ६९ | ब्रा.३-९-२१-१ तस्मादश्वꣳ सवर्येत्याह्वयन्ति – वर्यैः श्रेष्ठैः गुणैः सहितः सवर्यः (अश्वनाम ) । |
| ७० | ब्रा.३-९-२१-२ तस्मादश्वो नाम – अश्नुते व्याप्नोतीत्युत्पत्या अश्वनाम संपन्नम् । |
| ७१ | ब्रा.३-९-२१-३ तस्मादर्वा नाम – प्रजापतेरक्षि केनापि रोगेण श्वयत् उच्छूनं यदा भूत्, तदानीं अरुः व्यथाहेतुरासीत् । यस्मादरुः तस्मादर्वा नाम । |
| ७२ | ब्रा.३-९-२१-४ तस्माद्वाजी नाम - सद्यः जातमात्र एव वाजान् अन्नानि वेगाद्गत्वा सम्यग् जितवान् तस्माद्वाजिनाम संपन्नम् । |
| ७३ | ब्रा.३-९-२१-५ तस्मादादित्यो नाम – युद्धे जयं प्राप्य असुराणां संबन्धिनो लोकान् निवासस्थानानि आदत्त । तस्मादादानात् आदित्यनाम संपन्नम् । |
| ७४ | ब्रा.३-१०-१-१ संज्ञानं विज्ञानं– शुक्लपक्ष प्रतिपदादि पौर्णमास्यन्त दिनेषु अह्नां नामधेयानि (ब्रा.३-१०-१०-३) । |

| | |
|---|---|
| ७५ | ब्रा.३-१०-१-२ चित्रःकेतुः – शुक्लपक्षे एकैकस्मिन्नहनि उदय, अस्तमय, मध्यवर्तिनां मुहूर्तानां नामधेयानि (ब्रा.३-१०-१०-४) । |
| ७६ | ब्रा.३-१०-१-३ दर्शा दृष्टा - शुक्लपक्षस्य पञ्चदशरात्रीणां नामधेयानि (ब्रा.३-१०-१०-३) । |
| ७७ | ब्रा.३-१०-१-४ दाता प्रदाता – शुक्लपक्षस्य एकैकरात्रिगतानां मुहूर्तानां नामधेयानि (ब्रा.३-१०-१०-४) । |
| ७८ | ब्रा.३-१०-१-५ प्रस्तुतं विष्टुतं - कृष्णपक्ष प्रतिपदादि अमावास्यान्तेषु दिनेषु अह्नां नामधेयानि (ब्रा.३-१०-१०-३) । |
| ७९ | ब्रा.३-१०-१-६ सविता प्रसविता – कृष्णपक्षस्य एकैकस्मिन्नहनि मुहूर्तानां नामधेयानि (ब्रा.३-१०-१०-४) । |
| ८० | ब्रा.३-१०-१-७ सुता सुन्वती - कृष्णपक्षस्य पञ्चदशरात्रीणां नामधेयानि (ब्रा.३-१०-१०-३) । |
| ८१ | ब्रा.३-१०-१-८ अभिशास्ताऽनुमन्ता – कृष्णपक्षस्य एकैकरात्रिगतानां मुहूर्तानां नामधेयानि (ब्रा.३-१०-१०-४) । |
| ८२ | ब्रा.३-१०-१-९ पवित्रं पवयिष्यन् - चैत्र-वैशाखादि-मासेषु शुक्लपक्षानाम् नामधेयानि (ब्रा.३-१०-१०-५) । |
| ८३ | ब्रा.३-१०-१-१० सहस्वान्त्सहीयान् – चैत्र-वैशाखादिमासेषु कृष्ण पक्षानाम् नामधेयानि (ब्रा.३-१०-१०-५) । |
| ८४ | ब्रा.३-१०-१-११ अरुणोऽरुणरजाः– चैत्रादिमासानां अधिकमास सहितानां नामधेयानि (ब्रा.३-१०-१०-५) । |
| ८५ | ब्रा.३-१०-१-१२ एजत्का जोवत्काः – सिकताविशेषाणां नामधेयानि। |
| ८६ | ब्रा.३-१०-१-१३ इदानीं तदानीं– पूर्वोक्त एकैक मुहूर्त अवयवभूतानां क्षुद्रमुहूर्तानां नामधेयानि (ब्रा.३-१०-१०-७) । |
| ८७ | ब्रा.३-१०-१-१४ अग्निष्टोम उक्थ्यः– षण्णां क्रतुविशेषाणां नामधेयानि (ब्रा.३-१०-१०-६) । |
| ८८ | ब्रा.३-१०-१-१५ अग्निर् ऋतुः– अग्नि, सूर्य, चन्द्रमःशब्दा ऋतुविशेषाणां नामधेयानि (ब्रा.३-१०-१०-६) । |
| ८९ | ब्रा.३-१०-१-१६ प्रजापतिः – प्रजापत्यादयः चत्वारः शब्दाः संवत्सरनामानि (ब्रा.३-१०-१०-६) |
| ९० | ब्रा.३-१०-८-४ शूषो नामास्यमृतो मर्त्येषु – हे जीव, त्वं शूषो नामासि सर्वव्यापार-समर्थत्वात् प्रबल इत्येतादृश नामधार्यसि । |

| | |
|---|---|
| ९१ | ब्रा.३-१० -९-४ अत्यꣳहो हारुणिः– अंहः पाप्मानमतिक्रम्य वर्तत इत्यत्यंहः, एतन्नामको मुनिः अरुणस्य पुत्रः .. । |
| ९२ | ब्रा.३-१० -९-४ प्लक्षं दैय्याम्पातिं पृच्छ- द्यांपातनामकस्य मुनेः पुत्रं दय्यांपातिं प्लक्षनामकं मुनिं गत्वा प्रश्नं कुरु । |
| ९३ | ब्रा.३-१० -९-१५ जनको ह वैदेहः – विदेहदेशाधिपतिः जनकः । |
| ९४ | ब्रा.३-१०-९-१७ अहीना हाश्वथ्यः – अहीनानामकः कश्चिदृषिः अश्वत्थ-नामकस्य मुनेः पुत्रः । |
| ९५ | ब्रा.३-१० -९-१९ गौतमो वेद –गौतमः गौतमगोत्रोत्पन्नो मुनिः । |
| ९६ | ब्रा.३-१० -९-२६ शूषो ह वै वार्ष्णेयः –<br>वृष्णिनामकस्य मुनेः पुत्रः शूषनामको मुनिः । |
| ९७ | ब्रा.३-१० -११-६ भरद्वाजो ह त्रिभिः - भरद्वाजाख्यो महर्षिः । |
| ९८ | ब्रा.३-११-८-१ उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ । तस्य ह नचिकेता नाम पुत्र आस ।<br>वाजोऽन्नं तद्दाननिमित्तं श्रवः कीर्तिर्यस्यासौ वाजश्रवाः कश्चिन्मुनिर्गौतमगोत्रोत्पन्नस्तस्य पुत्र उद्दालकाख्यो मुनिर्वाजश्रवसः ।... तस्योद्दालकस्य कश्चित् पुत्रो नचिकेता नाम आसीत् ।<br>ब्रा.३-११-८-३ गौतमकुमारमिति – हे गौतमगोत्रोत्पन्न नचिकेतः ।<br>ब्रा.३-११-८-१२ वाजश्रवसागोतमाः – अन्नदाननिमित्तकीर्ति-युक्तः महर्षिःवाजश्रवाः तस्य पुत्राः वाजश्रवसः ते च गौतमाः । |
| ९९ | आ.१-७-१ आरोगो भ्राजः पटरः पतङ्गः – आरोगादीनि विभासान्तानि सप्त पदानि सप्तानां सूर्यविशेषाणां नामधेयानि.. अष्टमः सूर्यः तस्य कश्यप इति नामधेयम् ।<br>आ.१-७-६ पञ्चकर्णो वात्स्यायनः । सप्तकर्णश्च प्लाक्षिः । पञ्चकर्णनामकः कश्चिद्वत्सस्य पुत्रः महर्षिः, सप्तकर्णनामकःकश्चित्प्लक्षस्य पुत्रो महर्षिः ।<br>आ.१-७-७ गार्ग्यः प्राणत्रातः । गर्गस्य पुत्रःप्राणत्रातनामकः कश्चिन्महर्षिः ।<br>आ.१-७-१५ इति वैशंपायनः । वैशंपायन आचार्यः ।<br>आ.१-८-५ इति वत्सस्य वेदना – वत्साख्यस्य महर्षेः वेदना विज्ञानम् ।<br>आ.१-८-२० ऋषिर्ह दीर्घश्रुत्तमः - दीर्घश्रुत्तमनामकः कश्चिदृषिः । |

| | |
|---|---|
| | आ.१-९-४ प्रभ्राजमाना व्यवदाताः – एकादशभिः पुरुष–मूर्त्रिभिः एकादशभिः स्त्रीमूर्त्रिभिश्च युक्तस्य वायोः नामधेयरूपा मन्त्राः ।<br>आ.१-९-६ सहोवाच व्यासः पाराशर्यः । पराशरस्यपुत्रः व्यासाख्यो महर्षिः ।<br>आ.१-९- स्वानभ्राट् ... गन्धर्वाणां नाममन्त्राः।<br>आ.१-९-१८ महर्षिमस्य गोप्तारम्। जमदग्निमकुर्वत । जमदग्न्याख्यं महर्षिम् ।<br>आ.१-११-४ ऋषयः सप्तात्रिश्च यत् । सर्वेऽत्रयो अगस्त्यश्च। सप्त ऋषयः मरीचिवसिष्ठप्रमुखाः ।<br>आ.१-११-५ अथ सवितुः श्यावाश्वस्य– श्यावाश्वनाम्नःकस्यचिन्महर्षेः ।<br>आ.१-१२-९ मेधातिथेः–मेधातिथिर्नामकःकश्चिदृषिःकण्वस्य पुत्रः ।<br>मेषवृषणश्वस्य मेने - वृणश्वो नाम कश्चिन्मुनिस्तस्य संबन्धिनी या मेनाकाख्या दुहिता तां मन्यमाने । अहल्यायै जार - अहल्या गौतमस्य भार्या ।<br>कौशिकब्राह्मण गौतम ब्रुवाण । कौशिकनाम कश्चिदृषिः, गौतमो महर्षिः ।<br>आ.१-१२-१२ वासिष्ठो रौहिणो मीमांसां चक्रे- वसिष्ठगोत्रोत्पन्नः रौहिणः रोहिणस्य मुनेः पुत्रः ।<br>आ.१-२१-८ केतवो अरुणासश्च । ऋषयो वातरशनाः । केतु, अरुण, वातरशनशब्दाः ऋषिसङ्ज्ञानाचक्षते ।<br>आ.१-२२-१५ आहुः शण्डिलाः। शण्डिलो नाम कश्चिदृषिः, तस्य वंशे समुत्पन्नाः सर्वेशण्डिलाः ।<br>आ.१-२३-४ ततोऽरुणाः केतवोवातरशनाऋषय उदतिष्ठन् ।<br>ये नखाः। ते वैखानसाः । ये वालाः । ते वालखिल्याः ।-<br>स प्रजापतिः तपःपर्यालोचनरूपं कृत्वा स्रष्टव्यविशेषं निश्चित्य स्वकीयं शरीरमधूनुत कंपितवान् । तस्य कंपनस्य शरीरस्य यन्मांसमस्ति, तस्मान्मांसात्, अरुणादिनामकास्त्रिविधा ऋषय उदपद्यन्त । प्रजापतेः सत्यसङ्कल्पत्वात् तत्सङ्कल्पानुसारेणतत्तद्वस्तुउत्पद्यते। तस्य शरीरस्य ये नखा आसन् ते वैखानसनामका मुनयोऽभवन् । ये च शरीरे वालाः केशाः ते वालखिल्या नामका मुनयोऽभवन् ।<br>सं.५-३-२ सप्त वालखिल्याः – वालखिल्यनामभिर्मुनिभिरादौ दृष्टत्वात्, इष्टका अपि वालखिल्याः।<br>आ.-१-२४-९,११ एतमरुणाः केतवो वातरशना ऋषयोऽचिन्वन् । |

| | |
|---|---|
| | आ.१-२६-२ अथ हस्माहारुणः स्वायम्भुवः। स्वयंभुवः पुत्रः कश्चित् अरुणनामको मुनिः।<br>आ.१-३१-१,२ तव वैश्रवणः सदा । विश्रवसोऽपत्यम्<br>आ.१-३१-१५ नमोवयं वैश्रवणाय<br>आ.१-३२-३ अरुणाः काण्डऋषयः । अरुणाख्या अत्र काण्डर्षयः। |
| १०० | आ.२-७-१ वातरशना ह वा ऋषयः श्रमणाः – वातरशनाख्या ऋषयः श्रमणाः तपस्विनः । |
| १०१ | आ.२-१२-२ इति ह स्माऽऽह शौच आह्नेयः – शुचिनामकस्य महर्षेः पुत्रः शौचः, अह्निसंज्ञकाया मातुः पुत्र आह्नेयः महर्षिः। |
| १०२ | आ.२-१८-१ सुदेवः काश्यपः–कश्यपस्य पुत्रः सुदेवाख्यः कश्चिदृषिः । |
| १०३ | आ.२-१९-(२-५)यस्मै नमः ... नमः शिशुकुमाराय नमः - यस्मै परब्रह्मणे सर्वैः नमस्कारः क्रियते तत्परं ब्रह्म अत्र शिशुकुमाराख्यो ध्यातव्यः ।...शिशून् मारयति मुखेन निगिरतीति शिशुमारः जलग्राहविशेषः .. तदाकारो यो ध्रुवः तस्मै नमस्कारोऽस्तु । |
| १०४ | आ.२-२०-८ नमो गङ्गायमुनयोर्मुनिभ्यश्च नमः । |
| १०५ | आ.३-५-१ महाहविर्होता ... अयास्य उद्गाता - महाहविःसत्यहविः इत्याद्याः अयास्यान्ताः सप्त संख्याका महर्षयः, तन्महर्षिस्वरूपा अत्रत्या होत्रादयः।.. होताऽध्वर्युः आग्नीध्रो ब्रह्मा प्रस्तोता प्रतिहर्तोद्गातेति सप्त संख्याका होमनिष्पादका अत्रोक्ता इत्ययं मन्त्रः सप्तहोतेत्युच्यते। |
| १०६ | आ.३-९-१८ ऋषीणामरुन्धती<br>मं.प्र.१-९-७ सप्तर्षयः प्रथमां कृत्तिकानामरुन्धतीं – सप्तर्षयः कश्यपादयः, तेषां कृत्तिका नाम भार्याः सप्त । अरुन्धती नाम सप्तमी पतिव्रता प्रधानभूता निश्चला च । |
| १०७ | आ.३-२०-१ प्रयासाय स्वाहा – प्रेतस्य यमलोके बाधका देवताविशेषाः प्रयासादि शब्दवाच्याः । |
| १०८ | आ.४-११-१४ रन्तिर्नामासि दिव्यो गन्धर्वः – रन्तिनामको द्युलोकवर्ती गन्धर्वः । |
| १०९ | आ.४-३६ अत्रिणा त्वा कृमे हन्मि । कण्वेनजमदग्निना। अत्रिणा कण्वेनजमदग्निना च महर्षिणाऽनुगृहीतोऽहं त्वां हन्मि । |

| | |
|---|---|
| ११० | आ.४-३८-१ भृगूणां चक्षुषा प्रेक्षे। रौद्रेण त्वाङ्गिरसां मनसा ध्यायामि । - भृगूणां महर्षीणां, ...अङ्गिरसां महर्षीणां |
| १११ | आ.७-५-२ माहाचमस्यः प्रवेदयते – महान् सोमपानार्थः चमसः पात्रविशेषः यस्य मुनेः सः महाचमस्यः .. तस्य अपत्यं माहाचमस्यनामकः ऋषिः । |
| ११२ | आ.७-९-२ सत्यमिति सत्यवचा राथीतरः । रथीतराख्यस्य मुनेः पुत्रः कश्चित्सर्वदा सत्यमेव वक्तयतः सत्यवचाः ।<br>तप इति तपोनित्यः पौरुशिष्टिः । पुरुशिष्ट्याख्यस्य मुनेः पुत्रः कश्चित्तपसि नियतो वर्तते, अतस्तपोनित्यः ।<br>स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः। मुद्गलाख्यस्यमुनेः पुत्रः कश्चित् मौद्गल्यः। |
| ११३ | आ.७-१०-१ इति त्रिशङ्कोर्वेदानुवचनम् । त्रिशङ्कुनामकस्य मुनेर्मतम् । |
| ११४ | आ.९-१-१ भृगुर्वै वारुणिः। अस्ति कश्चित् महर्षिः भृगुर्नाम गोत्रप्रवर्तकः ... स च भृगुर्वरुणस्य पुत्रः । |
| ११५ | आ.१०-२८-१ अमृतेति वसिष्ठः। |
| ११६ | आ.१०-३५-१ विश्वामित्र ऋषिः |
| ११७ | आ.१०-७९-१ प्राजापत्यो हारुणिः सुपर्णेयः - प्रजापतेः पुत्रः प्राजापत्यःस च आरुणिनामकः, स एव सुपर्णाख्यायाः स्त्रिया अपत्यत्वात् सुपर्णेय इत्युच्यते । |
| ११८ | मं.प्र.१-१-९ अपालामिन्द्र – अपालानाम काचित् कन्या .. [अत्रिसुता ब्रह्मवादिनी त्वग्दोषदुष्टा - एतदाख्यानं ऋग्वेदे मं. ८-९१-१ वर्तते] |
| ११९ | मं.प्र.२-७-२ त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं |
| १२० | मं.प्र.२-८-१० यामाहरज्जमदग्निः |
| १२१ | मं.प्र.२-११-१२ यौगन्धरिरेव नो राजेति साल्वीरवादिषुः – युगन्धरस्यापत्यंयौगन्धरिः । साल्वो नाम जनपदः तद्विषयवासिन्यः प्रजाः साल्वीः साल्व्यः । |

*******

# विशेषतः अग्नेर्नामानि

| | |
|---|---|
| १ | सं.१-१-३-४ अ॒ग्नये॑ बृ॒ह॒ते नाका॑य॒ स्वाहा॑- दि॒वि नाको॒ नामाग्निः (ब्रा.३-२-३-११ )..**नाकनाम्ने** स्वर्गवासिने प्रौढायाग्नये हुतमस्तु । |
| २ | सं.१-२-१०-३-४ अति॑थेराति॒थ्यम॑सि॒ विष्ण॑वे त्वा, अ॒ग्नये॑ त्वा रायस्पोष॒ दाव्ने॒ विष्ण॑वे त्वा, श्ये॒नाय॑ त्वा सोम॒भृते॑ ... <br> अत्ति सततं गच्छतीत्यतिथिः ।... हे हविः त्वमतिथिरूपस्य अग्नेः सत्काररूपमसि.... **अतिथिनामकोऽन्यः** । **रायस्पोषदावा** धनसमृद्धेर्दाता कश्चिदग्निनामकोऽन्यः। सोमं बिभर्ति पोषयतीति **सोमभृत् श्येननामकोऽन्यः**।... |
| ३ | सं.१-३-१३-४ देवीरापो अपां नपात्–(अ॒पां , न॒पा॒त् इति पदम्) <br> न पातयत्युदकमध्ये गूढतया स्थितोऽपि तदुदकं न विनाशयतीति नपात्। **अपां नपादिति** वह्निविशेषस्य संज्ञा । <br> सं.१-६-१२- अ॒पां नपा॑तं – (अ॒पां, नपा॑तं इति पदम् ) <br> अपां वृष्टिरूपाणां उदकानां नपातं अविनाशयितारम् |
| ४ | सं १-४-१३ मू॒र्धानं॑ दि॒वो अ॑र॒तिं पृ॑थि॒व्या वै॑श्वान॒रं ... <br> यथा दिवि **नाको नामाग्नी** रक्षोहेत्याम्नातं तथा**पृथिव्यां वैश्वानरः**। |
| ५ | सं.२-२-२-३ अ॒ग्नये॑ रक्षो॒घ्ने <br> सं.२-२-३-५, अ॒ग्नये॑ जा॒तवे॑दसे , <br> सं.२-२-४-४ अ॒ग्नये॒ पव॑मानाय, अ॒ग्नये॑ पा॒व॒काय॑, |
| ६ | सं.२-५-८-११ त्रयो॒ वा अ॒ग्नयो॑ हव्य॒वाह॑नो दे॒वानां॑ कव्य॒वाह॑नःपि॒तॄणा॑ꣳ स॒हर॑क्षा॒ असु॑राणां <br> (देवानामग्निर्हव्यवाहन एववृतो भवति – भ.भा.) <br> ब्रा.१-६-९-१५ अ॒ग्निं क॑व्य॒वाह॑नं यजति <br> ब्रा.३-५-२- वृ॒णी॒ध्वꣳ ह॑व्य॒वाह॑नम् |
| ७ | सं ५-१-९-१० ए॒ष वै स्व॑यं॒भूर्ना॒म भव॑त्ये॒व - मथनापेक्षमन्तरेण स्वयमेवोत्पन्नत्वादेषस्वयंभूरित्युच्यते। |

| | |
|---|---|
| ८ | सं.५-४-१०-१० नपात्को वै नामैषोऽग्निर्यत्पुनश्चितिः<br>न पातयति विनाशयत्याहुतिम् न स्रावयतीति पुनश्चितिरूपस्याग्नेर्नपात्कइति नामधेयम् । |
| ९ | सं.५-५-९ अग्ने उदधेया त इषुर्युवा नाम तयानो मृड तस्याँस्ते नमस्तस्याँस्त उप जीवन्तो भूयास्माग्ने दुध्र गह्य किंशिल वन्य...<br>उदधिरिति कस्यचिदग्नेर्नाम । उदधिनामक हेऽग्ने ते त्वदीया येयमिषुर्युवा नाम, परशरीरेसहसा मिश्रणात् युवेति बाणस्य नामधेयं, तया युवाभिधेयया नोऽस्मान्मृड सुखय ।... दुध्रादीनि चत्वार्यग्निविषेशनामानि । |
| १० | ब्रा.१-२-१- ६५ नर्य प्रजां मे गोपाय –<br>नर्य मनुष्येभ्यो हित गार्हपत्य । |
| ११ | ब्रा.१-२-१-६६ अथर्व पितुं मे गोपाय – अथर्व पूर्वं अथर्वाख्येन महर्षिणा मथितत्वात्तद्रूपत्वम् । तथा चान्यत्राऽऽम्नातं– "अथर्वा त्वा प्रथमोनिरमन्थदग्ने" (सं.४-१-३-६) इति। तादृश हे दक्षिणाग्ने मे पितुं मदीयमन्नं गोपाय। |
| १२ | ब्रा.१-२-१-६७ शंस्य पशून्मे गोपाय –<br>हे शंस्य ऋत्विग्भिः प्रशस्यमानाहवनीय । |
| १३ | ब्रा.१-२-१-६८ सप्रथ सभां मे गोपाय –<br>प्रथया ख्यात्या सहितः सप्रथः । तादृश हे सभ्य मे सभामधिदेवन - स्थानं गोपाय । |
| १४ | ब्रा.१-२-१-६९ अहे बुध्निय मन्त्रं मे गोपाय –<br>हे अहे अहिंसितव्य, बुध्निय बुध्ने मूले जगदादावुत्पन्न आवसथ्य, मदीयं ऋगादिरूपं मन्त्रं गोपाय । |
| १५ | आ.१-९-१ अग्निश्च जातवेदाश्च । अग्न्यादयः शब्दाः मूर्ति-विशेषाणां नामधेयानि। |

*****

# कृताकृतम् (Done & not done)

| | |
|---|---|
| १ | सं. १-६-७-१४- यदनाश्वानुपवसेत्क्षोधुकः स्याद्यदश्नीयाद्रुद्रोऽस्य पशूनभिमन्येतापोऽश्नाति तन्नेवाशितं नेवानशितं न क्षोधुको भवति नास्य रुद्रः पशूनभि मन्यते –<br>यदनाश्वानिति – क्षोधुकः क्षुधाशीलः । अभिमन्येत हन्यात् । विधित्सितं पक्षान्तरं विदधाति – अप इति । उक्तं दोषद्वयमत्र परिहरति – तन्नेवेति । अशितास्वप्सु अदनाभावादशितमिव न भवति, क्षुच्छान्तेरनशितमिव न भवति । अतो न दोषद्वयम् ॥ |
| २ | ब्रा. १-३-१० अथ विचारपूर्वकं पिण्डशेषस्य पात्रगतस्याऽऽघ्राणं विधत्ते -<br>ब्रह्मवादिनो वदन्ति । प्राश्यां३ न प्राश्या३ मिति । यत्प्राऽश्नीयात् । जन्यमन्नमद्यात् ।प्रमायुकः स्यात्।यन्न प्राऽश्नीयात् । अहविस्स्यात् । पितृभ्य आवृश्च्येत । अवघ्रेयमेव । तन्नेव प्राशितं नेवाप्राशितम् ॥<br>विचारार्था प्लुतिः । प्राशनपक्षे बीजभक्षणवददनीयस्य अभावात्क्षुधितो यजमानो म्रियेत । अप्राशनपक्षे तु सर्वत्र हविः शेषस्य भक्षणदर्शनादिदं हविरेव न स्यात् । अतोऽयं पितृभ्यो विच्छिद्येत । अतो दोषद्वय - परिहाराय पात्रगतमन्नमव जिघ्रेदेव । तदवघ्रातं प्राशितमिव न भवति निगरणाभावात् । अप्राशितमिव न भवति । तदीयगन्धस्यान्तःप्रवेशात् ॥ |

# वेदस्वरूपम्

| | |
|---|---|
| १ | **ऋग्वेदः**श्वेतवर्णः स्यात्  द्विभुजो रासभाननः ।<br>अक्षमालाधरः सौम्यः प्रीतोव्याख्यापनोद्यतः ॥ |
| २ | अजास्यः पीतवर्णः स्यात् **यजुर्वेदो**ऽक्षसूत्रधृक् ।<br>वामे कुलिशपाणिस्तु   भूतिदो मङ्गलप्रदः ॥ |
